Table of contents

# पारमहंस्यमीमांसा



ग्रन्थप्रणेतारः

श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

# पारमहंस्यमीमांसा

ग्रन्थप्रणेतार:

श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिन:

संपादक:

ब्र. श्री. केशव: अवधानी

प्रकाशनम्

श्रुतिशङ्करसंस्कृतसंशोधनप्रतिष्ठानम्

मत्तूरु, शिवमोग्गा ५७७ २०३

© ३५७२४

प्रकाशनम्
श्रुतिशङ्करसंस्कृतसंशोधनप्रतिष्ठानम्
मत्तूरु, शिवमोग्गा ५७७ २०३
✆ ३५७२४

मुद्रणाधिकारः आरक्षितः

प्रथममुद्रणम् १९९४

प्रतयः १,५००

**मूल्यम् : ४० रूप्यकाणि**

मुद्रणस्थानम्
श्री नित्यानन्द प्रिण्टर्स्
अशोकनगरम्, बेङ्गळूरु ५०
✆ (०८०) ६२ ६० २७

# ग्रन्थसमर्पणम्

विशुद्धाद्वैत-सम्प्रदायाध्व-प्रदर्शकेभ्यः
श्रीश्रीशङ्करभगवत्पूज्यपादेभ्यः

# कृतज्ञताप्रकटनम्

सहृदयेषु विद्वद्वरेण्येषु वाचकेषु सविनयं विज्ञाप्यते। श्रुतिशङ्कर-संस्कृतसंशोधनप्रतिष्ठानस्य उद्देशस्त्वयमेव यत् वेदवेदान्तसंस्कृतानाम् अध्ययनम्, अध्यापनम्, संशोधनम्, प्रचारश्च इति। तत्र वेदानामध्यापनम्, अर्थपाठः याज्ञिकगोष्ठीनामायोजनम्, श्रौतकर्मणां प्रत्यक्षप्रयोगाभ्यासः मन्त्राणां विभागश अध्ययनक्रमः इति वेदविषये। शाङ्करभाष्याणामध्याप-नम्, वेदान्तसप्ताहप्रवर्तनम्, वेदान्तग्रन्थानां प्रकटनम् वेदान्तविद्वद्गोष्ठी-निर्वहणम् इति वेदान्तविषये। व्यावहारिकवाक्यानां प्रमाणभूतग्रन्थेभ्यः शिष्टव्यवहारेभ्यश्च सङ्ग्रहणम् प्रौढशैल्या संस्कृतेन संभाषितुं संस्कृत-सप्ताहप्रवर्तनम् इति संस्कृतविभागे। इत्थं शास्त्ररक्षणं तदर्थज्ञानं तदनु-सरणम् इति इदमेव प्रतिष्ठानस्य परमं लक्ष्यम्।

प्रकृतग्रन्थे—उपनिषदः शाङ्करभाष्यं च उपजीव्य श्रीश्रीसच्चिदा-नन्देन्द्रसरस्वतीसद्गुरुभिः परमहंसानां कृत्स्नो धर्मः प्रतिपादितोऽस्ति, यस्य आचरणेन मोक्षिजनः कृतार्थतामियात्। अयं हि नः परमो लाभो यद्विलम्बे-नापि सद्गुरूणामयं ग्रन्थः प्राकाश्यं नीतः। यतः समग्रं प्रकरणमिदं इतः पञ्चविंशतितमे वत्सरे एव श्रीचरणैः प्रणीतमासीत्। अतो ग्रन्थप्रकाशनद्वारा शुश्रूषासौभाग्यम् अनुगृहीतवतः गुरून् साष्टाङ्गं प्रणमामः।

इदं चापरं प्रतिष्ठानस्य कर्तव्यं यत् उपकृतनां सकार्तज्ञं संस्मरणम्। तत्र प्रथमं तावत् अध्यात्मप्रकाशकार्यालयसमित्यै हार्दकार्तज्ञं व्याहरामो, ययास्य ग्रन्थस्य प्रकाशनेऽस्माकमनुमतिर्दत्ता। कृत्स्नस्य ग्रन्थस्य मुद्रणार्थं पत्राणि दत्तवते श्रीखोडे रामचन्द्रसामहोदयाय, धनरूपेण साहाय्यं कृतवद्भ्यः बेंगलूरुनगरवासिभ्यः कृष्णमूर्तिनागराजगणपतिशास्त्रिमहो-दयेभ्यः, मत्तूरुग्रामवासिने रामस्वामिने अवधानिने अग्निहोत्रिणे, अश्वत्थ-नारायणावधानिने च गुरुभक्ताय, स्मारं स्मारं कार्तज्ञमर्पयति प्रतिष्ठानम्।

अन्ते च प्रतिलेखनं दत्तवद्भ्यः श्री नित्यानन्देन्द्रसरस्वतीभिक्षुभ्यः, गुरुभक्तायै पद्मावत्यै, ग्रन्थशोधनकर्मणि गाढमुपकारिणे अध्यात्मविद्याप्रवीणाय श्रीलक्ष्मीनरसिंहमूर्तिशास्त्रिणे, अश्वत्थनारायणावधानिने च, ग्रन्थभूमिकां लिखितवते अध्यात्मविद्याप्रवीणाय सुब्रायशर्मणे, संपादकाय केशवावधानिने, अल्पीयसैव कालेन अतिसुन्दरं ग्रन्थमुद्रणं कृतवद्भ्यः श्री नित्यानंद मुद्रणालयकार्यकर्तृभ्यः च प्रतिष्ठानं सप्रश्रयं धन्यवादान् समर्पयति ।

अध्यक्षः
श्रुतिशङ्करसंस्कृतसंशोधनप्रतिष्ठानम्
मत्तूरु, शिवमोग्गा
श्रीमुख-माघशुक्ल सप्तमी

# भूमिका

**सदाहं सम्प्रदायज्ञं संयमीन्द्रं सदाश्रयम् ।**
**सद्गुरुं सच्चिदानन्दं सदाचारं समाश्रये ॥**

**प्रणम्य सच्चिदानन्दं सद्गुरुं शास्त्रकोविदम् ।**
**लिख्यते पारहंस्यस्य भूमिका भक्तिपूर्वकम् ॥**

## ग्रन्थकारविषये

सुविदितमिदं वेदान्तरसिकानां तत्त्वजिज्ञासूनां समधीतवेदान्तशास्त्राणां विमर्शकानां विपश्चितां च विशेषतः यत् परमपूज्याः परमहंसपरिव्राजकाचार्यवर्याः श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः परिशुद्धशाङ्कराद्वैतवेदान्तसिद्धान्तप्रसाराय कृतपरिश्रमाः बद्धादराः मूलप्रस्थानत्रयशाङ्करभाष्यग्रन्थानां विवरणं कर्तुं तात्पर्यमाविश्चिकीर्षवश्च कर्णाटकभाषाङ्ग्लसंस्कृतभाषासु परःशतद्वयं ग्रन्थान् प्रणयन्तः **"आ सुप्तेरा मृतेः कालं नयेत् वेदान्तचिन्तया"** इतिसूक्तिं सार्थां कुर्वन्तः **कर्णाटकशङ्कराचार्याः** इति विंशतितमशतमाने **अभिनवशङ्कराचार्याः** इति च सुप्रसिद्धाः सन्तः वेदान्तप्रपञ्चे ध्रुवतारात्वेन ज्ञानभास्करत्वेन च राराजन्ते इति ॥

समग्राण्यपि शाङ्करभाष्याणि कर्णाटकभाषायां सर्वाङ्गसुन्दरतया अनूद्यापि तावता अतुष्यन्तः परमपूज्याः श्रीश्रीचरणाः कथारूपेण प्रश्नोत्तररूपेण प्रवचनोपन्यासरूपेण प्रबन्धरूपेण चर्चागोष्ठीरूपेण च नैकानि ग्रन्थरत्नानि रचितवन्तः तत्त्वजिज्ञासुमुमुक्षूणामर्थाय । ख्यातिलाभपूजादूराः सन्तः [illegible]कमूर्तयः भारतदेशम् आमूलाग्रं सञ्चरन्तः तत्रत्यान् जिज्ञासुजनाननुगृह्णन्तः सानन्दाः शान्ताः स्वीकृतपरमहंसपारिव्राज्याः ब्रह्मनिष्ठाः जीवन्मुक्ताः षण्णवतितमे वयसि प्रारब्धभोगं परिसमाप्य सिद्धिंगता एते महात्मानः **श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीसद्गुरवः** केषां तत्त्वजिज्ञासूनां साधकानां विदुषां वा संन्यासिनां वा वन्द्या न भवन्ति !

## प्रकृतग्रन्थस्य उद्देशः

तदिदं ग्रन्थरत्नं पारमहंस्यपारिव्राज्यनामकं विविदिषुसंन्यासिनां सनातनवैदिकसदाचारसन्मार्गे जिगमिषूणां मुमुक्षूणाम् अर्थाय सद्गुरुचरणैः प्रणीतमस्ति । यथाह स्वयमेव ग्रन्थकारः ग्रन्थारम्भप्रतिज्ञायाम्—"आस्तिकानां चिरन्तनवैदिकशिष्टाचारपथे जिगमिषूणां वेदान्तार्थविज्ञानेन आत्मानं कृतार्थयितुम् ईहमानानां मोक्षिणाम् अर्थाय"—इति ॥

अतः यद्यपि सुस्पष्टमवगम्यते मुमुक्षूणामेव संन्यासिनां तत्त्वजिज्ञासूनामेव अयं ग्रन्थः लिखितोऽस्ति न तु केवलं कुतूहलिनामर्थाय इति तथापि विदुषामपि कृतशास्त्रपरिश्रमाणां विमर्शकानां पारमहंस्यपारिव्राज्यविषये अधिकान् समग्रान् विषयान् संजिघृक्षूणामर्थाय भवत्येव इदं ग्रन्थरत्नं सर्वश्रुतिस्मृतिपुराणावगाहि ॥

तुरीयाश्रमविषये संन्यासिनाम् आचारानुष्ठानविषये च यद्यपि नैके ग्रन्थाः तत्तत्सम्प्रदायानुसारेण लिखिता उपलभ्यन्ते, तथापि तेषु परस्परं विगानं दृश्यते, सर्वसंन्यासिनां समाना अनुष्ठेयाः धर्मा नोपलभ्यन्ते इत्यतः अयं प्रयत्नः यथा सर्वेषामपि भिन्नभिन्नसम्प्रदायावलम्बिनामपि संन्यासधर्माः समाना भवेयुरिति । यदाह ग्रन्थकृत् "श्रुतिस्मृतिपुराणानाम् सारसङ्ग्रमनेन"—इति ॥

संन्यासविषये यावत्यः श्रुतिस्मृतयः विद्यन्ते तावतीः सर्वा अपि अत्र ग्रन्थे श्रीचरणाः परामृशन्ति । शाङ्करभाष्यप्रामाण्यमवलम्ब्य च समन्वयः कृतोऽस्त्यत्र ॥

भगवद्गीतासु भगवता वासुदेवेन सर्वज्ञेन ज्ञानसाधनत्वेन समुपदिष्टानि अमानित्वादीनि साधनानि, श्रवणादीनि च उपनिषत्प्रतिपादितानि सर्वैरपि संन्यासिभिः अवश्यमेव अनुष्ठेयानि इति दर्शयित्वा, परमहंसस्य तु अवगततत्त्वस्य कर्तव्याभावः प्रदर्शितोऽस्ति । "विद्वत्संन्यासिनः ब्रह्मनिष्ठाव्यति-

रेकेण नैव कर्तव्यमस्ति"—इति स्पष्टमाह ग्रन्थकृत्। यस्त्वात्मरतिरेव स्यात् आत्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते॥ इति तत्त्वनिष्ठस्य साधनाभाववचनात्॥

सर्वकर्मसंन्यासस्य ब्रह्मात्मज्ञानसाधनत्वं श्रीसुरेश्वरवार्तिकोदाहरण-पूर्वकं प्रतिष्ठापितमवगम्यते। तच्च वार्तिकमिदम्—

**अतः संन्यस्य कर्माणि सर्वाण्यात्मावबोधतः।**
**हत्वाविद्यां धियैवेयात् तद्विष्णोः परमं पदम्॥**

धियैव ज्ञानेनैन अविद्यां कर्तृत्वभोक्तृत्वप्रवर्तिनीं सर्वसंसारदुःखनि-मित्तभूतां हत्वा बाधित्वा मोक्षं स्वतःसिद्धं परमानन्दरूपं समवाप्नोति इत्यर्थः॥

योऽसौ परमार्थसंन्यासी स एव सम्यग्दर्शननिष्ठः नैष्कर्म्यसिद्धिभाक् नेतरः इति—

**असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।**
**नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥**

इति भगवद्गीतावाक्यप्रामाण्यमवलम्ब्य श्रीचरणैः प्रतिष्ठपितमव-गम्यते॥

दण्डमुद्रातर्पणादिकर्माणि परामृशन् ग्रन्थकारः यद्यप्येतानि स्मृति-पुराणविहितानि तथा चाचारसम्प्रदायागतानीव दरीदृश्यन्ते तथापि चित्त-विक्षेपकरत्वात् विविदिषुसंन्यासिनापि किं नियमेन कर्तव्यानीत्यत्र तन्त्रनिष्णाता एव प्रमाणमिति स्वासम्मतिं सूचयति॥

श्रवणमनननिदिध्यासनानां साक्षात् ज्ञानसाधनत्वम् अत एव संन्यासिनामवश्यकर्तव्यत्वं च प्रतिजानानाः श्रीश्रीचरणाः शाङ्करभाष्य-

वाक्यप्रमाण्यबलात् श्रवणादिसाधनस्वरूपं सविस्तरं प्रदर्शितवन्तः। श्रवणादीन्यकृत्वा नैव कृतकृत्यो भवति ॥

एवं संन्यासिमुमूक्षुणां कामधेनुस्वरूपेण सर्वविषयप्रतिपादनमुखेन कृतार्थताम् आवहत् ग्रन्थरत्नमिदं न केषां मुदे ?

नमः परमऋषिभ्यो नमः परमगुरुभ्यः

**प्रणम्य सच्चिदानन्दसद्गुरुं ज्ञानसागरम् ।**
**अर्पयामि मुदा तस्मै गुरवे गुरुभूमिकाम् ॥**

बैङ्गलूरु-५६००२८
श्रीमुखसंवत्सरस्य पुष्यकृष्णपञ्चमी भौमवासरः
१-२-१९९४

अध्यात्मविद्याप्रवीणः, वेदविद्यानिधिः
अद्वैतज्ञानसिन्धुः
विद्याविधिनिधिः
**के. जि. सुब्रायशर्मा**
अध्यात्मप्रकाशकार्यालयसंस्था

## ग्रन्थविषये प्रणेतृणां श्रीचरणानाम् अभिप्रायः

परमहंसपारिव्राज्यं नाम ज्ञानाङ्गत्वेन ज्ञानपरिपाकाङ्गत्वेन च कर्तव्यः [illegible]संन्यास एव इति भाष्यानुसारम् अत्र प्रत्यपादि । संन्यासस्य उद्देशस्तु वेदोक्तसाध्यसाधनानां परित्याग एव। पारमहंस्यस्य अत्याश्रमत्वात् परमहंसेन कर्तव्यानि न कानिचन श्रौतानि स्मार्तानि वा कर्माणि विद्यन्ते; वेदान्तानां श्रवणमनननिदिध्यासानान्येव तस्य सर्वस्वम् । प्रणवजपस्तु तेषां लक्षणम् न तत् कर्म । परमहंसस्य नैकेऽपि नियमाः प्रवर्तन्ते । अधर्माचरणं तु तस्य स्वप्नेऽप्यसम्भवम् ।

परमहंसेन क्रियमाणं यत् ब्रह्मचिन्तनं तस्य कर्मरूपेण व्यत्ययवादि, कर्मभिः सम्बध्य गृहस्थस्येव तस्यापि साध्यसाधनसम्बन्धकारि वा न कस्यापि वचनं प्रमाणत्वेन ग्राह्यं भवति । सम्प्रतितनाचारे रूढः संन्यासस्वीकारक्रमः संन्यासिनामाचारक्रमः यतिसंस्कारक्रमः इति त एते परमार्थपरमहंसविषये न युज्यन्त एव इत्याभाति । एतेष्वाचारेषु केचन स्मृत्यविहिताः । पुरुषमतिकल्पनामात्रा एवेति प्रतिभान्ति । केचन आचाराः वेदैः विरुध्यन्त एव । अन्ये पुनः वेदान्तसिध्दान्तमेव वयत्यासयन्तीव ।

मुमुक्षवः आचारप्रियाः परमपुरुषार्थाकांक्षिणः ये संन्यासिनो गृहस्थाश्च अवश्यं तेऽत्र प्रतिपादितान् विषयान् शास्त्रयुक्त्यनुभवैः सङ्गमय्य पश्येयुः । युक्तं चेत् गृण्हीरन्, अयुक्तं त्यजेयुरेव । नेदं प्रकरणं कस्यचित् संन्यासिनः कस्याश्चित् संस्थाया वा गौरवह्रासाय प्रणीतम् । येषां परमहंसपरिव्राजकाचार्यवरेण्या इति विश्रुतेषु श्रीशङ्करभगवत्पादेषु पूज्यबुद्धिः परमपुरुषार्थे मोक्षे यथार्थाकांक्षा तेष्वियं कृतिः सविनयं विज्ञाप्यते । अनेन प्रकरणेन भगवान् नारायणः प्रीयताम् । प्रकरणमिदं-येनकेनचित् लौकिकबाह्यलाभनिमित्तेन काषायदण्डादीन् जिघृक्षूणां प्रोत्साहमभिभूय यथार्थपरमहंसाश्रमम् आचारपथे प्रवर्तयितुं यद्युपकुर्यात् प्रचोदयाद्वा तेनैव धन्यं मन्येय आत्मानम् ।

**श्रीसच्चिदानंदेन्द्रसरस्वतीभिक्षुः**

# विषयानुक्रमणिका

**प्रथमोऽध्यायः — पारमहंस्यस्य शास्त्रविहितत्वम्**

**ग्रन्थारम्भप्रतिज्ञा**

१. पारमहंस्ये प्रमाणभूताः श्रुतयः २

२. श्रुतिषु पारिव्राज्यपरामर्शः २

३. वेदान्तसूत्रभाष्ये पारिव्राज्यमीमांसा, जाबालश्रुतिः प्रत्यक्षा ५, ९

४. बृहदारण्यकभाष्ये पारिव्राज्यमीमांसा ९

५. बृहदारण्यकवार्तिके पारमहंस्यविचारः १३

६. भगवद्गीतासु संन्यासविचारः २२

**द्वितीयोऽध्यायः — परमहंसस्य दीक्षाविचारः**

१. उत्तरग्रन्थस्य सम्बन्धः २९

२. परमहंसधर्मविषये भाष्यवाक्यानि २९

३. तुरीयाश्रमविषयाणि स्मृतिवाक्यानि ३१

४. स्मृतीनामैकवाक्यम् ३५

५. पुराणवाक्यविचारः ३६

६. दण्डमुद्रातर्पणादि विचारः ३८

७. अथ गुरूपदेशे प्रणवविचारः,
प्रणवपञ्चीकरणग्रन्थो न प्रमाणम् ३९, ३९

८. प्रणवमन्त्रऋष्यादिकीर्तनं न्यासश्च ४२

९. ओङ्कारपरामर्शकानि श्रुतिवाक्यानि ४३

१०. प्रणवोपदेशप्रकारः ४६

११. महावाक्यविचारः ४६

१२. संन्यासिने नामदानम् ४७

**तृतीयोऽध्यायः — पारिव्राज्यद्वयविवेकः**

१. विद्वद्विविदिषाभेदेन पारिव्राज्यद्वयम् ४९
२. ब्रह्मजिज्ञासायामधिकारी ५३
३. गुरुमुखेन विद्या संपादयितव्या ५५

**चतुर्थोऽध्यायः — संन्यासिधर्मनिरूपणम्**

१. विविदिषुणा शास्त्रोक्तसाधनानुष्ठानं कर्तव्यम् ५६
२. स्मृत्युक्तज्ञानसाधनानि ५६
३. श्रवणादिसतत्त्वनिरूपणम् ५७
४. मनननिदिध्यासनयोः विवेकः ६१
५. उपसंहारः ६४

**पञ्चमोऽध्यायः — परमहंसस्य दैनन्दिनकृत्यनिरूपणम्**

१. विद्वत्संन्यासिनः ब्रह्मनिष्ठाव्यतिरेकेण नैव कर्तव्यमस्ति ६९
२. आचार्यस्य सतस्तु लोकसङ्ग्रहार्थं कर्म ७०
३. विविदिषुसंन्यासिनः स्नानादिकम् ७०
४. विविदिषोः दैनन्दिनकृत्यम् ७१
५. अथ जपः ७३
६. अथ भिक्षावृत्तिप्रकारः ७६
७. अथ भोजनम् ७९

**षष्ठोऽध्यायः — परिव्राजकस्य पर्यटनम्**

१. पर्यटनयोग्यदेशः ८१
२. नैकत्र वसतिः परिव्राजः ८२
३. निषिद्धकर्माणि ८३
४. सर्वत्रसमदृष्टिः ८४

५. वर्षाकाले नियमः तत्र व्यासपूजाद्यनुष्ठानम्, चातुर्मास्यानुष्ठानं कल्पान्तरेण तद्विमर्शश्च, चातुर्मास्यानुष्टानविषये निर्णयः, चातुर्मास्यसङ्कल्पवाक्यं प्रतिवचनं च ८६, ८९, ९०, ९०

६. यतीनाम् एकत्र समवायः ९१

७. अभ्यागताचारः ९२


## परिशिष्टचिन्ता


१. तत्र आह्निकप्रकारः ९५

२. परमार्थप्रणवानुसंधानप्रकारः ९६

३. प्रणवद्वारेण परब्रह्मणः उपासनम् १०७

४. अध्यात्मयोगोपायानुष्ठानम् १११

५. द्वितीयप्रकारो मनोनिग्रहस्य ११६


## स्मृतिप्रमाणवाक्यानि


१. आपस्तम्बधर्मसूत्रम्, आत्मज्ञानम्, आश्रमविचारः ११७, ११७, १२०

२. गौतमधर्मसूत्रम्, आश्रमविकल्पसमुच्चयविचारः १२२, १२२

३. बोधायनधर्मसूत्रम् १२३

४. मनुस्मृतिः, षष्ठाध्याये, द्वादशाध्याये १२६, १३५

५. याज्ञवल्क्यस्मृतिः १३९


## परिशिष्टः — २


१. यतिसंस्कारविषयविचारः १४२

२. यतिसंस्कारक्रमः १४३

# पारमहंस्यमीमांसा

## प्रथमोऽध्यायः

**सत्यानृते मिथोऽध्यस्ते सुविविच्य प्रदर्शयन् ।**
**अनर्थघ्नो विजयते सद्गुरुः परहंसराट् ॥**

### पारमहंस्यस्य शास्त्रविहितत्वम् ।
### ग्रन्थारम्भप्रतिज्ञा

ॐ नमः परमहंसपरिव्राजकाचार्यवरेण्येभ्यो वेदान्तविज्ञानसुनिश्चितार्थेभ्यो विशुद्धब्रह्मविद्यासम्प्रदायाध्वप्रदर्शकेभ्यो श्रीगौडपादाचार्य श्रीशङ्करभगवत्पादाचार्यश्रीसुरेश्वराचार्येभ्यः । नमो गुरुभ्यः ॥

अथारभ्यते परमहंसपारिव्राज्यसतत्त्वगता मीमांसा । आस्तिकानां सनातनवैदिकशिष्टाचारपथे जिगमिषूणां वेदान्तार्थविज्ञानेन आत्मानं कृतार्थीयितुम् ईहमानानां मोक्षिणाम् अर्थाय ।

अत्र हि बहवो वादिनो विप्रतिपन्नाः आचाराश्च भिन्नभिन्नाः एव दरीदृश्यन्ते । तथा हि कलियुगे संन्यासाश्रमस्वीकारो वर्ज्य एवेति केचित् । त्रिदण्डाश्रम एव स्वीकार्यो न जातु पारमहंस्यम् इत्यन्ये । पारमहंस्यं मुक्त्वा न कोऽप्यन्यो संन्यासाश्रमः शास्त्रविहितो यतीनां कृते इत्यपरे । आचाराः अपि भिन्ना एव । केचिद् त्रिदण्डस्वीकारपूर्वकमेव तुरीयाश्रमं विशन्ति वैष्णवसंप्रदायाभिमानिनः प्रसिद्धाः । स्मार्तब्राह्मणाख्यया विख्यातास्तु नियमेन पारमहंस्यमेवावलम्बन्ते । तत्रापि दण्डकमण्डल्वादिपरिग्रहाः केचित्, तद्वर्जिताश्च अपरे । तदेवं यतीनां वेषभूषादौ नित्यानुष्ठानक्रमे च वैविध्यं बहुधा लक्ष्यते । मृतसंन्यासिदेहगतान्त्यक्रियाविषयेऽप्यस्ति प्रकारवैविध्यम् । तत्र यावत्

तुरीयाश्रमधर्मानुष्ठानं लोके सततं वरीवर्तते तावत् एवमाद्याचारभेदानां भिन्नभिन्नमतभेदानां च देशाचारकुलाचारभेदवशात् वैविध्यमिति कथञ्चित् मनस्समाधानं संपाद्य औदासीन्यवहनं वेदप्रमाणकानां न शोभते। विशिष्य च श्रीशङ्करभगवत्पादाभिमतवेदान्तसम्प्रदायानुयायिनां श्रुतिस्मृतिपुराणयुक्त्यनुभवसामरस्यम् अनापाद्य कस्यचिदेवानुष्ठानस्य स्वीयत्वेन अनुमोदनं, तदितरेषु विना कारणम् औदासीन्यधारणं च सुतरां न युक्तमिति न पृथग्वक्तव्यम्। तस्मात् यथोक्तविवादोद्भासितविषयान् अधिकृत्य श्रुतिस्मृतिपुराणाचाराणां सारसङ्ग्रमनेन यथामतिनिरूपणं कर्तुम् इदं प्रकरणं आरभ्यते तत्त्वजिज्ञासूनामर्थाय॥

## १. पारमहंस्ये प्रमाणभूताः श्रुतयः

तत्र साक्षात् पारमहंस्यपरामर्शिकाः श्रुतयस्तावत् मुण्डकछान्दोग्यबृहदारण्यकश्वेताश्वतरजाबालावधूतारूणिशतरुद्रकुण्डिकतुरीयातीतनारदपरिव्राजकपरमहंसब्रह्मभिक्षुकमैत्रेयीयाज्ञवल्क्यशाठ्यायनशाङ्कायनसंन्यासाख्याः। एतासु च आद्यं त्रितयं शाङ्करभाष्यसहकारित्वेन प्रसिद्धम्। श्वेताश्वतरभाष्यस्य शङ्करभगवत्पादप्रणीतत्वे न सर्वग्रन्थपुरातत्वशोधकसंप्रतिपत्तिः। जाबालोपनिषदो यद्यपि भाष्यं नोपलभ्यते तथापि तस्याः सूत्रभाष्ये समुदाहृतत्वात्, तस्याश्च आचार्यैः प्रमाणीकृतत्वे न विद्वन्मतिवैषम्यम्। एवं च शङ्करभगवत्पादभाष्योपबृंहितासु उपनिषत्सु न केषाञ्चिदप्रामाण्यं वेदान्तिनाम् इत्यतः तदानुगुण्येन प्रप्रथमं विचारः प्रतायते। प्रसङ्गवशादेव तु वेदान्तान्तरमपि परामृश्यते॥

## २. श्रुतिषु पारिव्राज्यपरामर्शः

सर्वसंप्रतिपन्नप्रमाणेषु प्रधानोपनिषत्सु संन्यासपरामर्शकानि वाक्यानीमानि—

**वाजसनेयिनां संहितोपनिषदि** तावत्—“ईशावास्यमिदं सर्वं

यत्किंच जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्" ॥ इति । अत्र पारिव्राज्यशब्दाभावेऽपि त्यागशब्देन तत्सूचना समस्ति ।

तथा च अत्र भाष्यम् "एवम् ईश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रय-संन्यासे एव अधिकारः, न कर्मसु । तेन त्यक्तेन" इत्यादि ॥

**तलवकारोपनिषदि** च "भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति" (केन २-५) इति ।

अत्र भाष्यं—"भूतेषु भूतेषु सर्वभूतेषु स्थावरेषु चरेषु भूतेषु च एकम् आत्मतत्त्वं ब्रह्म विचित्य विज्ञाय साक्षात्कृत्य धीराः धीमन्तः प्रेत्य व्यावृत्य ममाहंभावलक्षणात् अविद्यारूपात् अस्माल्लोकात् उपरम्य सर्वात्मैकत्व-भावम् अद्वैतम् आपन्नाः सन्तः अमृता भवन्ति ब्रह्मैव भवन्ति इत्यर्थः" ॥

**मुण्डके च**—"तपःश्रध्दे ये ह्युपवसन्त्यरण्ये
शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति
यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥" मु. १-२-११

अत्र 'भैक्ष्यचर्यां चरन्तः' इति पारिव्राज्यलिङ्गमस्ति ।

भाष्ये तु "ये पुनः तद्विपरीताः ज्ञानयुक्ताः वानप्रस्थाः संन्यासिनश्च तपःश्रद्धे हि तपः स्वाश्रमविहितं कर्म, श्रद्धा हिरण्यगर्भादिविषया विद्या, ते तपःश्रद्धे उपवसन्ति सेवन्ते अरण्ये वर्तमानाः सन्तः । शान्ताः उपरतकरण-ग्रामाः विद्वांसः गृहस्थाश्च ज्ञानप्रधाना इत्यर्थः । भैक्ष्यचर्यां चरन्तः परिग्रहा-भावात् उपवसन्ति अरण्ये इति संबन्धः ।"

"नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गात्" (मुं ३-२-४) अत्र भाष्यं "तपोऽत्र ज्ञानं लिङ्गं संन्यासः संन्यासरहितात् ज्ञानात् न लभ्यः इत्यर्थः ।"

**तैत्तिरीयके च नारायणानुवाके** "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति" (म. ना १२) । अत्र "यतयो विशन्ती"ति विशेषणादानात् त्यागः संन्यासः इति गम्यते ।

"न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि पराँसि न्यास एवात्यरेचयत्" (म. ना. ७८) अत्र न्यास एव सर्वातिशयतपस्त्वेन स्तुतः ।

**छान्दोग्ये** "त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति प्रथमः तप एव द्वितीयः ब्रह्मचार्याचार्यकुलवासी तृतीयः । अत्यन्तम् आत्मानम् आचार्य-कुले अवसादयन् सर्व एते पुण्यलोका भवन्ति । ब्रह्मसंस्थो अमृतत्वमेति" (छां. २-२३-१) ।

अत्र भाष्यं "सर्व एते त्रयोऽपि आश्रमिणः यथोक्तैर्धर्मैः पुण्यलोका भवन्ति । पुण्यो लोको येषां त इमे पुण्यलोका आश्रमिणो भवन्ति । अव-शिष्टस्तु अनुक्तः परिव्राट् तुरीयः ब्रह्मसंस्थः ब्रह्मणि सम्यक् स्थितः । सः अमृतत्वं पुण्यलोकविलक्षणं अमरणभावम् आत्यन्तिकम् एति । नापेक्षिकम् देवाद्यमृतत्ववत् । पुण्यलोकात् पृथक् अमृतत्वस्य विभागकरणात्" । एतद्वाक्यस्य विस्तरेण विचारोऽप्यग्रे भविष्यति ।

**बृहदारण्यके** "एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति । या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणा उभे ह्येते एषणे एव भवतः । तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः अमौनं च मौनं च निर्विद्याथ ब्राह्मणः" (बृ ३-५-१) अत्रापि आत्मानं विदितवतः सर्वैषणात्यागलक्षणः संन्यासो भवतीत्युक्तम् । एतद्वाक्यार्थनिरूपणं भाष्यानुसारेण अग्रे भविष्यति ।

"एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । एतद्ध स्म वै तत् पूर्वे विद्वाँसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति, या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणा उभे ह्येते एषणे एव भवतः" (बृ ४-४-२२)

अत्र आत्मतत्त्वं विविदिषूणाम् अपि पारिव्राज्यमस्ति इत्युक्तम् । एतस्यापि वचनस्य विचारः पुरस्ताद्भविता ।

अथ **श्वेताश्वतराणां मन्त्रोपनिषदि** "अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम्" (श्वे ६-२१) इत्यत्र उपनिषद्विद्या अत्याश्रमिभ्यो वक्तव्या इत्युक्तम् ।

## ३. वेदान्तसूत्रभाष्ये पारिव्राज्यमीमांसा

अत्र यथोदाहृतेषु वचनेषु तावत् न कुत्रापि चोदनावाचकशब्दो अस्तीत्यतः किं गृहस्थाश्रमादन्येषाम् आश्रमाणाम् अस्तित्वम् श्रुतिपरामर्शबलात् आश्रयितव्यम् आहोस्वित् ऐकाश्रम्यं त्वाचार्याः (गौ. ध. सू) इति स्मृतिप्रामाण्यात् गार्हस्थ्यमेकमेव श्रेयस्कामैरनुष्ठेयम् इति विशये, शारीरके "परामर्शं जैमिनिरचोदना चापवदति हि" (३-४-१८) इति पूर्वपक्षयित्वा सिद्धान्तितम् "अनुष्ठेयं बादरायणः साम्यश्रुतेः" (३-४-१९) "विधिर्वा धारणवत्" इति च ।

तत्र भाष्यं—"त्रयो धर्मस्कन्धाः इत्यादयो ये शब्दा ऊर्ध्वरेतसामाश्रमाणां सद्भावायोदाहृताः, न ते तत्प्रतिपादनाय प्रभवन्ति यतः परामर्शकेषु शब्देषु आश्रमान्तराणां जैमिनिराचार्यो मन्यते न विधिम् । कुतः ? न ह्यत्र लिङादीनाम् अन्यतमश्चोदनाशब्दोऽस्ति । अर्थान्तरपरत्वं चैषु प्रत्येकं उपलभ्यते । "त्रयो धर्मस्कन्धाः इत्यत्र तावद्यज्ञोऽध्ययनं दानम् इति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्य-

कुलेऽवसादयन् सर्वे एते पुण्यलोका भवन्ति" इति परामर्शपूर्वकमाश्रमाणाम् अनात्यन्तिकफलत्वं संकीर्त्य आत्यन्तिकफलतया ब्रह्मसंस्थता स्तूयते 'ब्रह्मसंस्थो अमृतत्वमेति' इति (२-२३-१)। ननु परामर्शेऽप्याश्रमा गम्यन्त एव। सत्यं गम्यन्ते। स्मृत्याचाराभ्यां तु तेषां प्रसिद्धिर्न प्रत्यक्षश्रुतेः। अतश्च प्रत्यक्षश्रुतिविरोधे सति अनादरणीयास्ते भविष्यन्ति अनधिकृतविषया वा। ननु गार्हस्थ्यमपि सहैवोर्ध्वरेतोभिः परामृष्टं "यज्ञोऽध्ययनं दानमिति प्रथम" इति। सत्यमेवम्। तथापि तु गृहस्थं प्रत्येवाग्निहोत्रादीनां कर्मणां विधानाच्छ्रुति प्रसिद्धमेव हि तदस्तित्वम्। तस्मात् स्तुत्यर्थ एवायं परामर्शो न चोदनार्थः। अपिच अपवदति हि प्रत्यक्षा श्रुतिः आश्रमान्तरं "वीरहा वा एष देवानां योऽग्निमुद्वासयते" (तै. सं १-५-२-१) "आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः" (तै. उ १-११) "नापुत्रस्य लोकोऽस्ति तत्सर्वे पशवो विदुः" (ऐ. ब्रा. ७-१३-२) इत्येवमाद्या। तथा "ये चेमे अरण्ये श्रद्धातप इत्युपासते" (छाँ ५-१०-१) "तपःश्रद्धे ये ह्युपवसन्त्यरण्ये" (मुं १-२-११) इति च देवयानोपदेशः नाश्रमान्तरोपदेशः। संदिग्धं च आश्रमान्तराभिधानं "तप एव द्वितीयः" इत्येवमादिषु। तथा "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" (बृ ४-४-२२) इति लोकसंस्तवोऽयं न पारिव्राज्यविधिः" इति पूर्वपक्षः। अथ सिद्धान्तः—

अनुष्ठेयम् आश्रमान्तरं बादरायण आचार्यो मन्यते। वेदे श्रवणात्। अग्निहोत्रादीनाम् च अवश्यानुष्ठेयत्वात् तद्विरोधात् अनधिकृतानुष्ठेयम् आश्रमान्तरमिति हि इमां मतिं निराकरोति। गार्हस्थ्यवदेव आश्रमान्तरमपि अनिच्छता प्रतिपत्तव्यमिति मन्यमानः। कुतः? साम्यश्रुतेः। समं हि गार्हस्थ्येन आश्रमान्तरस्य परामर्शश्रुतिर्दृश्यते "त्रयो धर्मस्कन्धाः" इत्याद्या। यथेह श्रुत्यन्तरविहितमेव गार्हस्थ्यं परामृष्टं एवं आश्रमान्तरमपीति प्रतिपत्तव्यम्। यथा च शास्त्रान्तरप्राप्तयोरेव निवीतप्राचीनावीतयोः परामर्शः उपवीतविधिपरे वाक्ये। तस्मात् तुल्यम् अनुष्ठेयत्वं गार्हस्थ्येन आश्रमान्तरस्य। तथा "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" बृ ४-४-२२

इत्यस्य वेदानुवचनादिभिः समभिव्याहारः। "ये चेमे अरण्ये श्रद्धातप इत्युपासते" छां ५-१०-१, इत्यस्य च पञ्चाग्निविद्यया। यत्तूक्तं "तप एव द्वितीयः" इत्यादिषु आश्रमान्तराभिधानं संदिग्धम् इति नैष दोषः। निश्चयकारणसद्भावात्। "त्रयो धर्मस्कन्धा इति हि धर्मस्कन्धत्रित्वं प्रतिज्ञातम्। न च यज्ञादयो भूयांसो धर्माः उत्पत्तिभिन्नाः सन्तः अन्यत्र आश्रमसंबन्धात् त्रित्वे अन्तर्भावयितुं शक्यन्ते। तत्र यज्ञादिलिङ्गो गृहाश्रमः एको धर्मस्कन्धो निर्दिष्टः। ब्रह्मचारीति च स्पष्टः आश्रमनिर्देशः। तपः इत्यपि कोऽन्यस्तपःप्रधानादाश्रमात् धर्मस्कन्धोऽभ्युपगम्येत ?। "ये चेमे अरण्ये" इति च अरण्यलिङ्गात् श्रद्धातपोभ्याम् आश्रमगृहीतिः। तस्मात् परामर्शेऽपि अनुष्ठेयम् आश्रमान्तरम्" (३-४-१९)

**"विधिर्वा धारणवत्"** वे. सू. ३-४-२०

विधिर्वा अयम् आश्रमान्तरस्य, न परामर्शमात्रम्। ननु विधित्वाभ्युपगमे एकवाक्यताप्रतीतिः उपरुध्येत। प्रतीयते च अत्र एकवाक्यता, पुण्यलोकफलाः त्रयो धर्मस्कन्धाः ब्रह्मसंस्थता तु अमृतत्वफला इति। सत्यमेतत्। सत्यामपि तु एकवाक्यतां प्रतीतिं परित्यज्य विधिरेव अभ्युपगन्तव्यः, अपूर्वत्वात्, विध्यन्तरस्य अदर्शनात्। विस्पष्टाच्च आश्रमान्तरप्रत्ययात् गुणवादकल्पनया एकवाक्यत्वयोजनानुपपत्तेः। धारणवत्। यथा "अधस्तात् समिधं धारयन् अनुद्रवेत् उपरि हि देवेभ्यो धारयति" इत्यत्र सत्यामपि अधोधारणेन एकवाक्यताप्रतीतौ विधीयत एव उपरिधारणम् अपूर्वत्वात्। तथा च उक्तं शेषलक्षणे "विधिस्तु धारणे अपूर्वत्वात्" जै. सू ३-४-१५ इति। तद्वत् इहापि आश्रमपरामर्शश्रुतिः विधिरेवेति कल्प्यते" ब्र. सू. ३-४-२० ॥

तस्य व्याख्या—तदेवं "त्रयो धर्मस्कन्धाः" पारिव्राज्ये असाधारणं प्रमाणम् इति कृत्वा गार्हस्थ्यवत् आश्रमान्तरमपि अनुष्ठेयम्। परामर्शसामान्यात्, अथवा विधिरेव अयं, अपूर्वत्वात्। धारणवत् इति न्यायेन पारिव्राज्यस्य श्रौतत्वं साधितम्। उपलक्षणार्था इयं चिन्ता सर्वेषां परामर्शकवाक्यानाम्। अथात्र अपरं श्रौतं लिङ्गम् इत्याह भाष्यकृत्—

"यदापि परामर्श एव अयं आश्रमान्तराणां तदापि ब्रह्मसंस्थता तावत् संस्तवसामर्थ्यात् अवश्यं विधेयाभ्युपगन्तव्या। सा च किं चतुर्षु आश्रमेषु यस्यकस्यचित् अहोस्वित् परिव्राजकस्यैवेति विवेक्तव्यम्। यदि च ब्रह्मचर्यान्तेषु आश्रमेषु परामृश्यमानेषु परिव्राजकोऽपि परामृष्टः ततः चतुर्णामपि आश्रमाणां परामृष्टत्वाविशेषात् अनाश्रमित्वानुपपत्तेश्च यः कश्चित् चतुर्षु आश्रमेषु ब्रह्मसंस्थो भविष्यति। अथ न परामृष्टः ततः परिशिष्यमाणः परिव्राडेव ब्रह्मसंस्थः इति (भविष्यति)।

तत्र तपःशब्देन वैखानसग्राहिणा परामृष्टः परिव्राडपि इति केचित्। तदयुक्तम्। न हि सत्यां गतौ वानप्रस्थविशेषणेन परिव्राजको ग्रहणमर्हति। यथात्र ब्रह्माचारिगृहमेधिनौ असाधारणेन एव स्वेन स्वेन विशेषणेन विशेषितौ एवं भिक्षुवैखानसौ अपीति युक्तम्। तपश्च असाधारणो धर्मः वानप्रस्थानां कायक्लेशप्रधानत्वात्। तपःशब्दस्य च तत्र रूढेः। भिक्षोस्तु धर्मः इन्द्रियसंयमादिलक्षणो नैव तपःशब्देनाभिलप्यते। चतुष्ट्वेन च प्रसिद्धा आश्रमास्त्रित्वेन परामृश्यन्ते इत्यन्याय्यम्। अपि च भेदव्यपदेशोऽत्र भवति "त्रय एते पुण्यलोकभाजः, एकोऽमृतत्वभाक्" इति। पृथक्त्वे च भेदव्यपदेशोऽवकल्पते। न ह्येवं भवति "देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ, अन्यतरस्त्वनयोर्महाप्रज्ञः" इति। भवति त्वेवम् "देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ, विष्णुमित्रस्तु महाप्रज्ञः" इति। तस्मात् पूर्वे त्रय आश्रमिणः पुण्यलोकभाजः, परिशिष्यमाणः परिव्राडेव अमृतत्वभाक्॥

कथं पुनर्ब्रह्मसंस्थशब्दो योगात् प्रवर्तमानः सर्वत्र संभवन् परिव्राजक एवावतिष्ठेत? रूढ्यभ्युपगमे च आश्रममात्रात् अमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसङ्गः इति। अत्रोच्यते 'ब्रह्मसंस्थः' इति ब्रह्मणि परिसमाप्तिः अनन्यव्यापारतारूपं तन्निष्ठत्वम् अभिधीयते। तच्च त्रयाणां आश्रमिणां न संभवति। स्वाश्रमविहितकर्माननुष्ठाने प्रत्यवायश्रवणात्। परिव्राजकस्य तु सर्वकर्मसंन्यासात् प्रत्यवायो न संभवत्यननुष्ठाननिमित्तः। शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थताया उपोद्बलको न विरोधी। ब्रह्मनिष्ठत्वमेव हि तस्य

शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म, यज्ञादीनि चेतरेषाम् । तद्व्यतिक्रमे च तस्य प्रत्यवायः । तथा च "न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि तपाँसि न्यास एव अत्यरेचयत्" (तै. ना ७८), "वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः" (मुं ३-२-६) इत्याद्याः श्रुतयः । स्मृतयश्च "तद्बुध्दयस्तदात्मानस्तन्निष्ठास्तत्परायणाः" (गी ५-१७) इत्याद्याः ब्रह्मसंस्थस्य कर्माभावं दर्शयन्ति । तस्मात् परिव्राजकस्य आश्रम[illegible]त्वप्राप्तेः ज्ञानानर्थक्यप्रसङ्ग इत्येषोऽपि दोषो नावतरति । तदेवं परामर्शितेऽपि इतरेषामाश्रमाणां पारिव्राज्यं तावत् ब्रह्मसंस्थतालक्षणं लभ्यतेव ॥"

## जाबालश्रुतिः प्रत्यक्षा

अनपेक्ष्यैव जाबालश्रुतिं आश्रमान्तरविधायिनीं अयं आचार्येण विचारः प्रवर्तितः । विद्यत एव आश्रमान्तरविधिश्रुतिः प्रत्यक्षा । "ब्रह्मचर्यं परिसमाप्य गृही भवेत्, गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा" (जा. ४) इति । न चेयं श्रुतिः अनधिकृतविषया शक्या वक्तुम् । अविशेषश्रवणात् । पृथग्विधानाच्च अनधिकृतानां "अथ पुनरेव व्रतीवा ऽव्रतीवा स्नातको वाऽस्नातको वा उत्सन्नाग्निरनग्निको वा" (जा. ४) इत्यादिना । ब्रह्मज्ञानपरिपाकाङ्गत्वाच्च पारिव्राज्यस्य नानधिकृतविषयत्वम् । तच्च दर्शयति—"अथ परिव्राट् विवर्णवासाः मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति" (जा. ५) इति । तस्मात् सिद्धा ऊर्ध्वरेतसाम् आश्रमाः । सिद्धं च ऊर्ध्वरेतस्सु विधानात् विद्यायाः स्वातन्त्र्यम् इति ।

## ४. बृहदारण्यकभाष्ये पारिव्राज्यमीमांसा

बृहदारण्यकभाष्ये विस्तरं वितत्य पारिव्राज्यविचारः प्रदर्शितः । स च प्रायशः सूत्रभाष्योक्तविचारसरणिमेव अनुसरतीत्यतः संक्षेपत एव भाष्याभिप्रायोऽत्र लिख्यते । "ननु व्युत्थाय भिक्षाचर्यं चरन्तीति" वर्तमानापदेशात्

अर्थवादोऽयं न विधायकः प्रत्ययः कश्चित् श्रूयते लिङ्लोट्तव्यानामन्यतमोऽपि। तस्मात् अर्थवादमात्रेण श्रुतिस्मृतिविहितानां यज्ञोपवीतादीनां साधनानां न शक्यते परित्यागः कारयितुम् (बृ. ३-५-१)। न। "यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः" इति श्रुतेः। [इयं श्रुतिः न भाष्यान्तरेषु क्वचिदप्युदाहृता उपलभ्यते]

ननु उपनिषदः आत्मज्ञानपरत्वात् व्युत्थानश्रुतिः तत्स्तुत्यर्था न विधिः। न। विधित्सितविज्ञानेन समानकर्तृकत्वश्रवणात्। न हि अकर्तव्येन कर्तव्यस्य समानकर्तृकत्वेन वेदे कदाचिदपि श्रवणं संभवति। कर्तव्यानामेव हि अभिषवहोमभक्षाणां यथाश्रवणं "अभिषुत्य हुत्वा भक्षयन्ति" (तै. सं. ६-२-११) इति। तद्वत् आत्मज्ञानैषणाव्युत्थानभिक्षाचर्याणां कर्तव्यानामेव समानकर्तृकत्वश्रवणं भवेत्।

अविद्याविषयत्वात् एषणात्वाच्च अर्थप्राप्तः आत्मज्ञानविधेरेव यज्ञोपवीतादिपरित्यागः, न तु विधातव्यः इति चेत्। न। सुतरां आत्मज्ञानविधिनैव विहितस्य समानकर्तृकत्वश्रवणेन दार्ढ्योपपत्तिः। तथा भिक्षाचर्यस्य च। (बृ. भा. ३-५-१)

अधस्तात् उदाहृतानि भाष्यवाक्यानि विद्वत्संन्यासविषयाणि। "एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" (बृ. ३-५-१) इति वाक्ये 'क्त्वा' प्रत्ययान्तस्य "विदित्वा" इति शब्दस्य अर्थविवरणावसरे ह्याचार्येण लिखितानि तानि। अथ विविदिषासंन्यासपरामर्शानां वाक्यमस्ति अत्रैवोपनिषदि "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति, एतद्ध स्म वै तत्पूर्वे विद्वाँसः प्रजां न कामयन्ते, किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" बृ. ४-४-२२ इति। तत्र इमानि भाष्यवाक्यानि परिशीलनमर्हन्ति।

"तस्मादात्मानं लोकमिच्छन्तः प्रव्रजन्त्येव सर्वक्रियाभ्यः निवर्तेरन्नेव इत्यर्थः। यथा च बाह्यलोकत्रयार्थिनः प्रतिनियतानि पुत्रादीनि साधनानि विहितानि, एवं आत्मलोकार्थिनः सर्वैषणानिवृत्तिः पारिव्राज्यं ब्रह्मविदः विधीयत एव। बृ. भा. ४-४-२२

तस्मात् आत्मानं लोकमिच्छन्तः प्रव्रजन्ति प्रव्रजेयुः इत्येष विधिः अर्थवादेन संगच्छते। न हि सार्थवादस्यास्य लोकस्तुत्याभिमुख्यम् उपपद्यते। प्रव्रजन्तीत्यस्य अर्थवादरूपो हि "एतद्ध स्म" इत्यादिरुत्तरो ग्रन्थः। अर्थवादश्चेत् न अर्थवादान्तरमपेक्षेत। अपेक्षते तु "एतद्धस्मे"त्यादि अर्थवादं प्रव्रजन्तीत्येतत्। बृ. भा. ४-४-२२

यस्मात् पूर्वे विद्वांसः प्रजादिभ्यो निवृत्ताः प्रव्रजितवन्त एव, तस्मात् अधुनातना अपि प्रव्रजन्ति प्रव्रजेयुः, इत्येवं संबध्यमानं न लोकस्तुत्यभिमुखं [illegible]गृहीत। विज्ञानसमानकर्तृकत्वोपदेशात् इत्यादिना अवोचाम। बृ. भा. ४-४-२२

वेदानुवचनसहपाठाच्च। यथा आत्मवेदनसाधनत्वेन विहितानां वेदानुवचनादीनां यज्ञादीनां न अर्थवादत्वं, तथा तैरेव सहपठितस्य पारिव्राज्यस्य आत्मलोकप्राप्तिसाधनत्वेन अर्थवादत्वमयुक्तम् ॥

फलविभागोपदेशाच्च। "एतमेवात्मानं लोकं विदित्वा" इत्यन्यस्मात् बाह्यलोकादात्मानं फलान्तरत्वेन प्रविभजति। यथा "पुत्रेणैवायं लोको जय्यो नान्येन कर्मणा कर्मणा पितृलोकः" इति। न च प्रव्रजन्तीत्येतत् प्रापयल्लोकस्तुतिपरत्वम्। प्रधानवच्चार्थवादापेक्षम् सकृत् श्रुतं स्यात्। तस्माद्भ्रान्तिरेवैषा लोकस्तुतिपरमिति। (४-४-२२)

न च अनुष्ठेयेन पारिव्राज्येन स्तुतिरुपपद्यते। यदि पारिव्राज्यं अनुष्ठेयमपि सत् अन्यस्तुत्यर्थं स्यात् दर्शपूर्णमासादीनामपि अनुष्ठेयानां स्तुत्यर्थता स्यात्। न च अन्यत्रकर्तव्यता एतस्माद्विषयान्निर्ज्ञाता यतः इह

स्तुत्यर्थो भवेत्। यदि पुनः क्वचिद्विधिः परिकल्प्यते पारिव्राज्यस्य स इहैव मुख्यो नान्यत्र संभवति। यदप्यनधिकृतविषये पारिव्राज्यं परिकल्प्यते तत्र वृक्षाद्यारोहणाद्यपि पारिव्राज्यवत्कल्प्येत। कर्तव्यत्वेन अनिर्ज्ञातत्वा-विशेषात्। तस्मात् स्तुतित्वगन्धोऽप्यत्र न शक्यः कल्पयितुम्॥ बृ.भा. ४-४-२२ यद्येवं किं स्यात्? सर्वकर्महेतूपमर्दकत्वादात्मज्ञानस्य विद्योद्भवे कर्मनिवृत्तिःस्यात्। दाराग्निसंबद्धानां तावदग्निहोत्रादिकर्मणां भेदबुद्धिवि-षयसंप्रदानकारकसाध्यत्वम्। अन्यबुद्धिपरिच्छेद्यां हि अग्न्यादिदेवतां संप्रदानकारकभूतामन्तरेण न हि तत्कर्म निर्वर्त्यते। यया हि संप्रदानकारक-बुद्ध्या संप्रदानकारकं कर्म साधनत्वेन उपदिश्यते सेह विद्यया निवर्त्यते। "अन्योऽसावन्योऽहमस्मीति न स वेद" (बृ. १-४-१०), "देवास्तं परादुर्योऽ-न्यत्रात्मनो देवान् वेद" (बृ. ४-५-१२), "मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति" ४-४-१०, "एकधैवानुद्रष्टव्यम्" ४-४-२०, "सर्वमात्मानं पश्यति" ४-४-२३ इत्यादिश्रुतिभ्यः। न च देशकालनिमित्ताद्यपेक्षत्वं व्यवस्थितात्म-वस्तुविषयत्वादात्मज्ञानस्य। क्रियायास्तु पुरुषतन्त्रत्वात् स्यात् देशकाल-निमित्ताद्यपेक्षत्वम्। ज्ञानं तु वस्तुतन्त्रत्वात् न देशकालनिमित्ताद्यपेक्षते। यथा अग्निरुष्णः आकाशोऽमूर्तः" इति—"तथा आत्मविज्ञानमपि" बृ. भा. ४-५-१५

तस्मान्न आत्मज्ञानसहभावित्वं कर्मणाम् इत्यतः सिद्धं आत्मज्ञानमेव अमृतत्वसाधनम् "एतावदरे खल्वमृतत्वमि"ति। कर्मनिरपेक्षत्वात् ज्ञानस्य। अतो विदुषः तावत् पारिव्राज्यं सिद्धम्। संप्रदानादिकर्मकारकजात्यादि-शून्याविक्रियब्रह्मात्मदृढप्रतिपत्तिमात्रेण वचनमन्तरेणापि उक्तन्यायतः॥ (बृ ४-५-१५)

[एवं प्रस्थानत्रयभाष्येषु सर्वत्रापि ज्ञानकर्मसहभावानुपपत्त्या विद्वत्संन्यासः साधितः। सूत्रभाष्येऽपि "उपमर्दं च" ब्र. सू. ३-४-१६ इति सूत्रे एतदेव उपमर्दकत्वं ज्ञानस्य। अत एव च स्वातन्त्र्यमित्युक्तम्।]

## ५. बृहदारण्यकवार्तिके पारमहंस्यविचारः

बृहदारण्यकवार्तिके पुनः—

**एतमेव तमात्मानं विदित्वोक्तेन वर्त्मना ।**
**व्युत्थाय ब्राह्मणा यत्नात् भिक्षाचर्यं चरन्ति हि ।**
**अधिकारिविशेषस्य ज्ञानाय ब्राह्मणग्रहः ।**
**न संन्यासविधिर्यस्मात् श्रुतौ क्षत्रियवैश्ययोः ॥** ३-५-७८, ७९

इति भाष्यवाक्यम् अनुव्याख्याय—

**त्रयाणामविशेषेण संन्यासः श्रूयते श्रुतौ ।**
**यदोपलक्षणार्थं स्यात् ब्राह्मणग्रहणं तदा ॥** बृ. वा ३-४-१०५

इति स्वमतमुपन्यस्तम् । विज्ञानं यस्यकस्यापि स्यात् स सर्वोऽपि संन्यासे अधिकारी एव भवितुमर्हतीति न्यायोऽपि वाक्यशेषेण उक्तः । तथा। शब्दज्ञानानन्तरमपि व्युत्थानं स्यादिति पक्षान्तरमपि गृहीतं तत्र । अथ भिक्षाचर्यं चरन्तीत्यत्र विधिरेवायमिति यत्प्रयासेन साधितं तत्रापि वार्तिककारः आह—

**सत्सु प्रत्यक्षविधिषु यथोक्तेष्टफलश्रमः ।**
**भिक्षाचर्यं चरन्तीति विध्यर्थः क्रियते महान्** ३-५-१६५

यथोक्तेषु श्रुतिषु इत्यत्र भाल्लविश्रुतिः "मुक्तेश्च बिभ्यतः" इत्यर्थतः पठिता । "पराञ्चि खानीति" काठकोपनिषद्वाक्यं "वेदान्तविज्ञानसुनिश्चितार्थाः" इति मुण्डकवाक्यं च परामृष्टानि, "मुण्डोऽपरिग्रहः" इति जाबालश्रुतिरपि ।

**तिष्ठासेदिति चात्रापि प्रत्यक्षः श्रूयते विधिः ।**
**तस्मिन्सति वृथा कस्मात् जनोऽयं परिखिद्यते ॥** ३-५-१६६

इति च विधिकल्पनायासं विफलमित्युक्तम् । तिष्ठासेत् इति वाक्यस्य अभिप्रायः यथावसरम् अत्र परिशीलयिष्यते । अत्रैव वाक्यशेषे "बाल्येन तिष्ठासेत्" इत्यादिवाक्येन स्पष्टविधिः श्रूयत एव । तस्मात् "चरन्तीति" विधिरेवेत्याग्रहायासो वृथा इत्याशयः । एतद्वाक्यस्य अभिप्रायो अग्रे विवरिष्यते । अस्य विधित्वाङ्गीकारस्तु सूत्रभाष्येऽपि (३-४-५०) दृश्यते ।

**व्युत्थायातो यथोक्ताभ्यः एषणाभ्यो निरेषणः ।**
**पाण्डित्यमथ निर्विद्य बाल्यं परिसमापयेत् ॥**

विधित्वप्रदर्शनार्थोऽयं श्लोकः । पाण्डित्यादीनां विवरणम् अग्रे भविता ।

**पारमहंस्यविषये चोद्यानि परिहाराश्च ।**

तदेवं संन्यासविधौ समुदाहृतेऽपि मीमांसकाः संन्यासश्रुतिं कर्मानधिकारिविषयमेवेत्याहुः । यथा श्लोकवार्तिककाराः

**तत्रैवं शक्यते वक्तुं येऽन्धपङ्ग्वादयो नराः ।**
**गृहस्थत्वं न शक्ष्यन्ति कर्तुं तेषामयं विधिः ॥**
**नैष्ठिकब्रह्मचर्यं वा परिव्राजकतापि वा (पारिव्राज्यमथापि वा)**
**तैरवश्यं ग्रहीतव्या तेनाभावे तदुच्यते ॥**

अत्र श्रुतिः—"अथ परिव्राड्विवर्णवासाः मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवतीति" (जा. ६) इति विविदिषोरपि संन्यासं स्फुटं विधत्ते "यदहरेव विरजेत्" इति विरागोत्पत्तिसमनन्तरमेव पारिव्राज्यं विदधती श्रुतिः अनधिकारिविषयेति सङ्कोचयितुं न शक्यते । तत्रैव "अथ पुनः अव्रती वा व्रती वा स्नातको वा अस्नातको वा उत्सन्नाग्निरनग्निको वा" इत्यनधिकृतानां पृथक्संन्यासं विदधती प्राग्विहितपारिव्राज्याधिकृत-विषयमेवेति गमयतीति स्पष्टम् । प्रत्याख्यातः एष पक्षः प्रागेव सूत्रभाष्य-गतपारिव्राज्यविचारे ।

यावज्जीवश्रुत्यादिवाक्यानाम् अन्यार्थासंभवात् क्रियावसान एव वेदार्थः। "तं यज्ञपात्रैर्दहन्ति" इति अन्त्यकर्मश्रवणात् जरामर्यश्रवणाच्च। लिङ्गाच्च "भस्मान्तं शरीरम्" (ई १७) इति। न हि पारिव्राज्यपक्षे भस्मान्तता शरीरस्य स्यात्। स्मृतिश्च—

**निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।**
**तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित्॥**

मनु. २-१६

इति। समन्त्रकं हि यत् कर्म वेदेन इह विधीयते तस्य श्मशानान्ततां दर्शयति स्मृतिः। अधिकाराभावप्रदर्शनाच्च अत्यन्तमेव श्रुत्यधिकाराभावोऽकर्मिणो गम्यते। अग्न्युद्वासनापवादाच्च 'वीरहा वा एष देवानां योऽग्निमुद्वासयते ( तै. सं १-५-२-१) इति। ननु व्युत्थानादिविधानात् वैकल्पिकं क्रियावसानत्वं वेदार्थस्य। न। अन्यार्थत्वात् व्युत्थानादिश्रुतीनाम्। 'यावज्जीवमग्निहोत्रं जुहोति' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इत्येवमादीनां श्रुतीनां जीवनमात्रनिमित्तत्वात् यदा न शक्यते अन्यार्थता कल्पयितुम्, तदा व्युत्थानादिवाक्यानां कर्मानधिकृतविषयत्वसंभवात्। "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" (ई-२) इति च मन्त्रवर्णात्। 'जरया वा ह्येवास्मान्मुच्यते मृत्युना वा' (शत. ब्रा-१२-४-१-१) इति च जरामृत्युभ्यामन्यत्र कर्मवियोगच्छिद्रासंभवात् कर्मणां श्मशानान्तत्वं न नैष्कर्म्यकम्।..... पारिव्राज्यक्रमविधानस्य अनवकाशत्वमिति चेत्। न। विरक्ताविरक्तविषययोर्यावज्जीवविध्यपवादत्वात्। यावज्जीवाग्निहोत्रविधेः विरक्ताविरक्तविषययोरपवादः। तत्र च क्रमप्रतिपत्तिसंभवः—"ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत्" (जा ४१) इति। विरोधानुपपत्तेः। न हि पूर्वोक्तपक्षे पारिव्राज्यक्रमविधानवाक्यस्य कश्चिद् विरोधः। क्रमप्रतिपत्तेः अन्यविषयपरिकल्पनायां तु यावज्जीवविधानश्रुतिः स्वविषयात् संकोचिता स्यात्। क्रमप्रतिपत्तेस्तु विश्वजित्सर्वमेधविषयत्वात् न कश्चिद् बाधः। (बृ. भा. ४-५-१५) इति पूर्वपक्षः।

अत्र सिद्धान्तः— न । आत्मज्ञानस्य अमृतत्वहेतुत्वाभ्युपगमात् । यत् तावत् "आत्मेत्येवोपासीत" (बृ १-४-७) इत्यारभ्य "स एष नेति नेति" (बृ ४-५-१५) इत्येतदन्तेन ग्रन्थेन उपसंहृतम् आत्मज्ञानम्, तत् अमृतत्वसाधनम् इति अभ्युपगतं भवता । तत्र एतावदेव अमृतत्वसाधनम् अन्यनिरपेक्षम् इत्येतन्न मृष्यते । तत्र भवन्तं पृच्छामि । किमर्थम् आत्मज्ञानं मर्षयति भवान् इति ? श्रृणु तत्र कारणम् । यथा स्वर्गकामस्य स्वर्गप्राप्त्युपायम् अजानतः अग्निहोत्रादिस्वर्गप्राप्तिसाधनं ज्ञापयति तथा इहापि अमृतत्वप्रतिपित्सोः अमृतत्वप्राप्त्युपायम् अजानतः "यदेव भगवान् वेद, तदेव मे ब्रूहि" (बृ ४-५-४) इत्येवम् आकाङ्क्षितम् अमृतत्वसाधनम् "एतावदरे" (बृ ४-५-१५) इत्येवमादौ वेदेन ज्ञाप्यत इति ।

वार्तिके च—

**श्रुत्या जाबालशाखायां तथा चानधिकारिणाम् ।**
**संन्यासस्य विधानाच्च कार्योऽतोऽसौ मुमुक्षुभिः ॥**
**मुक्तेश्च बिभ्यतो देवाः मोहेनापिदधुर्नरान् ।**
**ततस्ते कर्मसूद्युक्ताः प्रावर्तन्ताविचक्षणाः ॥**
**अतः संन्यस्य कर्माणि सर्वाण्यात्मावबोधतः ।**
**हत्वाविद्यां धियैवेयात् तद्विष्णोः परमं पदम् ॥**
**इति भाल्लविशाखायां श्रुतिवाक्यमधीयते ।**
**सर्वकर्मनिरासेन तस्मादात्मधियो जनिः ॥**

सं. वा. २१७, २१९, २२०

इति सर्वकर्मसंन्यास एव ज्ञानकारणमिति श्रुत्युदाहरणपूर्वकमुक्तम् । द्वितीयाध्यायभाष्यवार्तिकेऽपि एवमेव लिखितमस्ति ॥

**यज्ञोपवीतादित्यागोऽपि अशास्त्रीय इत्यपरे जगुः ।**

अनूदितं चैतद्बृहदारण्यकभाष्ये—"तस्मादर्थवादमात्रेण श्रुतिस्मृति-

विहितानां यज्ञोपवीतादीनां न शक्यते परित्यागः कारयितुम्। "वेदसंन्यसनाच्छूद्रः तस्माद्वेदं न संन्यसेत्" व. स्मृ २०-५, "स्वाध्याय एव उत्सृज्यमानो वाचं" आ. ध २-२१, "ब्रह्मोज्झं वेदनिन्दा च कौटसाक्ष्यं सुहृद्वधः। गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट्" इति वेदपरित्यागे दोषश्रवणात्। "उपासने गुरूणां वृद्धानाम् अतिथीनां होमे जप्ये कर्मणि भोजने आचमने स्वाध्याये च यज्ञोपवीती स्यात्" इति आ. ध १-१५-१। परिव्राजकधर्मेषु च "गुरूपासनस्वाध्यायभोजनाचमनादीनां कर्मणां श्रुतिस्मृतिषु कर्तव्यतया चोदितत्वात् गुर्वाद्युपासनाङ्गत्वेन यज्ञोपवीतस्य विहितत्वात् तत्परित्यागो नैवावगन्तुं शक्यते। यद्यपि एषणाभ्यो व्युत्थानं विधीयत एव तथापि पुत्राद्येषणाभ्यः तिसृभ्य एव व्युत्थानम् न तु सर्वस्मात्कर्मणः कर्मसाधनाच्च व्युत्थानम्। सर्वपरित्यागे च अश्रुतं कृतं स्यात् श्रुतं च यज्ञोपवीतादि हापितं स्यात्। तथा च महान् अपराधो विहिताकरणप्रतिषिध्दाचरणनिमित्तः कृतः स्यात्। तस्मात् यज्ञोपवीतादिलिङ्गपरित्यागः अन्धपरम्परैव।" बृ.भा. ३-५-१ इति पूर्वपक्षयित्वा सिद्धान्तः एवमुक्तः "न, 'यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः' (क. रु. २) इति श्रुतेः।" अत्र जाबालोपनिषद्वाक्यमपि उदाहर्तुं शक्यम्। "पृच्छामि त्वा याज्ञवल्क्य अयज्ञोपवीती कथं स्यात् ब्राह्मणः इति? स होवाच याज्ञवल्क्यः इदमेवास्य तद्यज्ञोपवीतं य आत्मा" जाबा. ५।

पारिव्राज्याश्रमे च यज्ञोपवीतादिसाधनानि विहितानि लिङ्गं च श्रुतिभिः स्मृतिभिश्च। अतः तद्वर्जयित्वा अन्यस्माद्व्युत्थानम् एषणात्वेऽपि इति चेत्। न। विज्ञानसमानकर्तृकात् पारिव्राज्यात् एषणाव्युत्थानलक्षणात् पारिव्राज्यान्तरोपपत्तेः। यदि तदेषणाभ्यो व्युत्थानलक्षणं पारिव्राज्यं तत् आत्मज्ञानाङ्गम्। आत्मज्ञानविरोध्येषणापरित्यागरूपत्वात्। अविद्याविषयत्वाच्चैषणायाः। तद्व्यतिरेकेण चास्ति आश्रमरूपं पारिव्राज्यं ब्रह्मलोकादिफलप्राप्तिसाधनम्। यद्विषयं यज्ञोपवीतादिसाधनविधानं लिङ्गविधानं च। न च एषणारूपसाधनोपादानस्य आश्रमधर्ममात्रेण पारिव्राज्यान्तरे विषये सम्भवति सति सर्वोपनिषद्विहितस्य आत्मज्ञानस्य बाधनं युक्तम्। यज्ञोप-

वीताद्यविद्याविषयैषणारूपसाधनोपादित्सायां चावश्यमसाधनफलरूपस्य अशनायादिसंसारधर्मवर्जितस्य "अहं ब्रह्मास्मि" इति विज्ञानं बाध्यते । न च तद्बाधनं युक्तम् । सर्वोपनिषदां तदर्थपरत्वात्" ।(बृ. ३-५-१) । **वार्तिकेऽपि** "एतमेव प्रवाजिनो लोकमिच्छन्तः" इति वाक्यव्याख्यानवासरे

**प्रव्राजिनोऽत्र गृह्यन्ते प्रसिद्धेर्यदि वा परे ।**
**त्रिदण्डिनः समाख्याता तेष्वेवातिप्रसिद्धितः ॥** ४-४-१०७४

इत्युक्तम् । अतः भाष्यकारमतेन वार्तिककृन्मतेन च त्रिदण्ड-संन्यासोऽपि स्मृतिविहितोऽस्तीत्यवगम्यते । **छान्दोग्यभाष्येऽपि** "ब्रह्मसंस्थो अमृतत्वमेति" इत्यस्य अर्थनिरूपणावसरे एवमुक्तम् । "अतश्च इदमेव एकं वेदोक्तं पारिव्राज्यं, न यज्ञोपवीतत्रिदण्डकमण्डल्वादिपरिग्रह इति । "मुण्डोऽपरिग्रहोऽसङ्गः" (जा. ५) इति च श्रुतिः । "अत्याश्रमिभ्यः परमं पवित्रं" (श्वे. ६.२१) इत्यादि च श्वेताश्वतरीये । "निस्तुतिर्निर्नमस्कारः" (मो. ध २४२-९). इत्यादि स्मृतिभ्यश्च । "तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः" (मो. ध. २४१-७), 'तस्मादलिङ्गो धर्मज्ञः' (अश्व. ४६-५१), 'अव्यक्तलिङ्गः (व. १०-१२), इत्यादि स्मृतिभ्यश्च" ॥ (छां. २-२३-१) । युक्तं च यतः प्रत्यक्षं जाबालश्रुतौ विहितमेव त्रिदण्डिनां तु पारमहंस्यस्वीकरणं उपलभ्यते । "त्रिदण्डं कमंडलुं शिक्यं पात्रं जलपात्रं शिखां यज्ञोपवीतं च इत्येतत्सर्वं भूःस्वाहेति अप्सु परित्यज्य आत्मानमन्विच्छेत्" (जा. ६) इति । केचित्तु—

**ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।**
**अनपाकृत्य मोक्षं तु सेव्यमानो व्रजत्यधः ॥** म. स्मृ. ६-३५

इति स्मृतिवचनमवलम्ब्य वदन्ति गार्हस्थ्यं वानप्रस्थाश्रमं च क्रमेण प्राप्यैव अनन्तरं परिव्राज्यं आश्रयितव्यमिति । तथा

**अधीत्य विधिवद्वेदान् पुत्रानुत्पाद्य धर्मतः ।**
**इष्ट्वा च शक्तितो यज्ञैः मनो मोक्षे निवेशयेत् ॥** म. स्मृ. ६-३६

इति स्मृतिमुदाहरन्ति । तदेतत् यद्यपि श्रुत्याप्यनुमोदितं मतं “ब्रह्मचर्यं परिसमाप्य गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्” इति तथापि तच्छेषेण तथैवोक्तम् “यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा” (जा. ४) इति विकल्पपक्षमुपाश्रित्य । एवं च “यदहरेव विरजेत् तदहरेव प्रव्रजेत्” इत्ययमेव विहितः पक्षः । अपि च बृहदारण्यके श्रूयते “अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति । सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानाँ श्रेष्ठस्तस्माद्विद्यां प्रशंसन्ति ॥” बृ. १-५-१६ इति । अत्र वार्तिककाराः

**त्रय एव यतो लोकाः साध्याः पुत्रादिसाधनैः ।**
**तन्मुमुक्षुरतो मुक्त्यै त्यजेत्सर्वैषणां यतिः ॥** बृ. वा. १-५-२२४

अत्र ‘त्रयो वाव लोका’ इत्यवधारणात् लोकत्रयरूपसाध्यतत्साधनलक्षणात्संसारात् मुमुक्षुः सर्वैषणात्यागं कुर्यादिति मुमुक्षूणां विविदिषासंन्यासः शास्त्रोदितो भवति इत्युक्तम् । अपि चात्रैव बृहदारण्यके संप्रत्तिकर्म निरूपितम् । “अथातः सम्प्रत्तिः यदा प्रैष्यन् मन्यते अथ पुत्रमाह त्वं ब्रह्म, त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति यद्वै किंचानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता । ये वै के च यज्ञास्तेषां सर्वेषां यज्ञ इत्येकता ये वै के च लोकास्तेषां सर्वेषां लोक इत्येकतैतावद्वा इदं सर्वमेतन्मा सर्वं सन्नयमितोऽभुनजदिति तस्मात् पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति स यदैवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति । स यद्यनेन किंचिदक्ष्णयाऽकृतं भवति तस्मादेनं सर्वस्मात् पुत्रो मुञ्चति तस्मात्पुत्रो नाम ॥” (बृ. १-५-१७) इति । अत्र पुत्रस्य अक्रियात्वात् केन द्वारेण लोकजयहेतुत्वम् इत्याशङ्कापरिहारायेयं कण्डिका आरब्धा । संप्रत्तिकर्मणा पित्रा अनुशिष्टः पुत्रः तत्कर्तव्यं परिपूरयन् तस्य लोकजयद्वारं भवतीति भावार्थः । अत्र ‘प्रैष्यन् मन्यते’ इति वाक्यस्य ‘मरिष्यामि’ इत्यरिष्टादिदर्शनेन मन्यते पिता इत्यर्थः भाष्ये लिखितः । वार्तिककारस्तु स्वयमेवं

व्याख्यामकरोत्—

**यथानपाकृतर्णस्य मोक्षेच्छा वार्यते तथा।**
**अनधीत्य द्विजो वेदानित्यादि वचनान्मनोः॥**
**इष्ट्वेति च तथा क्त्वान्तश्रवणात् पूर्वकालता।**
**नीत्वा समाप्तिं कर्माणि फलवन्त्यफलानि च॥**
**शुद्धधीः प्रव्रजेत्पश्चात् विरक्तः कर्मणां फलात्।**
**इत्यनुक्रमसंन्यासे संप्रत्तिरुपदिश्यते॥** बृ. वा. १-५-२६१, ६२, ६३

यो अनिरस्तर्णः सः कर्मानुष्ठानात् परं संन्यासं चिकीर्षुः संप्रत्तिकर्म कुर्यादिति 'प्रैष्यन्मन्यते' इत्यादि वाक्यस्य अर्थः इत्यभिप्रायः। अस्मिन्नेवार्थे श्रुत्यन्तरसंमतिमप्याह—

**योऽनुक्रमेणेति तथा श्रुतौ स्पष्टमिदं वचः।**
**अननुक्रमसंन्यासे न संप्रत्तिक्रियेष्यते।**
**पुत्रे सत्येव सा यस्मात् नास्त्यसौ ब्रह्मचारिणः।**
बृ. बा. १-५-२६४-२६५

अत्र टीका "क्रमसंन्यासाङ्गत्वेन सम्प्रत्तिरित्यत्र काठकश्रुतिं संवादयति "य" इति। [अत्र आनन्दगिरिटीका द्रष्टव्या]। यथा कर्मसंन्यासाङ्ग संप्रत्तिः तथा योऽनुक्रमेण संन्यस्यति संन्यस्तो भवति, कोऽयं संन्यासः? उच्यते, कथं संन्यस्तो भवति? इत्युपक्रम्य यः आत्मानं क्रियाभिः संन्यस्तं करोति इत्यादिना इतिकर्तव्यताजातमुक्त्वा सशिखान् केशान् निकृत्य विसृज्य यज्ञोपवीतं निष्क्रम्य इति संन्यासं विधाय पुत्रं दृष्ट्वा "त्वं ब्रह्म" इत्यादि अनुमन्त्रयीत इति स्पष्टमिदं संप्रत्तिवचो दृष्टं तदेषा स्यात् क्रमसंन्यासांगम् इत्यर्थः। [अत्र वार्तिकपरामृष्टकाठकश्रुतिः न कठरुद्रोपनिषत्, तत्र उदाहृत-वाक्याभावात्। अतः कुत्रत्यमिदं वाक्यं उदाहृतम्? इति अन्विष्य निर्णेयम् अध्यापकैः]

शाङ्खायनारण्यके तु श्रूयते "अथातः पिता पुत्रीयं" इत्युपक्रम्य चतुर्था-ध्यायान्ते" स यद्यगदः स्यात् पुत्रस्य ऐश्वर्ये पिता वसेत् परि वा व्रजेत् ययुः वै प्रेयात् तथैवैनं समापयेयुः यथा समर्पयितव्यो भवति यथा समर्पयितव्यो भवति" इति ॥ शां. आ ५ ॥ एतदनन्तरं प्रतर्दनो वै दैवोदासिः "इति पञ्चमा-ध्यायः । निर्णयसागरमुद्रितकौषीतकीब्राह्मणोपनिषदि च एवमेव द्वितीया-ध्यायान्ते । अपुत्रस्य संन्यासे क्रमस्तु—

**यद्यपुत्र इति वचः संभवे सति युक्तिमत् ।**
**निरस्तदारसंबन्धे न तु स्यात् ब्रह्मचारिणि ॥** बृ. वा. २६६

अत्रापि टीका "यद्यपुत्रो भवति आत्मानमेव सर्वं ध्यात्वा अनपेक्षमाणः प्राचीमुदीचीं वा दिशं प्रव्रजेत्" इत्यादिवाक्यं अपुत्रस्यापि गृहिणः संन्यास-संभवे घटते नान्यथा इत्यर्थः । नेदं अपुत्रगृहस्थविषयसंन्याससाधकं, किंतु ब्रह्मचारिसंन्याससाधकम् इत्याशङ्क्य आह "निरस्तेति"। यद्यपुत्र इति प्राप्तिपूर्वकत्वात् अप्राप्तनिषेधस्य अगतिकगतित्वात् ब्रह्मचारिणि अप्राप्तेः गृहस्थे च प्राप्ते न ब्रह्मचारिविषयमेतदित्यर्थः इति । जीवतो गृहस्थस्यैव संन्यासोऽस्तीत्यत्र श्रुत्यन्तरमप्युदाहृतं वार्तिके—

**कौषीतकीश्रुतौ तद्वत् गृहस्थस्यैव जीवतः ।**
**संन्यासः श्रूयते स्पष्टं पुत्रैश्वर्ये सुखं वसेत् ॥** बृ. वा. १-५-३०६

अत्र टीका, "ब्रह्मचारी वेदमधीत्य वेदौ वेदान् वा चरितब्रह्मचर्यो दारानाहृत्य पुत्रानुत्पाद्य अग्निमाधाय यथाशक्ति यज्ञैरिष्ट्वा तान् अनु-रूपाभिर्वृत्तिभिः संविभज्य तस्य संन्यासो गुरुभिरनुज्ञातस्य इत्युपक्रम्य "अत ऊर्ध्वं अनशनम् अपां प्रवेशनं, महाप्रस्थानं, वृद्धाश्रमं वा गच्छेत् पुत्रैश्वर्ये वा चरेत" इति कौषीतकी श्रुतावपि जीवतो गृहस्थस्यैव संन्यासो निःसन्दिग्धः श्रूयते इति ।

## ६. भगवद्गीतासु संन्यासविचारः

एवं तावत् सूत्रभाष्यं उपनिषद्भाष्यं बृहदारण्यकवार्तिकं च प्रमाणीकृत्य विचारः प्रतानितः । अथेदानीं भगवद्गीताः तद्भाष्यं च आश्रित्य चिन्त्यते । तत्र सर्वस्यापि गीताशास्त्रस्य प्रयोजनमेवं वर्णितं भाष्यकृद्भिः—"तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निश्रेयसं सहेतुकस्य संसारस्य अत्यन्तोपरमलक्षणम् । तच्च सर्वकर्मसंन्यासपूर्वकात् आत्मज्ञाननिष्ठारूपात् धर्मात् भवति" (गी. अव. भा) इति । तत्र सर्वकर्मसंन्यासस्तावत् शास्त्रान्ते भगवता सङ्ग्रहेणैवमुपदिष्टः—

**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥** गी. १८-६६

इति भगवच्छरणानां सर्वधर्मपरित्यागिनां गृहादिपरिग्रहो नास्तीति स्पष्टमुक्तम् भगवता ।

**अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।**
**सर्वारम्भपरित्यागी भक्तिमान् मे प्रियो नरः ॥**
**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।**
**शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥**
**समः शत्रौ च मित्रे च तथा मानापमानयोः ।**
**शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥**
**तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।**
**अनिकेतः स्थिरमतिः भक्तिमान् मे प्रियो नरः ॥**

१२-१६, १७, १८, १९

इति परमार्थसंन्यासिन एव नैष्कर्म्यसिद्धिः—

**असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।**
**नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥** १८-४९

इतरेषां वास्तविकः कर्मत्यागो नैव सिद्ध्यति। कर्मणामनारम्भात्, संन्यसनाद्वा न नैष्कर्म्यसिद्धिरित्याह—

**न कर्मणामनारम्भात् नैष्कर्म्यं पुरुषोऽश्नुते।**
**न च संन्यसनादेव सिद्धिं समधिगच्छति॥** ३-४

**न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।**
**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥** ३-५

परमार्थसंन्यासस्तु निष्क्रियात्मविज्ञानेन तत्रैव निष्ठा। गृहे स्थितिः भिक्षाचर्यादिकं वा नैव तस्य वास्तविकं व्यावर्तकं लक्षणमिति ब्रवीति।

**कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।**
**स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥** ४-१७

[अत्र कार्यकरणसंघातस्य कर्माकर्मणी, न मम इति विज्ञानमेव निष्क्रियात्मन्यवस्थानं परमार्थसंन्यासलक्षणमित्युक्तम्]

**त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।**
**कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः॥** ४-२०

**निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।**
**शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्॥** ४-२१

**ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम्।**
**ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना॥** ४-२४

अत्र गृहस्थः, संन्यासी वा ज्ञानी, वस्तुतो नैव किञ्चित् करोति, सर्वक्रियाकारकफलानिवर्तकस्वरूपब्रह्मात्मज्ञानविज्ञानित्वात् इत्युक्तम्। युक्तं च एतत् परमार्थतो हि निष्क्रियात्मदर्शनसंपन्नत्वात् व्यवहारदृष्ट्या किञ्चित् कुर्वन्निव लक्ष्यमाणोऽपि सर्वं ब्रह्मैव इति क्रियाकारकफलात्मकं दृश्यजातं

ब्रह्मैवेति पश्यति। सर्वकर्मसंन्यासी परमहंसस्तु व्यवहारदृष्ट्या शरीरस्थितिमात्रप्रयोजनं कर्म कुर्वन्नपि धर्माधर्मलक्षणं किल्बिषं न प्राप्नोति। न च तस्य कर्मत्यागनिमित्ता प्रत्यवायप्राप्तिः शङ्क्या। ब्रह्मैव हि परमार्थतो सर्वक्रियाकारकफलात्मना व्यवह्रियते। अतः ब्रह्मार्पणमित्यादिश्लोकः सुतरां तस्मिन्विषये समञ्जसः इति। अत एव भगवत्पादैः "श्रेयान् द्रव्यमयाद्यज्ञात्" इति श्लोकस्य अवतरणिकायाम् एवं लिखितम्, "ब्रह्मार्पणमित्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं सम्पादितम्। यज्ञाश्च अनेके उपदिष्टाः। तैः सिद्धपुरुषार्थप्रयोजनैः ज्ञानं स्तूयते" इति।

अत एव च अष्टादशाध्याये "सहजं कर्म कौन्तेय" इति श्लोके सर्वकर्मसंन्यासमधिकृत्य भगवत्पादैः विस्तीर्णमिदमुक्तम्। तेन च उपसंहारे 'कथं तर्हि आत्मनो अविक्रियत्वे अशेषतः कर्मणः त्यागो नोपपद्यते?' इति शङ्कामुद्भाव्य एवमुत्तरं लिखितम्। "यदि वस्तुभूता गुणाः यदि वा अविद्याकल्पिताः तद्धर्मः कर्म। तत् आत्मनि अविद्याध्यारोपितमेव इति अविद्वान् न हि कश्चित् क्षणमपि अशेषतस्त्यक्तुं शक्नोति" (३-५) इत्युक्तम्। विद्वांस्तु पुनः विद्यया अविद्यायां निवृत्तायां शक्नोत्येव अशेषतः कर्म परित्यक्तुम्, अविद्याध्यारोपितस्य शेषानुपपत्तेः। न हि तैमिरिकदृष्ट्या अध्यारोपितस्य द्विचन्द्रादेः तिमिरापगमे शेषः अवतिष्ठते। एवं च सति इदं वचनमुपपन्नं "सर्वकर्माणि मनसा" (५-१३) इत्यादि। "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः" (१८-४५), 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' (१८-४८) इति च॥

**गौणसंन्यासोऽपि गीतासु अनुज्ञातः** यथा मुमुक्षूणां उत्तमाधिकारिणां पारमहंस्यं विहितम्, परमार्थसंन्यासिनां सर्वकर्मसंन्यासेन निष्क्रियात्मन्येव अवस्थानं सुशकम्। एवं च गौणसंन्यासोऽपि गीतासु परामृश्य तत्र तत्र संस्तुतः। एवं मूढमन्दाधिकारिणः क्रमक्रमेण कर्मबन्धप्रमुक्ताः सर्वकर्मसंन्यासपदम् अधिरूढा भवेयुरिति। तद्यथा—

**काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।**
**सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥** गी. १८-२

अत्र काम्यकर्मत्यागः सर्वकर्मफलत्यागश्च मुमुक्षुभिः अवश्यं करणीय इति बोधनार्थं संन्यासत्वेन त्यागत्वेन इति संस्तूयते इति स्पष्टम् ।

**निश्चयं श‍ृणु मे तत्र त्यागे भरतसत्तम ।**
**त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥** १८-४

**यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत् ।**
**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥** १८-५

**एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।**
**कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥** १८-६

**नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।**
**मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥** १८-७

**दुःखमित्येव यत्कर्म कायक्लेशभयात् त्यजेत् ।**
**स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥** १८-८

**कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।**
**सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥** १८-९

अत्र नित्यकर्मणां सङ्गफलत्यागपूर्वकं करणं सात्त्विकत्यागत्वेन स्तुतम्, केवलत्यागश्च निन्दितः । वाक्यशेषाभिप्रायालोचनेन च अत्र गौणः संन्यासः परामृष्टः इत्यवसीयते ।

**संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।**
**तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥** ५-२

अत्र ज्ञानरहितस्यापि संन्यासेऽधिकारोऽस्ति परं तु तस्य दुष्करत्वात् कर्मयोगाश्रय एव श्रेयान् इति स्वकर्मणा ईश्वराभ्यर्चनपूर्वकं सङ्गं फलं च त्यक्त्वा कर्मयोगाश्रय एव श्रेयान् इत्युक्तम् ।

मुमुक्षूणां कर्मयोगः कर्मसंन्यासश्चेत्युभयं यद्यपि मोक्षकारणं तथापि ध्यानयोगद्वारा ज्ञानं प्रेप्सोः योगमारुरुक्षोः कर्मयोग एव श्रेयान् योगारूढस्य तु संन्यास एव युक्तः इति स्पष्टमुक्तं भगवता—

**आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।**
**योगारूढस्य तस्यैव शमः कारणमुच्यते ॥** ६-३

अत्र शम इति शमदमोपरत्यादिपूर्वकं कर्मसंन्यास एव उपलक्षितः, यथोक्तं भाष्ये—"शमः उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढत्वस्य साधनमुच्यत इत्यर्थः । यावद्यावत्कर्मभ्यः उपरमते तावत्तावन्निरायासस्य जितेन्द्रियस्य चित्तं समाधीयते । तथा सति झटिति योगारूढो भवति । तथा चोक्तं व्यासेन—

**नैतादृशं ब्राह्मणस्यास्ति वित्तं**
**यथैकता समता सत्यता च ।**
**शीलं स्थितिर्दण्डनिधानमार्जवं**
**ततस्ततश्चोपरमः क्रियाभ्यः इति ॥** म. मो. ध १७५-३७१
गी. भा ६-३

अत्र कर्मयोगोऽपि गौणः संन्यासो यद्यपि ध्यानयोगारोहण-पर्यन्तोऽस्ति तथापि योगारूढस्य सर्वकर्मसंन्यास एव कर्तव्य इत्युक्तम् ।

**बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।**
**शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥** १८-५१

**विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।**
**ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः** १८-५२

**अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।**
**विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते** १८-५३

अत्र गौणसंन्यासमूलं कर्तृत्वभावनाप्रयोजकम् अहंकारादिक्लेश-विमुक्तानामन्तसंन्यासिनो ब्रह्मभावसिद्धिरित्युक्तम् तदेवं—

**संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।**
**तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते** ५-२

अत्र कर्मसंन्यासः कर्मकरणं च इत्युभावपि मुमुक्षूणां तत्तदधिकारभूमि-सापेक्षया करणीयौ । 'यस्य सहसा कर्मसंन्यासेनैव मोक्षसाधनानुष्ठानेनैव समर्था स्यात् तस्य कर्मयोगानुष्ठानमेव श्रेयः इत्युक्तम् "निःश्रेयसकरावुभौ" इति मोक्षार्थत्वेन उभयोरपि विधानात् पर्याप्तवैराग्यहीनस्य तुरीयाश्रम-स्वीकारो न युक्तः इत्यभिप्रायेण कर्मयोगो विशिष्यते इति स्तूयते इति भाव्यते । अत एव "तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्य स्विद्धनम्" (ई-१) इति श्रुतिः कर्मसंन्यासमेव श्रेयस्करमाह ममेदं धनम् इत्यभिमानिन एव हि सम्भाव्यं कर्म स्यादिति । "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" (ई-२) इति ज्ञाननिष्ठां कर्तुम् अशक्नुवानस्य कर्मैव कर्तव्यमित्याह । तदिदं "कर्मयोगो विशिष्यते" इति इहाप्युच्यते इति श्लिष्यते । यदापि प्रकरण-वशात् ज्ञानिन एवेदं कर्मानुष्ठानमुक्तं श्रुत्या इति मन्येत तदापि विद्यास्तुतये पठ्यते इति व्याख्येया श्रुतिः । तथा हि बादरायणीयं सूत्रं "स्तुतये अनुमतिर्वा" इति, भाष्यं च "यावज्जीवं कुर्वत्यपि विदुषि पुरुषे न कर्म लेपाय भवति विद्यासामर्थ्यादिति तदेवं विद्या स्तूयते इति । तदेतत् गीतास्वपि अनुज्ञातमिव" (सू. ३-४-१४)

**कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः ॥** गी. ४-२०

**यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते।**
**हत्वापि स इमाँल्लोकान् न हन्ति न निबध्यते ॥** गी. १८-१७

इति। अत एव विद्वत्संन्यास एव परमार्थसंन्यासः परमार्थयोगश्च इत्युक्तं गीताभाष्ये। "यत्सांख्यैः प्राप्यते स्थानं" इति श्लोकव्याख्यानावसरे "एवं तर्हि योगात् संन्यास एव विशिष्यते कथं तर्हि इदमुक्तं "तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते" इति? श्रृणु तत्र कारणं, त्वया पृष्टं केवलं कर्मसंन्यासं कर्मयोगं च अभिप्रेत्य तयोः अन्यतरः कः श्रेयान् इति तदनुरूपं प्रतिवचनं मयोक्तं कर्मसंन्यासात् कर्मयोगो विशिष्यते इति ज्ञानम् अनपेक्ष्य, ज्ञानापेक्षस्तु संन्यासः सांख्यमिति मया अभिप्रेतः। परमार्थयोगश्च स एव। यस्तु कर्मयोगो वैदिकः स च तादर्थ्यात् योगः संन्यास इति च उपचर्यते।" (गी. भा. ५-५)

गीतास्वपि विरक्तानां ध्यानयोगाद्यनुष्ठानार्थं संन्यासः उक्त एव। विदुषामपि पारमहंस्यमुक्तम्। गृहस्थेषु ज्ञानिष्वपि परमार्थसंन्यासोऽस्ति। यद्यपि क्वचित् लोकसङ्ग्रहार्थं कर्मानुष्ठानम् अभ्युपगम्यते गौणसंन्यासश्च तत्र अज्ञविषये अभ्यनुज्ञातः कर्मयोगादिस्तुतये इत्यन्यदेतत्।

॥ इति श्री बोधानन्देन्द्रसरस्वतीशिष्येण सच्चिदानन्देन्द्रसरस्वतीभिक्षुणा प्रणीतायां पारमहंस्यमीमांसायां पारमहंस्यस्य **शास्त्रविहितत्वविचाराख्यो** नाम प्रथमोऽध्यायः ॥

# अथ द्वितीयः अध्यायः

## परमहंसस्य दीक्षाविचारः

### १. उत्तरग्रन्थस्य सम्बन्धः

जाबालोपनिषदि पारमहंस्याश्रमविधानम् एवम् आम्नायते, "तद्धैके प्राजापत्यामेवेष्टिं कुर्वन्ति, तदु तथा न कुर्यात्, आग्नेयीमेव कुर्यात् ...." इत्यादि । तत्र प्रयोगः सविस्तरः शिष्टाचारात् अधिगन्तव्यः । अत्र तु संन्यासिनाम् आचाराह्निकादिकमेव अधिकृत्य किंचित् विचार्यते । यतः अत्र विप्रतिपत्तिः आचारभेदश्च बहुधा दरीदृश्यते । तत्र विद्वदविद्वत्संन्यासिभेदेन विविदिषा प्रैषोक्त्यभयप्रदानानन्तरं यथाधिकारं यथाविधि दण्डादिग्रहणं कर्तव्यम् इत्येके वदन्ति । "दोरकं कौपीनं बहिर्वासः कन्थां दण्डं च क्रमेण गृहीत्वा प्रणवेन आददीत" इति । "भिक्षुः भिक्षुधर्ममुपसंगृह्य भिक्षुगुणसंपन्नं आचार्यम् उपसंगम्य तत्सन्निधौ दीक्षां परिगृह्य" इति गालववचनेन दीक्षाग्रहणमपि उपदिशन्ति । ततो गुरुमुखात् प्रणवोपदेशं, प्रणवार्थोपदेशानन्तरं महावाक्योपदेशं च दिशन्ति । तत्र दण्डधारणं कृताकृतम् इत्येके । विविदिषुणा नियतम् इत्यपरे । एवं प्रणवोपदेशादिविषये श्रवणमनननिदिध्यासनादिस्वरूपव्यापारफलविषयेऽपि बहुधा विप्रतिपत्तिः दृश्यते । तस्मात् श्रुतिस्मृतिपुराणादिवचनानां सूत्रभाष्यवार्तिकादिवाक्यानां च एकवाक्यतानिरूपणेन किंचित् विमृश्यते ।

### २. परमहंसधर्मविषये भाष्यवाक्यानि

तत्र भाष्यकारानुमोदितप्रामाण्यायां जाबालोपनिषदि तावत्— "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति विरक्तस्य पारिव्राज्यं विधीयते । तत्र च "अथ परिव्राड् विवर्णवासाः मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति" इति मौण्ड्यादिबाह्यचिह्नधारणं श्रुतमस्ति, न तु

दण्डकमण्डल्वादानम् । न च भाष्येषु कुत्रचिदपि दण्डधारणं परामृष्टमस्ति, किं तु **अपरिग्रह एव परिव्राड्धर्मत्वेन अवधारितः** । तथा हि छान्दोग्य-भाष्यम् "अतश्च इदमेवैकं वेदोक्तं पारिव्राज्यं न यज्ञोपवीतत्रिदण्डकमण्डल्वादिपरिग्रहः । 'मुण्डो अपरिग्रहोऽसङ्गः' (जा ५) इति च श्रुतिः" (छां २-२३-१) इत्यादि । न चैवं शङ्क्यं विद्वत्संन्यासिपरमेवेदं वाक्यम् "तस्मात् वेदान्तप्रमाणजनितैकत्वप्रत्ययवत एव कर्मनिवृत्तिलक्षणं पारिव्राज्यं ब्रह्मसंस्थत्वं च इति वाक्यशेषात्" इति । सूत्रभाष्ये ब्रह्मसंस्थशब्दार्थविचारणावसरे एवं स्पष्टं लिखितत्वात् । "ब्रह्मसंस्थ इति ब्रह्मणि परिसमाप्तिरनन्यव्यापारतारूपं तन्निष्ठत्वम् अभिधीयते । तच्च त्रयाणाम् आश्रमाणां न सम्भवति । स्वाश्रमविहितकर्माननुष्ठाने प्रत्यवायश्रवणात् । परिव्राजकस्य तु सर्वकर्मसंन्यासात् प्रत्यवायो न सम्भवति अननुष्ठाननिमित्तः । शमादिस्तु तदीयो धर्मो ब्रह्मसंस्थतायाः उपोद्बलको न विरोधी । ब्रह्मनिष्ठत्वमेव हि तस्य शमदमादिभिः उपबृहितं स्वाश्रमविहितं कर्म । यज्ञादीनि च इतरेषां, तद्व्यतिक्रमे च तस्य प्रत्यवायः" (सू. भा ३-४-२०) । अत्र ब्रह्मनिष्ठत्वव्यतिक्रमे प्रत्यवायः इत्युक्तेः, तत्र विविदिषासंन्यास्येव गृह्यते इत्यवश्यमभ्युपगन्तव्यम् । न हि नित्यसिद्धब्रह्मभावमेव प्राप्तस्य, प्रत्यवायप्राप्त्याशङ्का स्वप्नेऽपि जायेतेति ।

गीताभाष्यवचनादपि दण्डादिपरिग्रहाभावमेव परिव्राजकस्य अवगम्यते । तथाहि "तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते" इति श्लोकतात्पर्यावधारणार्थं प्रस्तापितविचारोपसंहारे प्राह भाष्यकृत् "तस्मात् अनात्मवित्कर्तृकयोरेव संन्यासकर्मयोगयोः निःश्रेयसकरत्ववचनं तदीयाच्च कर्मसंन्यासात् पूर्वोक्तात्मवित्कर्तृकसर्वकर्मसंन्यासविलक्षणात् सत्येव कर्तृत्वविज्ञाने कर्मैकदेशविषयात् यमनियमादिसहितत्वेन च दुरनुष्ठेयत्वात् सुकरत्वेन च कर्मयोगस्य विशिष्टत्वाभिधानम् इत्येवं प्रतिवचनवाक्यार्थनिरूपणेनापि पूर्वोक्तः प्रष्टुरभिप्रायः निश्चीयते इति स्थितम् ।" (गी. भा. ५ अवतरणिकायाम्) । अत्र अज्ञसंन्यासिन एव यमनियमादियोगविधानम् इति स्पष्टम् । तत्र च नास्त्येव दण्डादिपरामर्शः । एवं अविद्वत्संन्यासिनमेव

उद्दिश्य विहिते ध्यानयोगे प्रकृते "प्रशान्तात्मा विगतभीः" इति श्लोकव्याख्यानावसरे प्राह भाष्यकृत् "प्रशान्तात्मा—प्रकर्षेण शान्तः आत्मा अन्तःकरणं यस्य सोऽयं प्रशान्तात्मा, विगतभीः, विगतभयः, ब्रह्मचारिव्रते स्थितः, ब्रह्मचारिणः व्रतं ब्रह्मचारिव्रतं ब्रह्मचर्यं गुरुशुश्रूषाभिक्षान्नभुक्त्यादि तस्मिन् स्थितः तदनुष्ठाता भवेदिति वाक्यार्थः" (गी. भा. ६-१४) इत्यादि। अत्रापि भैक्ष्यभुक्त्यादिधर्मोपदेशे सत्यपि दण्डाद्याराधननियमो नोल्लिखितः। तस्मात् ब्रह्मसंस्थत्वं प्रणवसेवनं यमनियमादिब्रह्मचर्यव्रतं च मुक्त्वा दण्डधारणादिनियमं न क्वचिदपि भाष्ये विविदिषासंन्यासिने विहितत्वेन प्रामाण्यं दृश्यते इति सिद्धम्।

## ३. तुरीयाश्रमविषयाणि स्मृतिवाक्यानि

अथ स्मृतिषु प्रकृतविषये किमुपलभ्यते इति निरूपणीयम्, यद्यपि अल्पेन आरुणिकोपनिषत्, परमहंसोपनिषत्, नारदपरिव्राजकोपनिषत् इत्याद्यासु उपनिषत्सु यत्र तुरीयाश्रमपरामर्शो दृश्यते। तत्र दण्डविषयेऽपि परामर्शो अल्पेन, तद्यथा।

**आरुण्योपनिषद्** "[illegible] य एवं वेद संन्यस्तं मया संन्यस्तं मयेति त्रिःकृत्वा अभयं सर्वभूतेभ्यो मत्तः सर्वं प्रवर्तते सखा मा गोपायौजः सखा योऽसीन्द्रस्य वज्रोऽसि वार्त्रघ्नः शर्म मे भव यत्पापं तन्निवारयेति अनेन मन्त्रेण कृतं वैणवं दण्डं कौपीनं परिग्रहेत्, औषधवत् अशनमाचरेत् औषधवत् अशनं प्राश्नीयात् यथालाभमश्नीयात्। ब्रह्मचर्यं अहिंसां च अपरिग्रहं च सत्यं च यत्नेन हे रक्षत हे रक्षत" इति।

"[illegible] स्वपुत्रमित्रकलत्रबन्ध्वादीन् शिखां यज्ञोपवीतं यागं सत्रं स्वाध्यायं च सर्वकर्माणि संन्यस्य अयं ब्रह्माण्डं च हित्वा कौपीनं दण्डम् आच्छादनं च स्वशरीरोपभोगार्थाय लोकस्योपकारार्थाय च परिग्रहेत्। तच्च न मुख्योऽस्ति, कोऽयं मुख्यः इति ? च यदयं मुख्यः। न दण्डं, न कमण्डलुं,

न शिखां, न यज्ञोपवीतं, न चाच्छादनं चरति परमहंसः" इति **परमहंसोपनिषत्।**

यदा तु विदितं तत्त्वं परं ब्रह्मसनातनम्। तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत्। **नारदपरिव्राजके,** (७) इत्येवम्, तथापि न ता उपनिषदः श्रीगौडपादशङ्करभगवत्पादसुरेश्वराचार्यादिसाम्प्रदायिकाचार्यैः क्वचिदपि परामृष्टाः। व्याख्यानप्रस्थानीयैरेव तु शङ्करानन्दादिभिः क्वचिदुदाहृताः। तेष्वपि तत्तात्पर्यविषये अस्त्येव बहुधा विप्रतिपत्तिः। न च प्रस्थानान्तरानु-सारिभाष्यकारैः ताः प्रमाणीक्रियन्ते। क्वचिच्च कल्पिता एव अद्वैताभिनिविष्टैः इत्यपि वदन्ति वावदूकाः प्रस्थानान्तरीयाः वज्रसूचिकोप-निषदं निदर्शयन्तः।

अतः इदानीं तादृशोपनिषन्निरूपणमुपेक्ष्य सर्वसंप्रतिपन्नाःस्मृतयः काश्चित् उदाह्रियन्ते। तत्र स्मृतिसमुच्चयात् केचिदध्यायाः परिशिष्टे उद्धृता भविष्यन्ति। इह तु कानिचित् स्मृतिवाक्यान्येव समुदाह्रियन्ते दण्डधारण-परामर्शकानि।

**वसिष्ठस्मृतिः—**

"परिव्राजकः सर्वभूताभयदक्षिणां दत्त्वा प्रतिष्ठेत" इत्यारभ्य मध्ये मुण्डो अकामो अपरिग्रहः सप्तागाराणि असङ्कल्पितानि चरेत्। भैक्ष्यं विधूमे सन्नमुसले ... इत्यादि। अव्यक्तलिङ्गो अव्यक्ताचारः अनुन्मत्तः उन्मत्तवेषः इति दशमे अध्याये अव्यक्तलिङ्गत्वं विहितम्।

**दक्षस्मृतिः—**

**१. मेखलाजिनदण्डैश्च ब्रह्मचारीति लक्ष्यते।**
**गृहस्थो यष्टिवेदाख्यैः नखलोमैर्वनाश्रमी॥**

**२. त्रिदण्डेन यतिश्चैवं लक्षणानि पृथक् पृथक्।**
**यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती न चाश्रमी॥**

३. तस्मात् त्यक्तकषायेण कर्तव्यं दण्डधारणम् ॥
इतरस्तु न शक्नोति विषयैरभिभूयते ॥ ७-२७

४. वैणवेन त्रिदण्डेन न त्रिदण्डीति कथ्यते ।
अध्यात्मदण्डयुक्तो यः स त्रिदण्डीति कथ्यते ॥ ७-२१

लघुविष्णुस्मृतिः—

१. आचार्येण समादिष्टं लिङ्गं यत्नात्समाचरेत् । (श्रयेत्)
शौचमाश्रमसम्बद्धं यतिधर्मांश्च शिक्षयेत् ॥ ४-३

२. चतुर्विधा भिक्षुकाः स्युः कुटीचकबहूदकौ ।
हंसः परमहंसश्च पश्चाद्यो यः स उत्तमः ॥ ४-१०

३. एकदण्डी भवेद्वापि त्रिदण्डो चापि वा भवेत् ।
त्यक्त्वा सर्वसुखास्वादं पुत्रैश्वर्यसुखं त्यजेत् ॥ ४-१२

४. त्रिदण्डं कुण्डिकां चैव सूत्रं चाथो कपालिकाम् ।
जन्तूनां वारणं वस्त्रं सर्वं भिक्षुरिदं त्यजेत् ॥ ४-२४

५. कौपीनाच्छादनार्थं च वासोऽर्धस्य परिग्रहम् ।
कुर्यात्परमहंसस्तु दण्डमेकं च धारयेत् ॥ ४-२५

६. आत्मन्येवात्मना बुद्ध्या परित्यक्तशुभाशुभः ।
अव्यक्तलिङ्गोऽव्यक्तश्च चरेद्भिक्षुः समाहितः ॥ ४-२६

७. त्यक्त्वा यज्ञांश्च वेदांश्च विषयानिन्द्रियाणि च ।
आत्मन्येव स्थितो यस्तु प्राप्नोति परमं पदम् ॥ ४-३५

**शंखस्मृतिः—**

**१. मृन्मयालाबुपात्राणि यतीनां च विनिर्दिशेत्।**
**तेषां संमार्जनाच्छुद्धिः अद्भिश्चैव प्रकीर्तितः ॥** ७-४-५

**२. कौपीनाच्छादनं वासो बिभृयादव्यथश्चरन्।**
**शून्यागारनिकेतः स्यात् यत्र सायंगृहो मुनिः ॥** ७-४-६

**बोधायनधर्मसूत्रं—गोविन्दस्वामिकृतव्याख्यासहितम्।**

१. अरण्यं गत्वा ..... शिखामुण्डः (बो. सू-२०)। व्याख्याने-शिखाव्यतिरिक्तं मुण्डनं यस्येति विग्रहः।

२. काषायवासाः (सू २३-४) ऐकाश्रम्यन्त्वाचार्याः, अप्रजननत्वादितरेषां, तत्रोदहरन्ति, प्राह्लादिर्ह वै कपिलो नाम असुरो आस स एनान् बोधांश्चकार देवैः सह स्पर्धमानः तान्मनीषी नाद्रियेत। (बो. ३)।

बोधायनधर्मसूत्रे द्वितीयप्रश्ने दशमोऽध्यायः।

सप्तत्या ऊर्ध्वं संन्यासम् उपदिशंति, अस्य व्याख्या—प्रायशः सप्तत्या ऊर्ध्वम् एव भार्यानिवृत्तिः, गार्हस्थ्यधर्मानुष्ठानासामर्थ्यं वा भवतीति। केशश्मश्रुलोमनखानि वापयित्वा उपकल्प्यते।

३. "यष्टयः शिख्यं कमण्डलुपात्रं जलपवित्रमिति", अस्य व्याख्या तत्र विकल्पः—अलाबुदारुपात्रं मृण्मयं वैणवं तथेति इति शब्दः पादुकाद्युपलक्षणार्थः

४. सखा मे गोपायेति दण्डमादत्ते "यदस्य पारे" इति शिक्यं गृण्हाति 'येन देवाः पवित्रेणेति' जलपात्रं गृण्हाति। 'येन देवा ज्योतिषोर्ध्वा' इति कमण्डलुं गृण्हाति सप्तव्याहृतिभिः पात्रं गृण्हाति एकदण्डी त्रिदण्डी वा।

## ४. स्मृतीनामैकवाक्यम्

यथोदाहृतस्मृतिभिरिदमवगम्यते यत्स्मृतिषु प्रायशः पारमहंस्यं न विहितं, यत्र यत्र संन्यासो विहितः दृश्यते तत्र तत्र एकदण्डी त्रिदण्डी वेति विकल्प एव उपलभ्यते। तेन परमहंस एव विवक्षितः इत्यध्यवसातुं न शक्यते। यत्रापि परमहंसशब्दग्रहणपूर्वकं दण्डग्रहणं स्मर्यते तत्र अदृष्टार्थत्वं न शक्यते अवगन्तुम्। दण्डधारणनियमवादिभिरपि प्रमाणत्वेन आदृतायामपि परमहंसोपनिषदि तदन्यत्र वा कुत्रापि तत्प्रतिबद्धफलादर्शनात्। "असौ स्वपुत्रमित्रकलत्रबन्ध्वादीन् शिखायज्ञोपवीते स्वाध्यायं च सर्वकर्माणि संन्यस्य अयं ब्रह्माण्डं च हित्वा कौपीनं दण्डमाच्छादनं च स्वशरीरोपभोगार्थाय लोकस्य उपकारार्थाय परिग्रहेत्" इति स्वशरीरोपभोगार्थमेव विधानदर्शनात् दण्डेन हि गोसर्पाद्युपद्रवपरिहारमात्रम्, आच्छादनेन शीतादिपरिहारः इत्येवं दृष्टोपकारकत्वमेव हि गम्यते न अदृष्टार्थता। वाक्यशेषेण च "तच्च न मुख्योऽस्ति कोऽयं मुख्यः इति चेत् अयं मुख्यः न दण्डं, न शिखां न यज्ञोपवीतं, नाच्छादनं चरति परमहंसः" इत्यादिना शिखायज्ञोपवीताभ्यां सहैव दण्डाच्छादनयोरपि दृष्टार्थयोः त्यागोपदेशात्। यच्चात्र कल्पयन्ति स एव दण्डादित्यागः विद्वत्संन्यासिन एव, न तु विविदिषोरिति, विद्वदविद्वत्संन्यासयोः एषणात्यागविषयविवेककरणे प्रमाणाभावात् "ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" इति सममेव हि एषणात्यागः विद्वद्भिरविदुषामपि विरक्तानाम्। समानमेव चाम्नानं त्यागस्य दृष्टादृष्टार्थानां एषणानां न दण्डं, न शिखां न यज्ञोपवीतं नाच्छादनम् इत्यविशेषेण समभिव्याहारात्। शरीरोपभोगश्च एषणात्मक एवेति तत्त्यागेन सम्पन्नं साधनं भवेत् त्यागरूपमिति तस्मान्न दण्डविधानं नियतमिति गम्यते। 'तच्च न मुख्योऽस्तीति' च वचनात्। अपि च विप्रतिपत्तिरप्यस्ति प्रकृतोपनिषद्वाक्यस्य कृत्स्नस्यापि विद्वद्विषयत्वे। यस्मात् केचिद्व्याख्यातारो व्याचक्षते, तच्च तत्कौपीनाच्छादनदण्डादिस्वीकरणम् अविदुषः चशब्दात् आदौ स्वीकृत्य पश्चादुत्पन्ने ज्ञाने परित्यजनं न मुख्योऽस्ति

मुख्यःसंवर्तकाद्यनुष्ठितः संन्यासः। आत्मैक्यज्ञानात् स्वयंसञ्जात कौपीनाद्यपरिग्रहरूपो भवतीति अभ्युपगम्य एवमुच्यते न तु विद्वद्विविदिषु-संन्यासभेदेन संन्यासद्वैविध्यमस्ति। एषणात्यागमात्रं हि पारमहंस्यं समान-मुभयेषाम् इत्यवोचाम। विदुषः स्वयमेव ज्ञानबलात् एषणादिसर्वद्वैतबाधः। अविदुषस्तु विरक्तस्य प्रयत्नात् एषणात्यागः—इत्येतावांस्तु विशेष इत्यन्यदेतत्

## ५. पुराणवाक्यविचारः

अत्र केचिदाहुः—"ताम् अष्टादशधा दृष्ट्वा शङ्करः सूतसंहिताम्। चक्रे शारीरकं भाष्यं सर्वश्रुतिमनोहरम्" ॥ इति वचनात् सर्वज्ञेन भगवता भाष्य-कारेणापि सूतसंहितादिपुराणवाक्येभ्यः श्रुतितात्पर्यं निर्णीयैव भाष्यं कृतमिति स्मृतिपुराणवाक्यान्यपि अवश्यं श्रुत्यर्थनिर्णये समाश्रयणीयानि। तत्र पुराणेषु दण्डग्रहणं विहितमुपलभ्यते इति न तन्निराकरणं न्याय्यम् इति। तत्र ब्रूमः—भाष्यकारः सूतसंहितामधीत्य तदनुसारेण भाष्यं चक्रे इति तावत् वार्तमेतत्। न हि सकृदपि सूतसंहितावाक्यं क्वचिदुदाहृतं उपलभ्यते भाष्ये प्रस्थानत्रयव्याख्याने। उपनिषदां भाष्यव्याख्यानशैलीतः सूतसंहिता-व्याख्यानशैली क्वचित् क्वचित् भिद्यते इत्येतदपि सूक्ष्मेक्षिकया विज्ञाये-तैव। अस्तु वा एतत् यथातथा। किमिदं पुराणवचनं यद्दण्डधारणं निर्णयति परमहंसस्य इति प्रष्टव्यो भवान्। यत्तावद्दण्डलक्षणं यतिधर्मसङ्ग्रहे "धारयेद्वैणवं दण्डं न स्थूलं न कृशं तथा" इत्याद्यत्रिस्मृतितः "दण्डं तु वैणवं सौम्यं सत्वचं समपर्वकम्" इत्यादि भविष्यत्पुराणतश्च तद्द्वयमपि दण्ड-ग्रहणस्य नियतत्वं न प्रापयति। "एकदण्डी भवेद्वापि त्रिदण्डी वाथवा भवेत्" "एकदण्डधरा मुण्डाः" इत्यादीनि वचनानि दण्डधारणं ब्रुवन्ति न तु नियमेन धारणम् इत्यवोचाम। तस्मात् दृष्टोपकारकतया दण्डोऽभ्यनुज्ञायते इति गम्यते। न च धारयेदिति वचनात् विधिरेव इति शक्यं कल्पयितुम्। यदि धारयेत् तदा ईदृशं दण्डं धारयेदिति हि अक्षरसामञ्जस्यं प्रतीयते। इतश्चैवं यतः—

**कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीम्।**
**पादुके चापि गृण्हीयात् कुर्यान्नान्यस्य संग्रहम्॥**
**यदि वा कुरुते रागात् अधिकस्य परिग्रहम्।**
**नरकं रौरवं गत्वा तिर्यग्योनिषु जायते।**
**कौपीनयुगलं कन्थां दण्ड एकपरिग्रहः।**
**यतेः परमहंसस्य नाधिकं तु विधीयते॥** इति हि वचनम्।

"कंथां शीतनिवारिणीमिति" विशेषणेन दृष्टोपकारकत्वमेव आह। न तु विहितत्वं, 'कुर्यान्नान्यस्य संग्रहमिति' परिग्रहाधिक्यं निषेधति च। 'नाधिकं तु विधीयते' इत्यनेनापि यदि गृण्हीयात् तर्हि एतावदेव ग्राह्यं नाधिकमिति अक्षराञ्जस्यं प्रतीयते इति। यत्पुनर्जमदग्निवचनं वारं वारम् उदाह्रियते दण्डनियमवादिभिः "दण्डात्मनोस्तु संयोगः सर्वदैव विधीयते। न दण्डेन विना गच्छेत् इषुक्षेपत्रयं बुधः॥" इति न तदपि स्थितं न्याय्यं बाधितुमुत्सहते। न हि यथोक्तनित्यदण्डस्य दृष्टोपकारत्वे सम्भवति सति असति च अदृष्टफलश्रवणे सर्वदैव विधीयते इति विधिरवमात्रेण तस्य अनिवार्यत्वं प्रापयेत्। एतेन यदपि वदन्ति द्वैविध्यसद्भावात् संन्यासस्य क्वचिद् दण्डादिनिवारणं विद्वत्परमहंसविषयं, विविदिषोस्तु श्रवणमननादि-कर्तव्यसद्भावात् तदुपकारित्वेन दण्डधारणादिनियमः उपपद्यते इति तदपि अनुपपन्नम् इत्युक्तं भवति। न हि विदुषः पारिव्राज्ये दण्डधारणं कर्तव्यतया विधीयेत। अविधिकिङ्करत्वात् तस्य। न च यस्य लोकोपचिकीर्षा तस्य अमुख्यदण्डादिपरिग्रहविधिः, यस्य तु सा नास्ति तस्य सर्वत्यागपूर्वकं मुख्य-संन्यासः इति केषांचित् व्यवस्थितविकल्पाभ्यूहः साधुः। न हि संन्यासिनां दण्डादिलिङ्गधारणेन लोकोपकारः कर्तव्यः इति नियन्तुं शक्यं केनचिदपि वचनेन। तस्मात् यथैव स्वशरीरोपभोगः तथा लोकोपकारोऽपि भवेत् लिङ्ग-धारणेन इत्येव कल्पनं न्याय्यम्। न हि अनुन्मत्ताः उन्मत्तवत् आचरन्ति मुख्यपरमहंसाः केचित् इत्यनेनैव सर्वैरपि उन्मत्तवदाचरणं स्वीकर्तव्यतया

विधीयेत। तस्माद्यावद् दण्डधारणं नित्यमिति श्रुतिस्मृतिपुराणवचनैः नोपपाद्यते तावत् "दण्डात्मनोः संयोगः" इति वचनं दण्डग्रहीतुरेव संयोग-नित्यत्वं ब्रूयात् न तु सर्वेषां विविदिषूणां संन्यासिनाम्। न च दण्डः श्रवण-मननोपकारको दृष्टद्वारेण, अतो दण्डिना अदण्डिना वा विविदिषुणा संन्यासिना, यावन्तो धर्मा अपेक्ष्यन्ते श्रवणादिषु तावन्त एव नियमेन अनुसर्तव्या इत्येव युक्तं कल्पयितुम् इत्यलमतिविस्तरेण।

## ६. दण्डमुद्रातर्पणादिविचारः

अथ दण्डविचारप्रसङ्गात् नित्याह्निकसम्बद्धमपि दण्डमुद्रादिविचारः प्रतायते। तत्र केचित्—'दण्डं मुद्रासहितं गृहीत्वा स्नानार्थं गच्छेदिति' तत्र संप्रदायविदां किल वचनम्। "नागमुद्रा त्वधो धार्या धेनुमुद्रा तु मध्यतः। तृतीये दण्डभागे तु धार्या परशुमुद्रिका॥ तस्यामुपरि सन्धार्या शङ्खमुद्रा तु वैष्णवी"॥ अत्र धेनुमुद्रायां ब्रह्ममुद्रेति विशेषमाहुः। "भागद्वयं विहायोर्ध्वं चतुरङ्गुलमात्रतः। दण्डं कार्पाससूत्रेण वेष्टयेत्संप्रदायतः॥" इति। अत्र दण्डग्रहणस्यैव कृताकृतत्वे तत्र मुद्रादिचिन्ता नैव अवतरति। अपि च स्मृतिषु पुराणेषु वा दण्डमुद्राणां तत्तर्पणस्य वा विधिः नैव दृश्यते। आचारोऽपि भिन्नभिन्नो दृश्यते तर्पणे। यतिधर्मसमुच्चयेऽपि स्नानानन्तरं "आर्द्रमुद्रां ततो बध्वा दण्डं मूले तु तर्पयेत्। द्विषड्वारं तथाग्रे तु तर्पयित्वा समुत्थितः"॥ इत्युक्त्वा अन्ये तु इति प्रकारान्तरेण तर्पणं वर्णितम्। "त्रिस्त्रिवारेण देवर्षीन् दण्डाग्रे त्रिः पितॄंस्ततः। तत उत्थाय दण्डस्य मूलाग्राभ्यां स्पृशेज्जलम्"॥ इति, तत्र प्रमाणं तु कुतस्त्यमिति न विज्ञायते। लोकैषणायाः व्युत्थितस्य देवर्षिपितृतर्पणं कुत आयातमिति च न विद्मः। एतत्सर्वं विविदिषासंन्यासिनः चित्तविक्षेपकम्। कथं श्रवणाद्युपकारकम् इत्येतत् वेदान्तसिद्धान्तसाधनकलापतत्त्वनिष्णाता एव निर्णेतुं प्रभवन्तीति विस्तराद्विरमामः।

## ७. अथ गुरूपदेशे प्रणवविचारः

अथ साध्यसाधनसम्बन्धलोकैषणातो निर्विण्णः परमात्मज्ञानार्थं विधिवत्कृतकर्मसंन्यासः गुरुसमीपं गच्छेदिति सर्वसम्प्रतिपन्नो मार्गः। तथाहि—

**परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतःकृतेन।**
**तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥**

इत्यादिश्रुतिभ्यः। ततो गुरुः तस्मै ब्रह्मविद्यामुपदिशेदिति च। ततः आचार्यः प्रणवं प्रणवार्थं च पञ्चीकरणोक्तरीत्या उपदिशेत् महावाक्यानि च इति अधुनातनाः। तत्रेदं यथाक्रमं विमृशामः।

### प्रणवपञ्चीकरणग्रन्थो न प्रमाणम्

तत्र परमहंसानां प्रणवोपदेशः किं पञ्चीकरणप्रामण्यमुररीकृत्य कर्तुं युक्तो न वा इत्येव प्रप्रथमं निरूपणीयम्। यतः सवार्तिकपञ्चीकरणपठन-पूर्वकमेव प्रणवोपदेशं उशन्ति केचित्। अन्यथा शिष्यस्य पारमहंस्यमेव न सिद्ध्येदित्यपि कश्चित्।

अत्रेत्थं नः प्रतिभाति—न युक्तं पञ्चीकरणं तद्वार्तिकं च स्मृतिस्थाने विनियुज्य प्रणवोपदेशनम्। यत्कारणं इदं प्रकरणं तावत् आचार्यानुगृहीतं न वा इत्यत्रैव विप्रतिपत्तिरस्ति। अभ्युपगम्यापि प्रकरणस्य तदुपज्ञत्वम् इदं तावत् मनसि करणीयम् यत् आचार्याः तत्प्राक्तनाचार्याश्च कथं स्वगुरुसकाशात् प्रणवोपदेशम् आसादितवन्तः? पञ्चीकरणस्य आत्मलाभात् पूर्वमेव कथं वा तेषां पारमहंस्यं सर्वैः प्रमाणितं भवेत् यदि पञ्चीकरणोपदेशं विना पारमहंस्यासिद्धिः इति। अपि च ग्रन्थशरीरे एव दरीदृश्यन्ते लिङ्गानि यैः नेयमाचार्यकृतिरिति गम्यते। तथाहि "सच्छब्दवाच्यम् अविद्याशबलं ब्रह्म" इति हि अत्र प्रथमं वाक्यम्।

नैवास्ति प्रस्थानत्रयभाष्येषु वाक्यमीदृशं यत्र सच्छब्दवाच्यं ब्रह्म अविद्याशबलमिति विशेष्यते। छान्दोग्यभाष्यविरुद्धं चेदं "सदिति अस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतमेकं निरञ्जनं निरवयवं विज्ञानं यदवगम्यते सर्ववेदान्तेभ्यः" इति हि तत्र सच्छब्दार्थो वर्णितः।

ब्रह्मणोऽव्यक्तं अव्यक्तात् महत् महतोऽहंकारः अहंकारात् पञ्चतन्मात्राणि पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि पञ्चमहाभूतेभ्योऽखिलं जगत् इति द्वितीयवाक्यमत्र। तदिदं "इतरेषां च अनुपलब्धेः" (सू. २-१२) इति सूत्रभाष्ये प्रत्याख्यातम्। "प्रधानादितराणि यानि प्रधानपरिणामत्वेन स्मृतौ कल्पितानि महदादीनि न तानि वेदे लोके वा उपलभ्यन्ते। भूतेन्द्रियाणि तावत् लोकवेदप्रसिद्धत्वात् शक्यन्ते स्मर्तुम्, अलोकवेदप्रसिद्धत्वात्तु महदादीनां षष्ठस्येवेन्द्रियार्थस्य न स्मृतिरवकल्पते" इति (सू. भा २-१-२)। भवेदपि इदं वाक्यं यथाकथञ्चित् परिगृहीतं "यदपि क्वचित् तत्परमिव श्रवणम् अवभासते तदपि अतत्परं व्याख्यातम् "आनुमानिकमप्येकेषाम्" (१-४-१) इत्यत्र" इति भाष्यवाक्यशेषमवलम्ब्य। एतत्पुरस्तात्पाठ्यमिदं वाक्यम्।

"पञ्चीकृतमहाभूतानि तत्कार्यं च सर्वं विराडित्युच्यते एतत् स्थूलशरीरम् आत्मनः"। इति तत् सर्वथा अनादेयम्। न हि पञ्चभूतानि तत्कार्यं च विराट्च्छब्दशब्दितमिति वा एतत् स्थूलशरीरमात्मनः इति वा क्वचिदपि वेदान्तेषु श्रुतं भाष्येषु वा क्वचिदुपलब्धम्। प्रत्युत वैश्वानरविराट्च्छब्दौ समष्टिस्थूलशरीरोपहितस्य आत्मवाचकत्वेन सुप्रसिद्धौ। 'तदेव अन्तरण्डोद्भूतप्रथमशरीरोपाधिमत् विराट् प्रजापतिशरीरसंज्ञं भवति' इति ऐतरेयभाष्यवाक्यप्रसिद्धेः। तथा "अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सर्वं भौतिकं सप्तदशकं लिङ्गं हिरण्यगर्भ उच्यते। एतत् सूक्ष्मशरीरमात्मनः" इत्यपि श्रुतिस्मृतिभाष्यविरुद्धम्। "हिरण्यगर्भः समवर्तताग्रे...। महद्यक्षं प्रथमजम्" इत्यादि श्रुतितद्भाष्यावलोकनात् एतत् स्फुटीभविष्यति।

तथा "शरीरद्वयकारणम् आत्माज्ञानं साभासम् अव्याकृतम् इति उच्यते। एतत्कारणशरीरमात्मनः, तच्च न सत् नासत्, नापि सदसद्भिन्नं नाभिन्नं नापि भिन्नाभिन्नं न निरवयवं न सावयवं नाप्युभयम्। किंतु, ब्रह्मात्मैकत्वज्ञानापनोद्यं सर्वप्रकारज्ञानानाम् उपसंहारे बुद्धेः कारणात्मना अवस्थानं सुषुप्तिः तदुभयाभिमान्यात्मा प्राज्ञः" इति वचनमपि श्रुतिभाष्य-युक्तिविरुद्धमेव। न हि अव्याकृतम् अज्ञानशब्दवाच्यमिति कुत्रापि श्रुतावाम्नायते। तदात्मनः कारणशरीरं सदसदादिप्रकारैरनिर्वाच्यम् इति वा क्वचिद्भाष्ये प्रतिपादितमुपलभामहे। "सर्वज्ञस्येश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यां अनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया शक्तिः प्रकृतिरिति च श्रुतिस्मृत्योः अभिलप्येते" (सू. भा. २-१-१४) इति अव्याकृतनामरूपम् अविद्याकल्पितं इत्युद्घोषितम् "तमेतम् एवंलक्षणम् अध्यासं पण्डिता अविद्येति मन्यन्ते"। "तमेतम् अवि-द्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्ष-पराणि"।(सू. भा. अव) इति। आत्मानात्मनोरितरेतराध्यास एव अविद्या इति च। एवमेव सति अज्ञानं ब्रह्मात्मज्ञानेन निवर्त्यते इति युक्तियुक्तं भवेत् न तु पञ्चीकरणे वर्णितम् अव्याकृतम् अविद्याकल्पितत्वमन्तरेण ज्ञानापनोद्यं भवेत्कथञ्चिदपि। एवं 'सर्वप्रकारकज्ञानानाम् उपसंहारे बुद्धेः कारणात्मना-वस्थानं सुषुप्तिः' इत्युक्तिरपि भाष्ययुक्त्यनुभवविरुद्धा एव। न हि सुषुप्ति-लक्षणवाक्यमीदृशं क्वचित् भाष्ये समुपलभ्यते बुद्धेः कारणात्मना अवस्थानमेव सुषुप्तिः इत्येवमाकारम्। यद्यपि 'पुंस्त्वादिवत्त्वस्य सतोऽभि-व्यक्तियोगात्' इति सूत्रभाष्ये दृश्यते वचनम्। "एवमयमपि बुद्धिसम्बन्धः शक्त्यात्मना विद्यमान एव सुषुप्तिप्रलययोः—पुनः प्रबोधप्रसवयोः आवि-र्भवति। एवं ह्येतत् युज्यते। न हि आकस्मिकी कस्यचिदुत्पत्तिः संभवति। अतिप्रसङ्गात्। दर्शयति च सुषुप्तादुत्थानम् अविद्यात्मकबीजसद्भावकारि-तम् "सति संपद्य न विदुः सति संपद्यामहे इति" (छां. ६-९-२) "त इह व्याघ्रो

वा सिंहो वा" (छां. ६-९-३) इत्यादिना। तस्मात् सिद्धमेतत् यावदात्मभावी बुध्युपाधिसंबन्धः" इति (सू. भा. २-३-३१) तथापि "अपि च मिथ्याज्ञान-पुरस्सरोऽयमात्मनः बुद्ध्युपाधिसंबन्धः" (सू. भा. २-३-३०) इति अविद्या-कल्पितत्वमेव बुद्धिसंबन्धं ब्रवीतीति न विरोधः। यदपि तदुभया-भिमान्यात्मा प्राज्ञः इति पञ्चीकरणवचनम्, एतदपि श्रुतिसूत्रभाष्यविरुद्धमेवे-त्युपेक्ष्यम्। तत्र श्रुतिस्तावत् "अयं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तः" (बृ. ४-३-२१) इति प्राज्ञं सुषुप्ताभिमानिनः पुरुषादन्यं परमेश्वरमेव आह। भाष्यं च "प्राज्ञः परमेश्वरः सर्वज्ञत्वलक्षणया प्रज्ञया नित्यमवियोगात्" (सू. भा. २-३-४२) एवम् "अयं शारीरात्मा प्राज्ञेनात्मनान्वारूढः उत्सर्जन् याति" (बृ. ४-३-३५) इति। तद्भाष्यं च "तत्रापि शारीरो जीवःस्यात्, शरीरस्वामित्वात्। प्राज्ञस्तु स एव परमेश्वरः" इति। सूत्रकारोऽपि खलु "वदतीति चेन्न प्राज्ञो हि प्रकरणात्" (१-४-५) तद्भाष्यं च—"प्राज्ञो हि इह परमात्मा निचाय्यत्वेन निर्दिष्टः इति गम्यते" इति। तदेवं पञ्चीकरणं न आचार्यवचनम् इति स्थिते न तदनुसारेण प्रणवोपदेशो युक्तः इति स्थितम्।

## ८. प्रणवमन्त्रऋष्यादिकीर्तनं न्यासश्च

अथ "ऋषिच्छन्दो देवताश्च गोत्रवर्णस्वरान्मुखम्। बीजं शक्तिं कीलकं च विनियोगं च कीर्तयेत्" इति श्लोकोक्तिम् अनुसृत्य ऋष्याद्यनुकीर्तनानन्तरं षडङ्गन्यासं च कुर्वन्ति। तद्यथा 'अस्य प्रणवमहामन्त्रस्य अन्तर्यामी भगवान् ऋषिः, देवी गायत्री च्छन्दः, परमात्मा देवता, लातव्यगोत्रोत्पन्ना ब्रह्मपुत्रकाः, श्वेतो वर्णः, उदात्तः स्वरः, ज्ञानाग्निर्मुखम्, ॐ अं बीजम्, ॐ उं शक्ति, ॐ मं कीलकम्, ॐ अकारस्य अग्निर्ऋषिः, गायत्री च्छन्दः, ब्रह्मा देवता, क्लीं बीजं, क्रिया शक्तिः पीतो वर्णः, जाग्रदवस्था, भूःस्थानम्, उदात्तःस्वरः, ऋग्वेदः, गार्हपत्योऽग्निः रजो गुणं प्रातस्सवनं, विश्वः आत्मा, पृथिवी तत्त्वम्, सृष्टिक्रिया व्याप्त्यर्थं विनियोगः। ॐ उकारस्य वायुर्ऋषिः त्रिष्टुप् च्छन्दः, विष्णुर्देवता, श्रीः बीजं, ज्ञानं शक्तिः, विद्युद्वर्णः, स्वप्नावस्था, भुवः स्थानम्

अनुदात्तःस्वरः, यजुर्वेदः दक्षिणोऽग्निः, सत्वं गुणः माध्यन्दिनं सवनं, तैजस आत्मा, अन्तरिक्षं तत्त्वं, स्थितिक्रियाकर्षार्थे विनियोगः । ॐ मकारस्य सूर्य ऋषिः, जगतीच्छन्दः, ईश्वरो देवता, ह्रीं बीजं, द्रव्यं शक्तिः, श्वेतो वर्णः, सुषुप्त्यवस्था, स्वःस्थानं, स्वरितः स्वरः, साम वेदः, आहवनीयोऽग्निः, तमो गुणः, सायं सवनं, प्राज्ञ आत्मा, द्यौस्तत्त्वं, संहारक्रियार्थे विनियोगः ।

ॐअर्धमात्रायाः वरुणऋषिः, विराट् च्छन्दः, पुरुषो देवता, क्लीं बीजं, विज्ञानं शक्तिः, सर्वे वर्णाः तुरीयावस्था, भूर्भुवःस्वःस्थानानि, उदात्तानुदात्त-स्वरिताः स्वराः, अथर्ववेदः, नादो वा संवर्तको वा अग्निः, सर्वे गुणाः, सर्वाणि सवनानि, सर्वे आत्मानः, पृथिव्यन्तरिक्षदिवः तत्त्वानि, सृष्टिस्थितिसंहार-क्रियार्थे विनियोगः ।

ॐ ध्वनेः ब्रह्मा ऋषिः, अव्यक्ता गायत्रीच्छन्दः, परमात्मा देवता, हँसो बीजं, चित् शक्तिः, नादः स्वरूपं, ब्रह्मात्मा, सृष्टिःस्थानं, उन्मन्यवस्था, मोक्षार्थे विनियोगः, इति ऋष्यादिकीर्तनम् । एवं 'भूः अग्न्यात्मने तुषारवर्णाय अङ्गुष्ठाभ्यां नमः' इत्यादिना करन्यासं कृत्वा "स्फुरत्तारकसंकाशं विद्युत्पुञ्ज-समप्रभम् । हृदिस्थं प्रणवं ध्यायेत् सर्वप्रत्ययसाक्षिणम्" ॥ इत्यादि ध्यान-श्लोकं पठन्ति पञ्चोपचारपूजां कुर्वन्ति । केचित्पुनः "निगमोक्तवेद्यम् अनिशम्" इत्यादि-श्लोकान् पठन्ति । तत्रेदं सर्वम् अभित्तिचित्रमिति प्रति-भाति नः । न हि ओङ्कारम् ईदृशं जपेदिति श्रुतौ स्मृतौ वा कुत्रचित् विहित-मुपलभामहे ।

## ९. ओङ्कारपरामर्शकानि श्रुतिवाक्यानि

तस्मात् सर्वं कर्म संन्यस्य परब्रह्मतत्त्वं विविदिषवे विरक्ताय न इत्थम् ओङ्कारं कर्मविधिशेषं कृत्वा तन्त्रानुकरणेन बीजशक्तिकीलकादीन् प्रकल्प्य गुरूपदेशेन पुनरप्येषणारण्ये भ्रामयेत् । श्रुत्युपदिष्टमार्गमेव तु दर्शयेत् । अतः सर्वदोषाऽसंस्पृष्टम् ओङ्कारवर्णनं श्रुतिषु यथादृष्टं तथेह दर्शयिष्यामः ।

तत्र **छान्दोग्ये** तावत् 'सर्व एते पुण्यलोका भवन्ति । ब्रह्मसंस्थो अमृतत्वमेति' इति पुण्यसाध्यलोकान्निर्विण्णाय ब्रह्मसंस्थता उपदिष्टा। तस्य ब्रह्मचर्यात्, गार्हस्थ्यात्, वानप्रस्थाश्रमाद्वा प्रव्रजितस्य यत्संस्थो अमृतत्वमेति तन्निरूपणार्थं वाक्यशेषं प्रवृत्तम्, "प्रजापतिर्ह लोकान् अभ्यतपत्। तेभ्योऽभितप्तेभ्यो त्रयी विद्या संप्रास्रवत् । तामभ्यतपत् तस्याऽभितप्तायाः एतान्यक्षराणि सम्प्रास्रवन्त भूर्भुवस्सुवरिति। तान्यभ्यतपत् तेभ्योऽभितप्तेभ्यो ओङ्कारः सम्प्रास्रवत् । तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृण्णानि एवमोङ्कारेण सर्वा वाक् सन्तृण्णा ओङ्कार एवेदं सर्वम् ओङ्कार एवेदं सर्वम्" ॥ (छां. २-२३-२-३) इति । अत्र सर्वलोकसारभूताः वेदाः सर्वभूतवेदसारभूताः व्याहृतयः, व्याहृतिसारभूतश्च ओंकारः इति सर्वानपि वेदान् स्मृतिविहितकर्माणि च संन्यस्तवते सर्वसारभूतम् ओङ्काररलक्षणं ब्रह्म परमात्मनः प्रतीकं कर्तुमुपदिष्टम् उपासनार्थम् ।

तथा **प्रश्नोपनिषदि**—"स यो ह वै तत् भगवन् इति सत्यकामप्रश्नम् उत्थाप्य तस्मै स होवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः, तस्माद्विद्वान् एतेनैवायतनेन एकतरमन्वेति" इत्योङ्कारः परापरान्यतरप्रतीकत्वेन उपदिष्टः उपासनायैव । (प्र ५.१)

**बृहदारण्यके** तु 'ओं खं ब्रह्म खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो वेदोऽयं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यम्' (बृ. ५-१-१) इति मन्त्रः ध्यानकर्मणि विनियुक्तः ओङ्कारः परमात्मनः सोपाधिकस्य निरुपाधिकस्य च प्रतीकत्वेन वाचकत्वेन उपदिष्टः। इहापि ओङ्कारः सर्ववेदान्तसारत्वेन संस्तुतः "अनेनैव हि यद्वेदितव्यम् ब्रह्म तद्वेद ओङ्कारसंस्थः" इति

**काठकेऽपि**

**"सर्वे वेदा यत्पदमामनन्ति । तपांसि सर्वाणि च यद्वदन्ति ।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदँ सङ्ग्रहेण ब्रवीम्योमित्येतत् ॥**

**एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।**
**एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥**
**एतदालम्बनँ श्रेष्ठमेतदालम्बनं परम्।**
**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते"॥** का. २-१५, १६, १७

इत्योङ्कारं वेदसारत्वेन स्तुत्वा परापरब्रह्मालम्बनमोङ्कार इत्युक्तम्।

**मुण्डके**

**धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्दधीत।**
**आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि॥**
**प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।**
**अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत्॥**
**यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः।**
**तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः॥**
**अरा इव रथनाभौ संहता यत्र नाड्यः**
**स एषोऽन्तश्चरते बहुधा जायमानः॥**
**ओमित्येवं ध्यायथ आत्मानं**
**स्वस्ति वः पाराय तमसः परस्तात्॥** २-२-३, ४, ५, ६

इति ओङ्कारालम्बनेन ब्रह्मज्ञानं सम्पादयितव्यमित्युपदिश्यते।

**माण्डूक्येऽपि**

**"ओमित्येदक्षरमिदँ सर्वं तस्योपव्याख्यानं**
**भूतं भवद्भविष्यदिति सर्वमोंकार एव।**
**यच्चान्यत्त्रिकालातीतं तदप्योंकार एव॥** मां. १

इति सर्वमिदमोङ्कार एवेति प्रतिज्ञाय "सर्वं ह्येतत् ब्रह्म अयमात्मा ब्रह्म" इति ब्रह्मात्मनोऽपि सर्वात्मत्वात् ओङ्कारत्वम् इति सूचयित्वा "नान्तःप्रज्ञं न

बहिष्प्रज्ञम् इत्यादिना तस्य सर्वावस्थासम्बन्धविधुरत्वं प्रदर्श्य, तस्यैवात्मनो विज्ञेयत्वं "स आत्मा स विज्ञेय" इत्युक्त्वा "सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रम्" इति निष्प्रपञ्चात्मन एव ओङ्कारत्वं प्रतिज्ञाय ओङ्कारस्य मात्रात्रयविभागेन स्थानत्रयसम्बद्धत्वममात्रत्वेन आत्मत्वं च आह। "अमात्रश्चतुर्थः, अव्यवहार्यः, प्रपञ्चोपशमः शिवोऽद्वैतः" इति। एवम् 'ओङ्कारः आत्मैव' इति एवंवेदितुः फलं च आह "संविशत्यात्मनात्मानं य एवं वेद" इति। कृत्स्नायाः अस्याः उपनिषदः व्याख्यानम् अग्रे भविता इति अत्र उपरम्यते।

## १०. प्रणवोपदेशप्रकारः

तस्मात् यथावर्णितप्रकारेषु अन्यतममाश्रित्य शिष्यचित्तभूमिकाम् आश्रित्य परमात्मप्रतीकत्वेन वाचकत्वेन निष्प्रपञ्चात्मत्वेन वा संक्षेपेण ओङ्कारार्थम् उपदिशेत् आचार्यः। तदर्थग्रहणदार्ढ्यं च यथायोग्यम् उपनिषदां गीतानां च नियमेन अध्ययने भाष्यग्रहणे च शिष्यं नियोजयेदिति स्थितम्।

## ११. महावाक्यविचारः

अथेदानीं प्रणवोपदेशानन्तरं शिष्यशाखात्रावाक्योपदेशपूर्वकमुपदिशेत्। तानि च वाक्यानि "अयमात्मा ब्रह्म" "तत्त्वमसि" "अहं ब्रह्मास्मि" "प्रज्ञानं ब्रह्म" इत्यादीनीति यतिधर्मसङ्ग्रहे, प्रणवयुक्तानि तानीति—"ॐ तत्त्वमसि श्वेतकेतो", "ॐ सर्वं खल्विदं ब्रह्म", "ॐ प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म" इत्यादीनीति क्वचित्। कुत्रचिच्च अस्य श्री महावाक्यमहामन्त्रस्य हंस ऋषिः, अव्यक्ता गायत्री च्छन्दः परमहंसो देवता, हं बीजं, सः शक्तिः, सोऽहं कीलकं, मोक्षार्थे विनियोगः इति बीजाद्युक्त्यनन्तरम् "ॐ सत्यं ज्ञानमनन्तं ब्रह्म इत्यङ्गुष्ठाभ्यां नमः" इत्यादिरूपेण न्यासादिकमपि पठितम्। अत्रेदं वक्तव्यम्, सर्वं कर्म सन्यस्य तत्त्वम् विविदिषवे केयम् उपनिषत्पठितानां ज्ञानोपासनावाक्यानां जपे विनियोगलक्षणा गोशकृत्पायनी क्रिया इति।

ज्ञानोपासनावाक्यानां पार्थगर्थ्यं तत्त्वज्ञानवाक्यानां ब्रह्मात्मावगतिप्रयोजनत्वं च सकललोकानुग्रहार्थं भाष्यप्रणयनेन निर्णीतवतां भगवद्भाष्यकाराणां वचनमप्यनादृत्य सर्वेषामपि वाक्यानां जपद्वारा मोक्षार्थे विनियोगमातस्थुषां किं नास्त्येव शास्त्राचार्यद्रोहभीतिः? अथैवं स्यात् अस्त्येवास्माकं शुकरहस्योपनिषत्प्रमाणभूता, तत्रत्यान्येव इमानि न्यासादिवाक्यानीति; तर्हि किमिति एतावतैवोपरम्यते? किमिति तत्पदमहामन्त्रस्य त्वंपदमहामन्त्रस्य च ऋष्यादिकीर्तनं न्यासविधिश्च नैवोपदिश्यते इति प्रष्टव्या भवन्तः। तदपि भवतु का नो हानिः? इति वदतां न किमपि वक्तव्यम् अवशिष्यते। यावता पञ्चदश्यादिप्रकरणस्थान्यपि महावाक्यार्थव्याख्यानरूपाणि तत्रोपनिषदि पठ्यन्त एव! सर्वोपनिषत्सिद्धान्तं तृणाययित्वा अर्वाचीनप्रकरणान्यपि गुरूपदेशादधिगन्तव्यानि इत्युपदेष्टुं प्रवृत्तानां कलिरेव प्रेरको भवेदिति मत्वा तूष्णींभाव एव शरणीक्रियते इत्यास्तां विस्तरः।

## १२. संन्यासिने नामदानम्

महावाक्योपदेशानन्तरं नूत्नसंन्यासिने नामदानं कर्तव्यम् इत्यपि संप्रदायः श्रूयते। तत्र संप्रदायविद्वचनत्वेनेदं पठ्यते—

**तत्त्वंपदार्थयोरैक्यं यत्पदं प्रतिपादयेत्।**
**तन्नाम यतये कुर्यात् वाक्यनाम तदिष्यते॥ इति**

तत्र यद्यपि व्यवहारार्थं स्वसंप्रदायस्य अविच्छेदार्थं नामकरणम् उचितमेव, तथापि एवमेव नाम दातव्यमिति निर्बन्धो निरर्थक इति भाति। न च शास्त्रविहितमेवंनामकरणम् भवेदिति। तथा हि गौडपादशङ्करसुरेश्वराणां नैव जीवपरमात्मैक्यवाचकं नामास्ति। न च—

**तीर्थाश्रमवनारण्यगिरिपर्वतसागराः।**
**सरस्वती भारती च पुरी नामानि वै दश॥**

इति श्लोकानुक्रान्तनाम्नाम् अन्यतमेनापि तेषां नाम सिद्धम् अस्ति। अथ च ते संप्रदायप्रवर्तका आचार्या इति सर्वसंप्रतिपन्नमेतत्। यद्यपि शृङ्गिर्यादिमठाधिपानां तच्छिष्याणां तथा अद्वैतसंप्रदायानुयायिसंन्यासिनां च एतादृशनाम अस्त्येव व्यावहारिकत्वेन इदानीं सुप्रसिद्धम्। तथापि दशनामीति प्रसिद्धसंप्रदायस्थगोसायिनां सुप्रसिद्धव्यावहारिकनामान्येवेति सर्वविदितमेतत्। न च दशनामीसंप्रदायः केन प्रतिष्ठापित इति पुरातत्वसंशोधकैः अद्यापि न निर्णीतम्। तत्स्थानात् पूर्वमपि मठाम्नायस्य साम्प्रदायिकत्वे आचार्यभगवत्पादप्रणीतत्वे च यावत् चित्तसमर्पकः ऐतिहासिकाधारो न लभ्यते तावत् संन्यासिनां नामकरणगतः संशयः तथैव स्थास्यति इति सर्वैरप्यनुमन्तव्यम्। यदपि बह्वृचपरिशिष्टवचनं समुदाह्रियते—'अथास्मै नाम दद्यात् वैष्णवं वचनजातं यत्रोच्यते" इति, तदप्यत्र न निर्णायकमिति स्फुटम्। तस्मात् न किंचित् अध्यवसितुमत्र पारयामः॥

॥ इति श्री बोधानन्देन्द्रसरस्वतीशिष्येण सच्चिदानन्देन्द्रसरस्वतीभिक्षुणा प्रणीतायां पारमहंस्यमीमांसायां **परमहंसदीक्षाविचारो** नाम द्वितीयोऽध्यायः॥

# अथ तृतीयोऽध्यायः

## पारिव्राज्यद्वयविवेकः

### १. विद्वद्विविदिषाभेदेन परिव्राज्यद्वयम्

परमहंसपारिव्राज्यं द्विविधम्—विद्वत्संन्यासः, विविदिषासंन्यासश्चेति। तत्र च प्रमाणम्—"एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" (बृ. ३-५-१) इति विद्वत्संन्यासे। "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" (बृ. ४-४-२२) इति विविदिषासंन्यासे। तत्र एतत्संन्यासे को हेतुरिति विवेचने केचिन्मन्यन्ते-गृहस्थाश्रमे विविदिषासंन्यासावस्थायां वा कृतनिरन्तरश्रवण-मनननिदिध्यासनैः उत्पन्नात्मसाक्षात्कारो भूत्वा एकान्ते मनोनाशवासनाक्षयाभ्यासार्थं विध्युक्तप्रकारेण यादृशं संन्यासं स्वीकरोति स विद्वत्संन्यासो नाम। श्रवणाद्यर्थं क्रियमाणो विविदिषासंन्यास इति। तत्र विविदिषुसंन्यासिधर्मः अग्रे विस्तरेण मीमांस्य इति विद्वत्संन्यासमधिकृत्यैव किञ्चिदुच्यते।

२. विदुषः मनोनाशादिकर्तव्यशेषसद्भावोन्नयनं प्रामाणिकम्। [illegible]त्? विद्वान् कृतकृत्यः कर्तव्यशेषवान् च इति विप्रतिषेधः। तथा हि भाष्यकारः—"एवं मुक्तिफलानियमः तदवस्थावधृतेः तदवस्थावधृतेः" इति सूत्रार्थव्याख्यानावसरे प्राह—"अपि च विद्यासाधनं स्ववीर्यविशेषात् स्वफल एव विद्यायां कञ्चिदतिशयमासञ्जयेत् न विद्याफले मुक्तौ। तद्धि असाध्यं नित्यसिद्धस्वभावमेव विद्यया अधिगम्यते इत्यसकृदवादिष्म। न च तस्यां उत्कर्षनिकर्षात्मकोऽतिशय उपपद्यते। निकृष्टाया विद्यात्वाभावात् उत्कृष्टैव हि विद्या भवति। तस्मात् तस्यां चिराचिरोत्पत्तिरूपोऽतिशयो भवन् भवेत्" इति। (सू. भा. ३-४-५२) इति। तस्माद्यदि विद्वान् न तस्य कर्तव्यावशेषोऽस्ति। अथ कर्तव्यावशेषवान् न तर्हि विद्वान् इति श्लिष्यते।

अपि च विद्यायामुत्पन्नायां न कार्यमवशिष्यत इति वदता भाष्यकृता साम्प्रदायिकवचनमप्युदाहृतं भाष्ये—

**गौणमिथ्यात्मनोऽसत्वे पुत्रदेहादिबाधनात्।**
**सद्ब्रह्मात्माहमित्येवं बोधे कार्यं कथं भवेत्॥ इति**

सू. भा. १-१-४

यत्तु "मनोनाशाद्यर्थं जीवन्मुक्त्यानन्दार्थं च विद्वत्संन्यासः तस्य च अपरोक्षज्ञानित्वेऽपि वासनाक्षयाद्यभावेन अविश्रान्तचित्तस्य कर्तव्य-सद्भावात् निरतिशयकृतकृत्यत्वं नास्त्येव। तत्र वासनायाः क्षयो नाम विवेकजन्यायां शान्त्यादिवासनायां दृढीकृतायां सत्यपि बाह्यनिमित्ते क्रोधाद्यनुत्पत्तिः। मनोनाशो नाम वृत्तिरूपपरिणामं परित्यज्य विशुद्धत्वा-कारेण परिणामः। तत्त्वानुस्मरणं नाम अपरोक्षतया ज्ञातस्यैव आत्मवस्तुनः अनन्यव्यापरतया अनुसंधानम्।

एवं "चित्तवृत्तिनिरोधवासनाक्षयतत्त्वानुसंधानानि अवश्यकर्तव्यानि विदुषोऽपीति"। तदसत्। यथोपपादितरीत्या विचार्यमाणे पूर्वोक्तविदुषः कर्तव्यशेषानुपपत्तेः। अपि च अभियुक्तवचननीत्या विरुद्धं, युक्तिविरुद्धं चेदं मनोनाशाद्यवशेषवादिमतम्, यतो विदुषः मनस्सम्बन्ध एव नास्ति। तथा हि भगवान् भाष्यकारः मोक्षाख्यस्य अशरीरत्वस्य पुनः स्वाभाविकत्वं प्रतिज्ञाय तत्र प्रमाणत्वेन अशरीरँ शरीरेषु अनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥(का. २-२२) अप्राणो ह्यमानाः शुभ्रः(मु. २-२) असङ्गो ह्ययं पुरुषः (बृ. ४-३-१५) इत्यादिश्रुतीस्तावत् उदाहरति। समन्वय-सूत्रार्थव्याख्यानावसरे तत्रैव लिखितं वचनमपि अनुसंधेयम्—

"तस्मात् मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्। तथा ब्रह्मविद्विषया श्रुतिः "तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते। अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव (बृ. ४-४-७) इति। 'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव' इति च। स्मृतिरपि च स्थितप्रज्ञस्य का भाषा" (गी. २-५४) इत्याद्या स्थितप्रज्ञलक्षणानि आचख्याणा विदुषः सर्वप्रवृत्यसम्भवं दर्शयति। (सू. भा. १-१-४) इति।

गौडपादाचार्या अपि वेदान्तसंप्रदायप्रवर्तका आहुः—

**आत्मसत्यानुबोधेन न सङ्कल्पयते यदा।**
**अमनस्तां तदा याति ग्राह्याभावे तदग्रहम्॥** मां. का. ३-३२

**इति**। भाष्यं चात्र भवति—"कथं पुनरमनीभाव इति? उच्यते-आत्मैव **सत्यम्** **आत्मसत्यं** मृत्तिकावत्। "वाचारम्भणं विकारो नामधेयम् मृत्तिके**त्येव** **सत्यम्**(छां. ६-१-१४) इति श्रुतेः। तस्य शास्त्राचार्योपदेशमनु अवबोधः **आत्मसत्यानुबोधः**। तेन सङ्कल्पाभावतया न सङ्कल्पयते दाह्याभावे ज्वलनमिवाग्नेः, यदा यस्मिन् काले अमनस्ताम् अमनीभावं याति ग्राह्याभावे तन्मनः अग्रहं ग्रहणविकल्पनाभाववर्जितम् इत्यर्थः" (मा. भा. ३-३२) इति।

तस्मात् विद्वत्संन्यासिनो शरीरेन्द्रियमनआदिसंबन्धाभावादेव मनोनाशादिकर्तव्यशेषसद्भावशङ्का दूरत एव निरस्ता इति स्थितम्। अतः मनस एव अभावे वृत्तिनिरोधाय, वासनाक्षयाय वा किमिति विद्वान् प्रयतेत? इति प्रष्टव्या भवन्ति विदुषोऽपि कर्तव्यशेषवादिनः। "मनसो निग्रहायत्तम् अभयं सर्वयोगिनां। दुःखक्षयः प्रबोधश्चाप्यक्षया शान्तिरेव च"॥ इति सर्वयोगिनामपि मनोनिग्रहायत्त एव दुःखक्षयः शान्तिश्च इत्युक्तत्वात् विदुषः नास्ति आवश्यकता मनोनिग्रहस्य इति अर्थादुक्तं भवति। भाष्यं च एतत् स्फुटयति "येषां पुनः ब्रह्मस्वरूपव्यतिरेकेण रज्जुसर्पवत् कल्पितमेव मनः इन्द्रियादि च न परमार्थतः विद्यते, तेषां ब्रह्मस्वरूपाणाम् अभयं मोक्षाख्या च अक्षया शान्तिः स्वभावत एव सिद्धा न अन्यायत्ता "नोपचारः कथञ्चन" (३-३६) इत्यवोचाम। ये तु अतः अन्ये योगिनः मार्गगाः हीनमध्यमदृष्टयः मनोऽन्यत् आत्मव्यतिरिक्तम् आत्मसंम्बन्धि पश्यन्ति, तेषां आत्मसत्यानुबोधरहितानां मनसः निग्रहायत्तम् अभयं सर्वेषां योगिनाम्।" (मां. का. भा. ३-४०) इत्यादि। तस्मात् विद्वत्संन्यासिनः नास्त्येव कर्तव्यावशेषः इति सिद्धम्। यदप्याहुः मनोनाशवासनाक्षयाद्यभावेन चित्तविश्रान्त्यभावात् जीवन्मुक्तिसुखं नास्त्येव। न च तत्त्वविदि कर्तृत्वस्य अत्यन्ताभावः शङ्कनीयः।

चिदात्मन्यध्यारोपितस्य कर्तृत्वस्य विद्यया अपोहितत्वेऽपि चिच्छायोपेतान्तःकरणोपाधौ विक्रियासहस्रयुक्ते स्वतःसिद्धस्य कर्तृत्वस्य यावद्द्रव्यभावित्वात् अत एव याज्ञवल्क्यादीनां अपरोक्षज्ञानिनां मनोविश्रान्तिलाभाय विद्वत्संन्यासः आम्नायते—"एतावदरे खल्वमृतत्वम् इति होक्त्वा याज्ञवल्क्यो विजहार" इति ।

तदपि एतेनैव उक्तप्रतिवचनम् । न हि चित्तस्यैव अत्यन्ताभावं साक्षात्कृतवतो विदुषः चित्तविश्रान्त्यपेक्षा स्यात् जीवन्मुक्तिसुखापेक्षा वा वेदान्तविज्ञानसुनिश्चितार्थस्य समस्तीति । याज्ञवल्क्योदाहरणं तु अत्र अतीव दवीयः । न हि महामुनेस्तस्य जल्पकथायां प्रवक्तृत्वप्रयुक्ता अविश्रान्तिः पारिव्राज्यानन्तरं च कृतचित्तनिरोधादिना विश्रान्तिश्च शक्योहना, अश्रुतत्वात् । तेन ब्राह्मणैः सह कृतकथामिषेण तत्त्वज्ञानम् आविष्कृतवत्याः श्रुतेरपि अप्रामाण्याध्यारोपप्रसङ्गाच्चेत्यलमतिप्रपञ्चेन । सर्वथाप्यपरोक्षज्ञानिनः नास्त्येव कर्तव्यावशेषो यदर्थं विद्वत्संन्यासोऽपेक्षेत । उक्तं च गृहस्थविदुषोऽपि कृतविद्वत्संन्यासिनो सर्वज्ञतौल्यं गीताभाष्ये

"यस्तु कर्मादौ अकर्मादिदर्शी स अकर्मादिदर्शनादेव निष्कर्मा संन्यासी जीवनमात्रार्थचेष्टः सन् कर्मणि न प्रवर्तते यद्यपि प्राग्विवेकतः प्रवृत्तः । यस्तु प्रारब्धकर्मा सन् उत्तरकालम् उत्पन्नात्मसम्यग्दर्शनः स्यात् सः सर्वकर्मणि प्रयोजनम् अपश्यन् ससाधनं कर्म परित्यजत्येव । सः कुतश्चिन्निमित्तात् कर्मपरित्यागासम्भवे सति कर्मणि तत्फले च सङ्गरहिततया स्वप्रयोजनाभावात् लोकसङ्ग्रहार्थं पूर्ववत् कर्मणि प्रवृत्तोऽपि नैव किञ्चित् करोति ज्ञानाग्निदग्धकर्मत्वात् तदीयं कर्म अकर्मैव.... निराश्रयः आश्रयरहितः ।... तस्य निष्क्रियात्मदर्शनसम्पन्नत्वात् ।.... नैव किञ्चित्करोति सः" इति (४-२०) अवतरणिकाभाष्यम् ।

तस्मात् विदुषः संन्यासो विश्रान्त्यर्थः जीवन्मुक्तिसुखार्थो वा इति नायं साध्ववसायः । पारिव्राज्यस्य अक्रियात्वात् प्रयोजनम् अनाकाङ्क्ष्यैव

भवति । कर्मसाध्यं प्रयोजनम् अपश्यतः स्वत एव भवति क्रियासंन्यासमिति ध्येयम् । तथा च उक्तं ऐतरेयभाष्ये

"अविद्याकामदोषनिमित्तायाः वाङ्मनःकायप्रवृत्तेः पाङ्क्तलक्षणायाः विदुषः अविद्यादिदोषाभावात् अनुपपत्तेः क्रियाभावमात्रं उत्थानम्, न तु यागादिवत् अनुष्ठेयरूपं भावात्मकम् । तच्च विद्यावत्पुरुषधर्मः इति न प्रयोजनम् अन्वेष्टव्यम् । न हि तमसि प्रविष्टस्य उदिते आलोके यत् गर्तपङ्क-कण्टकाद्यपतनं तत् किंप्रयोजनमिति प्रश्नार्हम् ।" (भा. भा. १३) इति । तस्मान्नास्ति प्रयोजनमपेक्ष्यं विद्वत्संन्यासे इति स्थितम् ।

## २. ब्रह्मजिज्ञासायाम् अधिकारी

अथ अवशिष्टम् इदं निरूपणीयं विविदिषासंन्यासः किंप्रयोजनः इति । तत्र विविदिषासंन्यासः इति नाम्नैव विज्ञायते विद्यार्थः सः इति । तत्र यो ब्रह्मजिज्ञासायाम् अधिकारी स एव पारिव्राज्ये अपि अधिकारी इति अर्थात् अवगम्यते । जिज्ञासायां तु साधनचतुष्टयसंपन्नः अधिकारी इति अथशब्दव्याख्यानप्रसङ्गेन—

"तस्मात् किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासा उपदिश्यते इति । उच्यते । नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमादि-साधनसंपत्, मुमुक्षुत्वं च । तेषु हि सत्सु प्रागपि धर्मजिज्ञासायाः ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये" इति (सू. भा. १-१-१) ।

तत्र नित्यानित्यवस्तुविवेकस्य तावत् श्रुतिप्रमाणकत्वं स्वयमेव आह भाष्यकृत् "यस्मात् वेद एव अग्निहोत्रादीनां श्रेयःसाधनानां अनित्यफलतां दर्शयति । "तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते" (छां. ८-१-६) इत्यादिः । तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति—'ब्रह्मविदाप्नोति परम्' (तै. २-१) इत्यादिः । तस्मात् यथोक्त-

साधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या" । इति (सू. भा १-१-१) परमार्थ-विज्ञानस्य नित्यफलत्वे इयमपि श्रुतिः यदाह

**एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान् ।**
**तस्यैव स्यात् पदवित् तं विदित्वा न लिप्यते कर्मणा पापकेनेति ॥**
बृ. ४-४-२३

इहामुत्रार्थभोगविरागोऽपि खलु श्रुतिप्रमाणकः—

**परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो**
**निर्वेदमायान्नास्त्यकृतः कृतेन ।**
**तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्**
**समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥** इति मु. १-१२

अत्र सर्वे लोकाः साधनसाध्याः परमपुरुषार्थाय न भवन्ति इति निश्चित्य ततो विरज्येत इत्युक्तम् । वैराग्यस्य च परमपुरुषार्थसाधनत्वमपि उक्तम् । "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । एतद्ध स्म वै तत्पूर्वे विद्वाँसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति (बृ. ४-४-२२) इति व्युत्थानमेव संश्रूयते । शमादिषट्कसंपत् अपि ज्ञानाङ्गत्वेन श्रुत्या उक्ता । तद्यथा "तस्मादेवंविच्छांतो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यति सर्वमात्मानं" (बृ. ४-४-२३) इति काण्वाः "तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वा आत्मन्येवाऽऽत्मानं पश्येत् सर्वमात्मानम् (बृ. भा. ४-४-२८) इति माध्यन्दिनाश्च आमनन्ति । मुमुक्षुत्वं खल्वपि" "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै । तँह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" (श्वे. ६-१८) इति आत्मबुद्धिसंपादनेच्छोः मुमुक्षुता समुपदिष्टा ।

## ३. गुरुमुखेन विद्या संपादयितव्या

अथैवं साधनसंपन्नः कथं विद्यां संपादयेत् इति निरूप्यमाणे प्रथमं स्वयमेव तर्कबलात् विद्यासंपादनं अशक्यमिति श्रुत्यैव उच्यते। "नैषा तर्केण मतिरापनेया" (का २-९) इति। युक्तं च एतत्-न हि अप्रमेयं सर्वस्य आत्मभूतं ब्रह्म प्रमाणैः तर्केण वा लभ्येत इति। विद्याप्राप्तिः आचार्यानुग्रहादेव इति सुस्पष्टं श्रूयते "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" (मुं. १-२-१२), "श्रुतँ ह्येव मे भगवद्दृशेभ्यः" (छां. ७-१-३), "आचार्यवान् पुरुषो वेद" (छां. ६-१४-२), "आचार्याध्दैव विद्या" (छां. ४-९-३) इति। "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥" (गी. ४-३४) इति स्मृतिश्च। तस्मात् ब्रह्मतत्त्वं विविदिषुणा संन्यासिना गुरुमुपेत्य तदुपदेशादेव परमार्थो वेदितव्यः इति स्थितम्।

॥ इति श्रीबोधानन्देन्द्रसरस्वतीशिष्येण सच्चिदानन्देन्द्रसरस्वतीभिक्षुणा प्रणीतायां पारमहंस्यमीमांसायां **पारिव्राज्यद्वयविवेको** नाम तृतीयोऽध्यायः॥

# अथ चतुर्थोऽध्यायः

## अथ संन्यासिधर्मनिरूपणम्

### १. विविदिषुणा शास्त्रोक्तसाधनानुष्ठानं कर्तव्यम्

अथ परिव्राजकधर्माः निरूप्यन्ते। तत्र यतिः शास्त्रनिषिद्धकर्म वर्जयित्वा ज्ञानसाधनत्वेन प्रशस्तानि साधनानि अनुतिष्ठेत् इति सामान्यनियमः। श्रुतयश्च अत्र भवन्ति—

१. नाविरतो दुश्चरितात् नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥ (क. २-१-२४)

२. यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः। न स तत्पदमाप्नोति सँसारं चाधिगच्छति॥ (क. ३-७)

३. "सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्। अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः" (मुं. ३-१-५)

४. "तपसा ब्रह्म विजिज्ञासस्व (तै. ३-१)

५. "तद्य एवैतावरं च ण्यं च ..." (छां. ८-५-४)

६. "तद्यदाहुः एकशतँह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास" (छां. ८-१-१-३)

### २. स्मृत्युक्तज्ञानसाधनानि

स्मृतिषु तत्र तत्र उक्तानि ज्ञानसाधनानि। तान्यपि अनुष्ठातव्यानि। भगवद्गीतासु तावत्—

**अमानित्वमदम्भित्वमहिंसा क्षांतिरार्जवम् ।**
**आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥**
**इन्द्रियार्थेषु वैराग्यम् अनहंकार एव च ।**
**जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥**
**असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।**
**नित्यं च समचित्तत्वम् इष्टानिष्टोपपत्तिषु ॥**
**मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।**
**विविक्तदेशसेवित्वम् अरतिर्जनसंसदि ॥**
**अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।**
**एतज्ज्ञानमिति प्रोक्तम् अज्ञानं यदतोऽन्यथा ॥** पर्यन्तं ।

गी. १३-६-१०

अत्र भाष्यम्-"अधुना तु तत्साधनगणम् अमानित्वादिलक्षणं यस्मिन् सति तज्ज्ञेयविज्ञाने योग्यो अधिकृतो भवति यत्परः संन्यासी ज्ञाननिष्ठः उच्यते तम् अमानित्वादिगणं ज्ञानसाधनत्वात् ज्ञानशब्दवाच्यं विदधाति भगवान् (गी. भा. १३-६) इति। [स्मृत्युक्तसाधनान्यपि परिशिष्टात् वेदितव्यानि] अत्र सङ्ग्रहेण भाष्यवचनमनुसंधेयम् इदम्, "सर्वत्रैव हि अध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनानि उपदिश्यन्ते यत्नसाध्यत्वात् । (गी. भा. २-५५) इति । तस्मात् कृतकृत्यं ब्रह्मनिष्ठं गुरुम् आसाद्य निरन्तरं तत्सेवया तल्लक्षणानि अनुकरणीयानि लक्ष्ये संस्थाप्य तमेव अनुकुर्यात्। ज्ञानसाधनानुष्ठाने तत्र गीतोक्तस्थितप्रज्ञ-युक्त-भक्त-त्रिगुणातीत-लक्षणानि विशेषतः गुरोर्मुखात् तदनुष्ठानेन उदाहरणेन च अधिगम्य विविदिषुणा अनुष्ठेयानि। तन्मुखादेव च वेदान्तश्रवणमनन-निदिध्यासनसतत्त्वम् अधिगन्तव्यम् इति दिक् ।

## ३. श्रवणादिसतत्त्वनिरूपणम्

तत्र श्रवणमनननिदिध्यासनानां ज्ञाने साक्षात् साधनत्वात् तत्सतत्त्वं

निरूप्य तदनन्तरमेव नित्यानुष्ठानादिकं निरूपयिष्यते । अत्र केचित् वदन्ति श्रवणविधिप्रयुक्तैव ब्रह्मजिज्ञासा कर्तव्यत्वेन सूत्रिता बादरायणेन **'अथातो ब्रह्मजिज्ञासा'** इति । एवं किल तेषाम् अभिप्रायः "स्वाध्यायोऽध्येतव्यः (तै. आ. २-१४) इति नित्याध्ययनविधिना अधीतसाङ्गस्वाध्याये "तद्विजिज्ञासस्व" (तै. ३-१), "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः (छां. ७-८-१), आत्मा वा अरे द्रष्टव्यः (बृ. २-४-५) इति आत्मदर्शनम् अनूद्य तदर्थत्वेन मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नाम अङ्गि विधीयते । तत्र श्रवणे को अधिकार्यादिविशेषः इति जिज्ञासोः उपकाराय अपेक्षिताधिकारिविषयफलानुबन्धत्रयं न्यायेन निर्णेतुं सूत्रयामास "अथातो ब्रह्मजिज्ञासा" इति । तत्र श्रवणं नाम वेदान्तवाक्यतात्पर्यविषयको विचारः । श्रवणमननाभ्यां निर्धारितस्य अर्थस्य अनन्यचित्ततया अनुसंधानमेव निदिध्यासनं च इति ।

वयं तु, मन्यामहे नायं साधुः अभिप्रायः इति । यावता 'तद्विजिज्ञासस्व' इत्यादीनि वाक्यानि कञ्चित् कृत्यविशेषं विधातुं न प्रवृत्तानि इति प्रकरणपर्यालोचनया अवगम्यते । तत्र 'तद्विजिज्ञासस्व' इति वाक्यं तावत् पितरम् उपसृत्य "अधीहि भगवो ब्रह्म" इति परिप्रश्नं कुर्वाणं भृगुं प्रति पितुः वरुणस्य प्रतिवचनम् । एवं 'सोऽन्वेष्टव्यः' इति प्रजापतेः लोकानुग्रहार्थं स्वयम् अनुकम्पया समुपदिष्टं वाक्यम् इति "स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच" इति वाक्यशेषात् अवगम्यते । न तत्र अस्ति वचनम् अमृतत्वकामः श्रवणं कुर्यात् इत्येवम् विधायकम् । एवम् "आत्मा वा अरे द्रष्टव्यः" इत्यपि "प्रव्रजिष्यन् वा अरे अहमस्मि" इत्युक्तवन्तं याज्ञवल्क्यं प्रति "किमहं वित्तेन आवृता अमृता स्याम् उताहोस्विन्नेति" इति प्रश्नोपन्यासं कृतवती मैत्रेयी । तत्प्रतिवचनं "यथैव उपकरणवतां जीवितं तथैव ते जीवितं स्यात्, अमृतत्वस्य तु न आशास्ति वित्तेन" इति प्रतिवचनम् उपश्रुत्य "येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान् वेद तदेव मे ब्रूहि" इति प्रार्थितवती । तत्र मुनेः प्रतिवचनम् "आत्मनस्तु कामाय सर्वं प्रियं भवति" इत्यतः "आत्मा वा अरे

द्रष्टव्यः" इत्याह। तदेवं यथोदाहृतवाक्येषु कुत्रचिदपि श्रवणादिविधिः न दृश्यते। अतः श्रवणादिप्रयुक्त एव विविदिषासंन्यासः, अन्यथा विधिं विना विचारे प्रवृत्तस्य आत्मदर्शनम् अकृत्वा तत उपरमे आरूढपतितत्वं च स्यादिति वादोऽत्र न स्वरसः। "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति विधिप्रेरितस्यैव आत्मलोकप्राप्तीच्छया पारिव्राज्योपपत्तेः। इतश्च सुस्पष्टं च श्रवणादिषु विध्यभावमाह भाष्यकृत् "किमर्थानि तर्हि आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" इत्यादीनि विधिच्छायानि वचनानि? स्वाभाविकप्रवृत्तिविषय-विमुखीकरणार्थानीति ब्रूमः। यो हि बहिर्मुखः प्रवर्तते पुरुषः इष्टं मे भूयात् अनिष्टं माभूत् इति, न च तत्र आत्यन्तिकं पुरुषार्थं लभते। तमात्यन्तिक-पुरुषार्थवाञ्छिनं स्वाभाविकात् कार्यकरणसंघातप्रवृत्तिगोचरात् विमुखी-कृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति "आत्मा वा अरे द्रष्टव्यः" इत्यादीनि। तस्य आत्मान्वषेणाय प्रवृत्तस्य अहेयम् अनुपादेयं च आत्मतत्त्वमुपदिशन्ति "इदं सर्वं यदयमात्मा" (बृ. २-४-६), "यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्, तत्केन कं विजानीयात्", "विज्ञातारमरे केन विजानीयात्" (बृ. ४-५-१५) अयमात्मा ब्रह्म (बृ. २-५-१९) इत्यादिभिः।" (सू. भा. १-१-४)

तस्मात् साधनचतुष्टयसंपन्नस्य श्रुतवेदान्तस्य स्वयमेव जिज्ञासा समुत्पद्यते। श्रवणादिविधिच्छायावचनानि तु प्रत्यगात्माभिमुख्यं कुर्वन्ति न तु कञ्चित् विधिं किञ्चित् विदधति कञ्चिन्नियोजयन्ति वा इति स्पष्टम्। आरूढपतितत्वं तु न श्रवणविधिप्रयुक्तप्रवृत्तित्वात्, किं तु अन्यथैव इत्युप-पादितम् **"तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः"** (सू. भा. ३-४-४०) इति सूत्रभाष्ये —"अत्यंतमात्मानं आचार्यकुले अवसादयन् इति, अरण्यमियात् इति पदं ततो न पुनरेयात् इत्युपनिषत्, आचार्येणा-भ्यनुज्ञातः चतुर्णाम् एकम् आश्रमम्। आविमोक्षात् शरीरस्य सोऽनुतिष्ठेत् यथाविधि॥ इति चैवञ्जातीयको नियमः प्रच्युत्यभावं दर्शयति। यथा च ब्रह्मचर्यं समाप्य गृही भवेत्, ब्रह्मचर्यादेव प्रव्रजेत् इति चैवमादीनि आरोह-रूपाणि वचांसि उपलभ्यन्ते नैवं प्रत्यवरोहरूपाणि, न चैवम् आचाराः शिष्टा

विद्यन्ते । यत्तु पूर्वकर्मसु अनुष्ठानचिकीर्षया प्रत्यवरोहणम् इति । तदसत् । 'श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्' इति स्मरणात्, न्यायाच्च । यो हि यं प्रति विधीयते स तस्य धर्मः न तु यः येन स्वनुष्ठातुं शक्यते "चोदना-लक्षणत्वात् धर्मस्य" (सू. ३-४-४०) इति । तस्मात् श्रवणविधिः न अपेक्षते संन्यासिनः आरूढपतितत्वोपपादनाय । यत्पुनः श्रवणादिविध्यभ्युपगम-दर्शनं क्वचित् तदन्यथा एव नेयम् । तद्यथा—

**त्वंपदार्थविवेकाय संन्यासस्सर्वकर्मणां ।**
**साधनत्वं व्रजन्त्येव शान्तोदान्तानुशासनात् ॥**
**त्वमर्थं प्रत्यगात्मानं पश्येदात्मानमात्मनि ।**
**वाक्यार्थं तत आत्मानं सर्वं पश्यति केवलम् ॥**

उप १८-२११-१२

**यथेष्टाचरणप्राप्तिः संन्यासादिविधौ कुतः ।**
**पदार्थज्ञानबुद्धस्य वाक्यार्थानुभवार्थिनः ॥** २१८

इति दृश्यते उपदेशसाहस्र्याम् । तथा नैष्कर्म्यसिद्धावपि

**त्वमर्थस्यावबोधाय विधिरप्याश्रितो यतः ।**
**तमन्तरेण ये दोषास्तेऽपि नायान्त्यहेतवः ॥**

इति । तत्, ज्ञानं न विधेयम् ज्ञानानन्तरं विधिः क्वचिदपि न सङ्गच्छते इत्येवंपरम् । कथमेतदवगम्यते ?

**अतोऽपुरुषतन्त्रत्वात् नात्मज्ञाने विधिर्भवेत् ।**
**अन्वयादिक्रियात्वस्य तत्तन्त्रत्वात् विधीयते ॥**
**श्रवणं मननं तद्वत् तथा शमदमादि यत् ।**
**पुमान् शक्नोति तत्कर्तुं तस्मादेतद्विधीयते ॥**

बृ. वा. २-४-१२१, १२२

इति स्पष्टम् । एवम् उपदेशसाहस्र्यामपि संन्यासं सर्वकर्मणां साधनत्वं व्रजत्येव, 'शान्तोदान्तानुशासनात्' इत्यत्र शमादीनां पश्येत् इति विधानात्, शमादीनां च संन्यासिनामेव कात्स्न्येन शक्यलाभात्, संन्यासः ज्ञानाङ्गसाधनं भवतीत्यर्थः । एवं यथेष्टाचरणप्राप्तिः इत्यत्रापि विरक्तस्य पारिव्राज्यविधानात् तस्य च शमादिविधानात् 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इति गुर्वभिगमनस्य विज्ञानाङ्गत्वेन विधानाच्च न स्वेच्छाप्रवृत्तिसम्भवः इत्येव अभिप्रायः । अत एव श्रवणादिविधिः आत्मानुभवार्थः इति पक्षः कण्ठरवेण निराकृतः उपदेशसाहस्रीकारैः—

**"अशनायादिनिर्मुक्तः सिद्धो मोक्षः त्वमेव सः ।**
**श्रोतव्यादि तवेत्येतद्विरुद्धं कथमुच्यते ॥** उप. १८-२०६

इति । तस्मात् अयमत्र निष्कर्षः—वाक्यार्थज्ञानार्थं प्रवृत्तः स्वयमेव श्रवणादिकं करोति इति न तं प्रति तद्विधीयते । अपि तु बहिर्मुखस्य परमपुरुषार्थसाधनम् अपश्यतः आत्मश्रवणादिकमेव आत्मज्ञानजननद्वारा अमृतत्वसाधनम् इति प्रत्यङ्मुखत्वं कार्यते इति तावन्मात्रेण नियमविधित्वं श्रवणादीनाम् । आत्मैव श्रोतव्यो मन्तव्यश्च न अनात्मा, स एव अन्वेष्टव्यत्वात्, एवमन्वेष्टव्यः इति च। एतदेव अभिप्रेत्य सूत्रभाष्ये 'विधिच्छायावचनानि' इत्युक्तम् । अस्ति तत्र विधिकृत्यं किञ्चित् यावता आत्मैव श्रवणमननरूपान्वेषणेन वेदितुम् एष्टव्यः इति प्रत्यगात्मस्रोतस्तया प्रवर्तनं संन्यासिनः चित्तस्य इति । न तु श्रवणज्ञाने मननफलभूतज्ञाने वा प्रवर्तनं शक्यकरणं श्रुत्यापि । वस्तुतंत्रत्वात् ज्ञानस्य इति ज्ञेयम् ।

## ४. मननिदिध्यासनयोः विवेकः

अथ किंलक्षणं मननं किंलक्षणं वा निदिध्यासनम् इति किञ्चित् विमृश्यते । तत्र **'मननं नाम श्रुतार्थस्यैव युक्तिभिः विचारः । निदिध्यासनं तु ध्यानेन श्रुतार्थस्य अपरोक्षीकरणम्'** इत्येके । श्रवणमनन-

निदिध्यासनानां ब्रह्मसाक्षात्कारोदयपर्यन्तम् आवृत्तिः कार्या, '**आवृत्तिर-सकृदुपदेशात्**' (ब्र. सू. ४-१-१) इति ते मन्यन्ते। अपरे तु श्रवणादेव साक्षात्कारो भवेत्, मनननिदिध्यासने तु असंभावनाविपरीतभावनारूप-प्रतिबन्धद्वयनिरासद्वारेण एव उपयुज्येते इति मन्यन्ते। तत्र श्रवणं नाम वेदान्तवाक्यतात्पर्यस्य अवधारणम् इत्यत्र सर्वसंप्रतिपत्तिः अस्ति। मननं तु युक्तिभिः अनुचिन्तनम् इति तु अर्धसत्यं, यतः भाष्यकार आह

"यदपि श्रवणव्यतिरेकेण मननं विदधत् शब्द एव तर्कमपि आदर्तव्यं दर्शयति इत्युक्तम्। न अनेन मिषेण शुष्कतर्कस्य अत्र आत्मलाभः सम्भवति। श्रुत्यनुग्रहीत एव हि अत्र तर्कः अनुभवाङ्गत्वेन आश्रीयते। स्वप्नान्तबुद्धान्तयोः उभयोः इतरेतरव्यभिचारात् आत्मनः अनन्वागतत्वं, संप्रसादे च प्रपञ्चपरित्यागेन सदात्मना संपत्तेः निष्प्रपञ्चसदात्मत्वं, प्रपञ्चस्य ब्रह्मप्रभवत्वात् कार्यकारणयोः अनन्यत्वन्यायेन ब्रह्माव्यतिरेकः इत्येवञ्जातीयकः। "तर्काप्रतिष्ठानात्" (ब्र. सू. २-१-११) इति च केवलस्य तर्कस्य विप्रलम्भत्वं दर्शयिष्यति" (सू. भा. २. १. ६) इति।

अन्येऽपि श्रुत्यनुग्रहीततर्काः दुन्दुभिदृष्टान्ताद्युपबृंहिताः अत्र अनुसन्धेयाः। श्रुत्यनुकूलोऽपि तर्कः मननशब्देन गृह्यतैव। केवलतर्कस्यैव अत्र निषेधात्। तत्रोदाहरणं अत्रैव "दृश्यते तु" इति सूत्रभाष्ये वाक्यशेषेण दर्शितम् "चेतनकारणश्रवणबलेनैव समस्तस्य जगतः चेतनतां उत्प्रेक्षते। तस्यापि "विज्ञानं चाविज्ञानं च इति चेतनाचेतनविभागश्रवणं विभावना-विभावनाभ्यां चैतन्यस्य शक्यते एव योजयितुम्" इति। तस्मात् मननं नाम श्रुत्यनुगृहीतः श्रुत्यनुगुणश्च इति द्विविधतर्क एव इति अवगम्यते।

अथ निदिध्यासनं यत्तु पठ्यते निदिध्यासनं नाम श्रवणमननाभ्यां निर्धारितस्य अर्थस्य अनन्यचित्ततया अनुसंधानम् इति। तत्र यदि अयमभि-प्रायः—आत्मतत्त्वस्य श्रुत्यनुगुणेन चिन्तनेन तदपिधानस्येव प्रतिभासतो

अनात्मनः तिरस्करणेन आत्मभावावस्थानानुकूलः चित्तव्यापारः तत्र ओम् इति ब्रूमः। यतः निदिध्यासनं एवंलक्षणमिति श्रुत्या एव निर्दिष्टं "स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती प्रियं भाषसे एह्यास्व व्याख्यास्यामि ते व्याचख्याणस्य तु मे निदिध्यासस्वेति" इति। अत्र व्याख्यातार्थं प्रणिधान-पूर्वकं निश्चिनु इत्यर्थे निदिध्यासस्व इति पदं प्रयुक्तमिति स्पष्टम्। यत्तु कैश्चिदुच्यते-निदिध्यासनं नाम भावनाविशेषः येन समाधिरवाप्यते, तेन च आत्मसाक्षात्कारः इति, तदसत्। आत्मनः नित्यापरोक्षत्वात् "यत्साक्षादपरो-क्षात् ब्रह्म" इति श्रुतेः। पदार्थविषयकाज्ञानस्य निरासार्थमेव मननं तच्च अन्वयव्यतिरेकाख्यतर्केण देहाद्यनात्माध्यारोपस्य अपोहनमेव। न देश-कालादिव्यवहितवस्तुन इव व्यवधानापनयनेन साक्षात्करणम्। तदुक्तं— "तत्र येषाम् एतौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ तेषां तत्त्वमसि इत्येतद्वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति, पदार्थज्ञानपूर्वकत्वात् वाक्यार्थस्य इत्यतः तान् प्रति एष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्य-भ्यासः। यद्यपि च प्रतिपत्तव्य आत्मा निरंशः तथापि अध्यारोपितं तस्मिन् बह्वंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम्। तत्र एकेन अवधानेन एकमंशम् अपोहति, अपरेण अपरम् इति युज्यते तत्र क्रमवती प्रतिपत्तिः। येषां पुनः निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धः अस्ति, ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थं अनुभवितुम् इति तान्प्रति आवृत्त्यानर्थक्यं इष्टमेव" (ब्र. सू. ४-१-२) इति। तदेवं श्रवणमात्रेण उत्तमाधिकारिणामात्मानुभवः, तदशक्तानां शास्त्रयुक्त्यावृत्तिलक्षणं मननम् अपि अपेक्षते इति स्थितम्। निदिध्यासनं पुनः प्रत्यङ्मुखीभूय इन्द्रियादीनाम् उत्तरोत्तरं सूक्ष्मव्यापकप्रत्यक्तरे स्वस्वकारणे प्रविलयपूर्वकः आत्मतत्त्वदर्शने यत्नविशेषः प्रणिधानलक्षणः। अत एव काठके "श्रवणायापि बहुभिर्यो नलभ्यः" (का. १-२-७) इति श्रवणमात्रेण अलब्धात्मनां मननम् उक्त्वा—

**एष सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते।**
**दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥**

**यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।**
**ज्ञानमात्मनि महति नियच्छेत् तद्यच्छेच्छान्त आत्मनि ॥**
का. १-३-१२-१३

इति मननेऽपि असञ्जातात्मदर्शनानाम् अध्यात्मयोगः उपदिष्टः।

**तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।**
**अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥**
का. १-२-१२

इति तेन योगेन आत्मदर्शनं सम्भवति इत्युक्तम्। अयमेव अध्यात्मयोगः ध्यानयोगसंज्ञितः भगवद्गीतासु उपदिष्टः परमात्मदर्शनोपायतया—

**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।**
**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥** गी. ६-२९

इति। इमं च योगम् उत्तरत्र परमहंसनित्यकृत्यविचारावसरे पुनरपि विस्तरेण निरूपयिष्यामः इति आस्तां तावत्।

## ५. उपसंहारः

तदेवं विद्वत्संन्यासी प्राप्तविद्वत्त्वादेव कृतकृत्यः परमहंसो मुख्यः। नित्यं ब्रह्मणि अवस्थितत्वादेव च सः न विधिकिङ्करः नित्यनिरस्ताविद्याकामकर्मत्वात् सर्वकर्मसंस्पर्शविधुरः स्वभावत एव निवृत्तिधर्मनिष्ठः। तस्मिन् निवृत्तिधर्मनिष्ठत्वमपि उपचारत एव उच्यते वेदान्तसंप्रदायविद्भिः। यथोक्तं भगवता

**सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।**
**नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥** गी. ५-१३

अत्र भाष्यम्—"त्यक्तवाङ्मनःकायचेष्टः निरायासः प्रसन्नचित्तः

आत्मनोऽन्यत्र निवृत्तसर्वबाह्यप्रयोजनः इति सुखम् आस्ते इत्युच्यते । वशी जितेन्द्रिय इत्यर्थः । क्व कथम् आस्ते इत्याह नवद्वारे पुरे । सप्त शीर्षण्यानि आत्मनः उपलब्धिद्वाराणि, अर्वाक् द्वे मूत्रपुरीषविसर्गार्थे । तैः द्वारैः नवद्वारं पुरम् उच्यते शरीरम् । पुरं इव पुरम् आत्मैकस्वामिकम् । तदर्थप्रयोजनैश्च इन्द्रियमनोबुद्धिविषयैः अनेकफलविज्ञानस्य उत्पादकैः पौरैः इव अधिष्ठितम् । तस्मिन् नवद्वारे पुरे देही सर्वं कर्म संन्यस्य आस्ते । किं विशेषणेन ? सर्वो हि देही संन्यासी असंन्यासी वा देहे एव आस्ते । तत्र अनर्थकं विशेषणम् इति । उच्यते । यस्तु अज्ञः देही देहेन्द्रियसंघातमात्रात्मदर्शी स सर्वः "गेहे भूमौ आसने वा आसे" इति मन्यते । न हि देहमात्रात्मदर्शिनः गेहे इव देहे आसे इति प्रत्ययः संभवति । देहादिसंघातव्यतिरिक्तात्मदर्शिनस्तु 'देहे आसे' इति प्रत्ययः उपपद्यते । परकर्मणां च परस्मिन् आत्मनि अविद्यया अध्यारोपितानां विद्यया विवेकज्ञानेन मनसा संन्यासः उपपद्यते । उत्पन्नविवेकज्ञानस्य सर्वकर्मसंन्यासिनोऽपि गेहे इव देहे नवद्वारे पुरे आसनं प्रारब्धफलकर्मसंस्कारशेषानुवृत्त्या । देहे एव विशेषविज्ञानोत्पत्तेः देहे एव आस्ते इति अस्त्येव विशेषणफलम् । विद्वदविद्वत्प्रत्ययभेदापेक्षत्वात् ॥" (गी. भा. ५. १३)

इदं च पराध्यारोपितदेहित्वदृष्ट्यैव । स्वयं तु अशरीर एव अयम् इत्यवोचाम । अतो निवृत्तिरपि विदुषः उपचारत एव व्यवह्रियते इति उक्तं गीताभाष्ये "विक्रिया एव हि भोगकर्मणी । अथ एवं सति फलार्थित्वात् अविद्वान् प्रवर्तते । विदुषः पुनः अविक्रियात्मदर्शिनः फलार्थित्वाभावात् प्रवृत्त्यनुपपत्तौ कार्यकरणसंघात-व्यापारोपरमे निवृत्तिः उपचर्यते ।" (गी. भा. १३-२) इति । यावता व्यावहारिकी निवृत्तिरपि कर्मैव । "अकर्मणि च कर्म यः" इत्युक्तत्वात् । अतः नित्यनिवृत्तस्वभावे विदुषि निवृत्तिशब्दप्रवृत्तिरपि उपचारत एव इति भावः । एवं भिक्षाटनादिकर्म व्यवहारदृष्ट्या कुर्वन्नपि स्वदृष्ट्या सः नैव करोति । तदप्युक्तं गीताभाष्ये "लोकव्यवहारसामान्यदर्शनेन तु लौकिकैः आरोपितकर्तृत्वे भिक्षाटनादौ कर्मणि कर्ता भवति ।

स्वानुभवेन तु शास्त्रप्रमाणजनितेन अकर्तैव । स एवं पराध्यारोपितकर्तृत्वः शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्म कृत्वापि न निबध्यते। बन्धहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निना दग्धत्वात्" (गी. भा. ४-२२) इति। एतेन यदुच्यते कैश्चित् अधुनातनवेदान्तिभिः विविदिषासंन्यासकाले निरन्तरम् अनुष्ठितैः श्रवणमनननिदिध्यासनैर्हि उत्पन्नतत्त्वसाक्षात्कारो यः पुरुषधौरेयः तस्य इदं दण्डादित्यागपुरस्सरं जातरूपधरत्वाश्रयणमेव विद्वत्संन्यासः इति तदपि निरस्तं भवति । न हि जातरूपत्वं दण्डकाषायादि-भूषितत्वं वा विद्वदविद्वत्संन्यासत्वप्रयोजनकरो धर्मः, किं तर्हि सम्यग्दर्श-नार्थाय सर्वकर्मसंन्यासपूर्वकं विद्यासाधनानुष्ठाननिरतत्वमेव इति श्रुतिस्मृतिसिद्धम्। जातरूपधरत्वं तु अनाश्रमित्वलिङ्गमपि क्वचिदेव विद्वत्सु दृश्यते इत्यन्यदेतत्। यथा भगवान् भाष्यकारः "संवर्तप्रभृतीनां नग्नचर्यादियोगात् अनपेक्षिताश्रमकर्मणामपि महायोगित्वं स्मर्यते इतिहासे" (सू. भा. ३-४-३७) इति।

अत एव विदुषोऽपि संन्यासिनः क्वचित् तत्त्वज्ञानातिशयपरत्वं विधीयते इति अङ्गीकृतं भाष्यकारैः। तथाहि श्रुतिः "पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः अमौनं च मौनं च निर्विद्याथ ब्राह्मणः (बृ. ३-५-१) इति । तत्र पाण्डित्यं पण्डितभावः आत्मज्ञा-नम्। बाल्यं बालवत् दम्भदर्पाद्यभावः। मुनित्वं च मौनं ज्ञानाभ्यासे एव निष्ठा। तत्र विद्वत्संन्यासिनोऽपि व्यवहारदृष्ट्या मौनं विधीयते इत्याह भाष्यकृत्—"ज्ञानाभ्यासश्च प्रधानम् इह यतीनां अनुष्ठेयम् । न च सकलायां बालचर्यायां अङ्गीक्रियमाणायां ज्ञानाभ्यासः सम्भाव्यते। तस्मादान्तरो भावविशेषो बालस्य अप्ररूढेन्द्रियत्वादिः इह बाल्यम् आश्रीयते। तदाह अनाविष्कुर्वन् इति। ज्ञानाध्ययनधार्मिकत्वादिभिः आत्मानम् अविख्या-पयन् दम्भदर्पादिरहितो भवेत्। यथा बालः अप्ररूढेन्द्रियतया न परेषाम् आत्मानम् आविष्कर्तुम् ईहते तद्वत् । एवं हि अस्य वाक्यस्य प्रधानोपकार्य-र्थानुगम उपपद्यते"। (सू. भा. ३-४-५०) इति। "तस्मात् बाल्यपाण्डित्या-

पेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते। यत्तु बाल्य एव विधेः प्रर्यवसानमिति, तथापि अपूर्वत्वात् मुनित्वस्य विधेयत्वम् आश्रीयते मुनिः स्यादिति। निर्वेदनीयत्वनिर्देशादपि मौनस्य बाल्यपाण्डित्यवत् विधेयत्वाश्रयणम्। तद्वतः विद्यावतः संन्यासिनः। कथं च विद्यावतः संन्यासिनः इत्यवगम्यते ? तदधिकारात्। "आत्मानं विदित्वा पुत्राद्येषणाभ्यो व्युत्थाय अथ भिक्षाचर्यं चरन्ति" इति। ननु सति विद्यावत्त्वे प्राप्नोत्येव तत्र अतिशयः किं मौनविधिना इति ? अत आह 'पक्षेण' इति। एतदुक्तं भवति, यस्मिन् पक्षे भेददर्शनप्राबल्यात् न प्राप्नोति तस्मिन्नेष विधिः इति" (सू. भा ३-४-४७) इति। अत्र प्रारब्धकर्मवशात् ज्ञानिनोऽपि बाहिर्मुख्ये सति मौनात् प्रच्युतिर्भवेत्। तस्मिन् पक्षे एष नियमविधिः इत्युक्तम्। इत्थं च विद्वत्संन्यासिनः प्राप्तसम्यग्दर्शना एव विद्याबलात् स्वात्मनि अवस्थिताः स्वभावत एव निवृत्तिधर्मनिष्ठा भवन्ति। न तु कर्तव्यावशेषसद्भावात्। यत्र तु शास्त्रे तान् प्रत्यपि क्वचिद्विषये किञ्चित् विधीयते इव तत्र व्यावहारदृष्ट्या प्रारब्धकर्मक्षपणेन एषां देहानुवृत्तिम् अभ्युपगम्य ज्ञाननिष्ठायामेव अवस्थितिः नियम्यते इति स्थितम्। विविदिषवस्तु संन्यासिनः विद्यार्थमेव गुरुमुपसृत्य तन्निर्देशानुगुणं वेदान्तश्रवणादिषु व्यापृताः आचार्ये समुपलभ्यमानान् संन्यासिधर्मान् अनुकृत्य यत्नेन ज्ञानसाधनानि अनुतिष्ठन्ति। ज्ञानपरिपाकार्थत्वादेव पारिव्राज्यस्य। तदुक्तं सूत्रभाष्ये "ब्रह्मज्ञानपरिपाकाङ्गत्वाच्च पारिव्राज्यस्य न अनधिकृतविषयत्वम्। तच्च दर्शयति "अथ परिव्राड् विवर्णवासाः मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति" (जा. ५) इति।" गीताभाष्येऽपि उक्तम् "ननु विरुद्धमिदमुक्तं "ज्ञानस्य या परा निष्ठा तया माम् अभिजानाति" इति। कथं विरुद्धम्? इति चेत्, उच्यते। यदैव यस्मिन् विषये ज्ञानम् उत्पद्यते ज्ञातुः तदैव तं विषयम् अभिजानाति ज्ञाता इति, न ज्ञाननिष्ठां ज्ञानावृत्तिलक्षणाम् अपेक्षते इति। ततश्च ज्ञानेन नाभिजानाति ज्ञानावृत्त्या तु ज्ञाननिष्ठया अभिजानातीति। नैष दोषः। ज्ञानस्य स्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्य प्रतिपक्षविहीनस्य यत् आत्मानु-

भवनिश्चयावसानत्वं तस्य निष्ठाशब्दाभिलापात्। शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुसहकारिकारणं बुद्धिविशुद्धत्वादि अमानित्वादि च अपेक्ष्य जनितस्य क्षेत्रज्ञपरमात्मैकत्वज्ञानस्य कर्तृत्वादिकारकभेदबुद्धिनिबन्धनसर्वकर्मसंन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्थानं सा परा ज्ञाननिष्ठा इत्युच्यते। सेयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिः इत्युक्ता। तया परया भक्त्या भगवन्तं तत्त्वतः अभिजानाति। यदनन्तरमेव ईश्वरक्षेत्रज्ञभेदबुद्धिः अशेषतो निवर्तते। अतः ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानातीति वचनं न विरुध्यते। अत्र च सर्वं निवृत्तिविधायि शास्त्रं वेदान्तेतिहासपुराणस्मृतिलक्षणं न्यायप्रसिद्धम् अर्थवत् भवति।" (गी. भा. १८-५५) इति। तदेवं विद्वत्संन्यासी यस्मिन्नेव ब्रह्मात्मनि निष्ठितो भवति विद्याबलात्, तस्मिन्नेव निष्ठां प्राप्तुं श्रुतिस्मृतीतिहासपुराणानां एकवाक्यताम् आपाद्य शास्त्रतात्पर्यं गुरुमुखात् निश्चित्य श्रुत्यादिविहितनिवृत्तिधर्मं गुर्वनुष्ठानानुकारेण अनुष्ठाय यो ज्ञानोत्पत्तये ज्ञानपरिपाकाय च निरन्तरं यतते स एव विविदिषासंन्यासी इति सर्वम् अनवद्यम्।

॥ इति श्रीबोधानन्देन्द्रसरस्वतीशिष्येण सच्चिदानन्देन्द्रसरस्वतीभिक्षुणा प्रणीतायां पारमहंस्यमीमांसायां **परमहंसधर्मनिरूपणं** नाम चतुर्थोऽध्यायः ॥

# पञ्चमोऽध्यायः

## परमहंसस्य दैनन्दिनकृत्यनिरूपणम्

### १. विद्वत्संन्यासिनः ब्रह्मनिष्ठाव्यतिरेकेण नैव कर्तव्यमस्ति

अथ विविदिषुसंन्यासिनः परिव्राजकस्य दैनन्दिनाचारादिकृत्यं विमृश्यते। तत्र सर्वथापि विदुषः निष्क्रियात्मनि अवस्थितत्वात् नासौ विधिकिङ्करः इति न तं प्रति शास्त्रनियोगोऽपि सम्भवति। यथोक्तम् ऐतरेयभाष्ये—

"फलादर्शनेऽपि नियुक्तत्वात् करोति इति चेत्, न, नियोगाविषयात्मदर्शनात्। इष्टयोगम् अनिष्टयोगं वा आत्मनः प्रयोजनं पश्यन् तदुपायार्थी यो भवति स नियोगस्य विषयो दृष्टो लोके, न तु तद्विपरीतनियोगाविषयब्रह्मात्मत्वदर्शी। ब्रह्मात्मत्वदर्शी अपि सन् चेत् नियुज्येत, नियोगाविषयोऽपि सन्न कश्चिन्न नियुक्त इति सर्वं कर्म सर्वेण सर्वदा कर्तव्यं प्राप्नोति। तच्चानिष्टम्। न च स नियोक्तुं शक्यः केनाचित्। आम्नायस्यापि तत्प्रभवत्वात् (ऐ. अव. भा.) इति।

गीतास्वपि—

**यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।**
**आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते॥**
**नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।**
**न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥** गी. ३-१७-१८

इति सम्यग्दर्शने वर्तमानस्य विद्वत्संन्यासिनः सर्वथा कर्माभाव एव दर्शितः।

## २. आचार्यस्य सतस्तु लोकसङ्ग्रहार्थं कर्म

यस्तु पुनः श्रोत्रियो ब्रह्मनिष्ठः सन्नपि आत्मानम् उपगतं साधनचतुष्टय-संपन्नं शिष्यं बुभुत्सुं कारयितुं प्रारब्धकर्मवशात् प्रवृत्तः स आचार्यभूतः संन्यासी स्वयम् आचारवान् आश्रमधर्मवन्तमेव शिष्यं बोधयितुं प्रवर्तते। तस्य स्वप्रयोजनाभावेऽपि लोकसङ्ग्रहार्थम् अनुष्ठीयमानम् आश्रमकर्म वर्तते एव।

आचार्यस्तु ऊहापोहग्रहणधारणशमदमदयानुग्रहादिसंपन्नो लब्धागमः दृष्टादृष्टभोगेषु अनासक्तः दम्भदर्पकुहकशाठ्यमायामात्सर्यानृताहङ्कारमम-त्वादिदोषविवर्जितः केवलपरानुग्रहप्रयोजनः विद्योपयोगार्थी पूर्वम् उपदिशेत्" (उप. सा. ग. पू)

आचार्यशब्दव्युत्पत्तिबलादपि एवमवगम्यते।

**आचिनोत्यपि शास्त्राणि आचारे स्थापयत्यपि।**
**स्वयमाचरते यस्मात् आचार्यस्तेन स स्मृतः॥**

इति आचार्यं वर्णयन्ति। विविदिषुस्तु तमीदृशम् आचार्यं शुश्रूषादिना आवर्जितवान् तेनोपदिष्टानेव आश्रमधर्मान् सेवमानः तन्निकटे तत्त्वज्ञानार्थं वेदान्तमभ्यसेत् इत्यर्थसिद्धम्।

## ३. विविदिषुसंन्यासिनः स्नानादिकम्

एवं विविदिषोः परमहंसस्य स्वाचार्यभूतविद्वत्संन्यास्याचारानुकरणं धर्मविषये वृत्तविषये विचिकित्सायां, श्रुतिस्मृतिविहिततुरीयाश्रमनिष्ठत्वं, विद्याप्राप्तिविरोधिचित्तविक्षेपकाचारवर्जनं च, स्वधर्मः इति स्थितम्। अथ एतद्दृष्ट्या अर्वाचीननिबन्धेषु उपदिष्टाः कतिचित् नियमाः विमृश्यन्ते। प्रथमं तावत् नारदवचनमिति कृत्वा विहितानि इति षट्कर्माणि विचार्यन्ते।

**भिक्षाटनं जपो ध्यानं स्नानं शौचं सुरार्चनम्।**
**कर्तव्यानि षडेतानि यतीनां नृपदण्डवत्॥**

इति यदुच्यते तत्र स्नानशौचे तावत् सर्वयतिसाधारणत्वात् स्मृत्युक्त-प्रकारेण अवश्यं कर्तव्ये। तत्र विशेषश्च यावच्चित्तविक्षेपकरः तावत् स विकल्प एव। जपो ध्यानम् इति यदि प्रणवजपो विवक्षितः ब्रह्मध्यानं च श्रुतिविहितं, तर्हि यथागुरूपदिष्टम् अवश्यम् अनुष्ठातव्यमेव द्वयमपि स्वचित्तभूमिकानुगुण्येन। महावाक्यजपस्तु न कार्यः, श्रुत्या विहितत्वा-भावात्, विद्योत्पत्तिविघातकत्वाच्च इत्युक्तम्। सुरार्चनमिति हरिहरान्य-तरार्चनमिति केचित् व्याचक्षते। तत्र शालग्रामबाणलिङ्गादिपूजनं चेत् विवक्षितं तन्न कर्तव्यम्। ध्यानज्ञानयोः सम्पादनीययोः विघ्नकरत्वात्, पूजासामग्रीसम्पादनादिव्यग्रचित्तत्वकरणेन अद्वैतानुसन्धानविरोधात्। भिक्षाटनं तु सर्वथापि परिग्रहरहितस्य संन्यासिनः शरीरस्थितिहेतुत्वात् स्वतः प्राप्तं श्रुत्या अभ्यनुज्ञायते इति तस्य नृपदण्डवत् कर्तव्यत्वं नोपपद्यते इति स्पष्टमेव। न हि शास्त्रविहितं तत् अदृष्टफलजनकतया इति स्पष्टमेव।

## ४. विविदिषोः दैनन्दिनकृत्यम्

अथास्य गुरुसमीपे वेदान्तश्रवणार्थं तिष्ठतः दैनन्दिनकृत्यं संक्षिप्य उच्यते। प्रातरुत्थाय प्रातःस्मरणं वेदान्तस्तोत्रं पठित्वा गुरुमभिवन्द्य तदनुज्ञया बहिर्गत्वा शास्त्राभ्यनुज्ञातप्रदेशे स्मृत्युक्तरीत्या मूत्रपुरीषोत्सर्गं कृत्वा यथाविधि एतच्छौचम्—"गृहस्थानां द्विगुणं, ब्रह्मचारिणां त्रिगुणं, वानप्रस्थानां यतीनां चतुर्गुणम्" इति मन्वाद्युक्त्यनुसारेण शौचं कुर्यात्। गन्धलेपक्षयं तु यथा भवेत् "लघुशौचे षड्गण्डूषां ततः कृत्वा प्राणायामत्रयं चरेत्" इति वदन्ति। अथ दन्तधावनं कुर्यात् निषिद्धकाष्ठवर्जनपूर्वकम्। ततः स्नानं कर्तव्यम्। तत्र—

**स्नानं त्रिषवणं प्रोक्तं नियमाः सन्ति दण्डिनः।**
**नैतत् परमहंसानां मुक्तानामात्मदर्शिनाम्॥**

इत्यत्रिवचनम्,

**स्नानं त्रिषवणं प्रोक्तं बहूदकवनस्थयोः ।**
**हंसे तु सकृदेव स्यात् परहंसे न विद्यते ॥**

इति मेधातिथिवचनं च केचित् उदाहरन्ति । तत्र ज्ञानी न स्नानादिकर्मसु विधिप्रयुक्तः प्रवर्तते इत्येव तात्पर्यं कल्पनीयम् । विविदिषुस्तु असति बाधके यत्सामान्यनियमास्तान् परिपालयेत् इति प्रतिभाति नः । आपत्काले यथाशक्ति शास्त्राभ्यनुज्ञाताः अनुकल्पाः आश्रयणीयाः इति च । अथ आचमनवस्त्रधारणादिकं कर्तव्यम् । अत्र आचमने द्विराचमने निमित्तान्याह याज्ञवल्क्यः—

**स्नात्वा पीत्वाक्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।**
**आचान्तः पुनराचामेत् वासोऽपि परिधार्य च ॥**

इति । अनुकल्पश्च स्मृतः दक्षिणश्रवणस्पर्शनादिः उदकाभावे । ततः प्राणायामः, तेन वृक्षमूलत्वं सिध्यति यतेः—

"वेदो वृक्षः तस्य मूलं प्रणवो यस्य सोऽस्ति स वृक्षमूलो यतिस्तस्मात् त्यक्तवेदोऽपरिग्रहः" इति स्मृतेः ।

स च प्रणवेनैव कर्तव्य इत्याह वसिष्ठः—

**प्रणवेनैव कुर्याच्च प्राणायामान् यतिर्मुहुः ।**
**सर्वेषामपि पापानां सङ्घाते समुपस्थिते ॥**
**चतुर्विंशतिमावृत्तिं षट्त्रिंशत् द्वादशाथवा ।**
**प्रणवस्य स्मरेत् तत्स्यात् प्राणायामो यतानिलः ॥**

इति सर्वेषामपि वेदानां प्रणवे प्रवेशितत्वात् प्रणवेनैव तस्य वेदाभ्यासः कृतः स्यात् । प्रणवपूर्वकमेव च कृतं सर्वं संपन्नं भवेत्साधनम् ।

## ५. अथ जपः

**तत्र तैत्तिरीयके** "यश्छन्दसामृषभो विश्वरूप" इति प्रणवोपासनं **विहितम्**। भाष्ये च "इदानीं सर्वोपासनाङ्गभूतमपि ओङ्कारस्य उपासनं **विधित्स्यते**। परापरब्रह्मदृष्ट्या हि उपास्यमान ओङ्कारः शब्दमात्रोऽपि **परापरब्रह्म**प्राप्तिसाधनं भवति। स हि आलम्बनं ब्रह्मणः परस्य अपरस्य च **प्रतिमेव** विष्णोः (तै. भा. १-७).

तत्र उच्चैरूपांशु-मानसानाम् उत्तरोत्तरं प्रशस्तत्वं ज्ञेयम्—

**उपांशुजपयोगस्तु तस्माच्छतगुणो भवेत्।**
**सहस्रो मानसः प्रोक्तः यस्मात् ध्यानसमो हि सः॥**

इति योगियाज्ञवल्क्यवचनात्। तत्र उच्चैः जपस्य अभ्यासात् उपांशुजपे, तदभ्यासबलात् मानसे च अधिकृतो भवेत्। तत्र नियतकालं वक्ष्यमाणरीत्या ध्यानं कृत्वा ततः पश्चात् जपः कार्यः।

**छान्दोग्ये** "त्रयो धर्मस्कन्धा" इत्यारभ्य ब्रह्मसंस्थो अमृतत्वमेति" इति एवंपर्यन्तम् ओङ्कारो व्याहृत्यात्मकः "ओङ्कार एवेदं सर्वम्" (छां. २-२३-१-५) इति। तत्राप्योङ्कारो ब्रह्मप्रतीकत्वेन एव निर्दिष्ट इति भाष्यात् गम्यते। "एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् (का. २-१-१६) इति परापर-ब्रह्मालम्बनत्वेनैव प्रणवः संस्तुतः। **आथर्वणे च प्रश्नोपनिषदि**—"एतद्वै सत्यकाम परं चा परं च ब्रह्म यदोङ्कारः। तस्माद् विद्वान् एतेनैवायतनेन एकतरमन्वेति" इत्युपास्य ओङ्कारः इत्युक्तम्।

**बृहदारण्यकेऽपि** "ओं खं ब्रह्म" इति ध्यानर्थमेव आलंबनत्वेन ओङ्कार उपदिष्टः।

**मुण्डके तु**

**"प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।**
**अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्॥** मुं. २-२-४

इति प्रणवाभ्यासेन सर्वबौद्धप्रत्ययसाक्षिपरमात्मतन्मयता संपादनीया इत्युक्तम्।

**प्रश्नोपनिषदि च**—यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत" इति ओङ्कारंप्रतीकत्वेन ध्यायतः, सूर्यद्वारेण ब्रह्मलोकं गत्वा निर्गुणं ब्रह्मेक्षते" इत्युक्तम्।

**गीतासु तु—ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।**
**यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥** ८-१३

इत्यत्र अक्षरं व्याहरन् मामनुस्मरन्निति व्याहरणक्रियोपादानात् प्रणवजपो विहितः इति अभ्युपगन्तुं युक्तम्। अनुष्ठानोत्तरकालमपि वेदान्तश्रवणाद्यव्यापृतकाले जपनिष्ठ एव भवेत् साधकः। तदुक्तं पाद्मे—

**परहंसव्रती यस्तु प्रणवाभ्यासशीलतः।**
**यद्यनुत्पन्नविज्ञानो विरक्तः संयतेन्द्रियः॥**
**यावज्जीवं जपेन्मन्त्रं प्रणवं ब्रह्मणो वपुः।**
**ह्रस्वो दहति पापानि दीर्घो मोक्षप्रदायकः॥**
**प्लुतस्तु सर्वसिद्ध्यै स्यात् प्रणवस्त्रिविधः स्मृतः।**
**अ ऋग्वेद उ यजुर्वेदः मकारः सामसंज्ञकः॥** इति।

तत्र संख्याविषये केचिदाहुः—

**जपेद्द्वादशसाहस्रं प्रणवस्य प्रयत्नतः।**
**सहस्रं श्रवणार्थी तु योगाभ्यासी शतं जपेत्॥**
**निर्विकल्पसमाधिस्तु न जपेत् किञ्चिदद्वयात्।** इति।

तेन यथाशक्ति क्लृप्तकाले प्रणवपरो भवेदिति सिध्यति ॥

एवं जपसमाप्तौ—

**हे पुण्डरीक विश्वात्मन् मन्त्रमूर्ते जनार्दन ।**
**गृहाणेमं जपं नाथ मम दीनस्य शाश्वत ॥**

इति श्लोकेन जपनिवेदनं केचिदिच्छन्ति । "ओं तत् सत् ब्रह्मार्पणम्" इत्येतावतापि अलं स्यात् श्रद्धाभक्तियुक्तनिवेदने इत्यस्मन्मतिः । अथ प्रतिदिनं प्रणवार्थमपि अनुसन्दध्यात् । प्रणवमेव वा उपसीत, यथागुरूपदिष्टं यथाचित्तभूमिकातः ध्यानयोग्यता । तत्प्रकारस्तु परिशिष्टे द्रष्टव्यः ।

अनन्तरं गुरुसन्निधौ वेदान्तग्रन्थपाठं तन्मुखात् तदर्थश्रवणं च कार्यम् । श्रवणात्पूर्वं गुरुप्रणामं कृत्वा प्रणवोच्चारपूर्वकं उपनिषदाम्, ईश्वरगीतानां, बादरायणीयशारीरकमीमांसाशास्त्रश्रवणं कार्यम् । तदर्थमेव हि तेन प्रव्रजितम् । तत्र श्रवणादौ अन्ते च प्रणवोच्चारणं कुर्यात् । तत्र गुरुपरम्परा-स्मरणं शान्तिपाठश्च साम्प्रदायिकः । तदर्थानुसंधानं च आध्यात्मिकाद्युप-सर्गनाशेन दृष्टद्वारा इदम् उपकारकम् । अतः गुरुमुखात् श्रवणे शान्तिपाठः, दक्षिणामूर्त्यष्टकपठनं च स्मृतिविहित्वाभावेऽपि वेदान्तार्थानुसंधान-सहकारित्वात् कर्तव्यम् । अत्र केचिदुशन्ति

**स्वशाखोपनिषद्गीतां नामसाहस्रकं ततः ।**
**श्रीरुद्रं चमकं चैव पौरुषं सूक्तमेव च ॥**
**वैयासिकं च शारीरब्रह्मसूत्रं विशेषतः ।**
**पञ्चीकरणमप्यत्र सुरेशाचार्यवार्तिकम् ॥**
**शारीरकं महावाक्यं तद्भाष्यं शाङ्करं पुनः ।**
**शान्तिं पठेत् नित्यमेव भाष्यमावर्तयेद् यतिः ॥**

इति वचनं पठन्तः । एतद्विषये यद्वक्तव्यं तद् द्वितीयाध्याये वितत्य

मीमांसितमिति न पिष्टपेषणं क्रियते। परमहंसानां यत्कर्तव्यम् निष्क्रियात्म-न्यवस्थानं तदपि श्रुतिस्मृतिपुराणाद्यालम्बनेन उक्तमिति विरम्यते। प्रस्थानत्रयभाष्यसमालोचनं सर्वथापि उपयुक्तं पारायणाय इति तु पुनरपि स्मारयित्वा विरम्यते।

तत्र आदौ "ओम् नमो बह्मादिभ्यो ब्रह्माविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो महद्भ्यो नमो गुरुभ्यः। सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि इति वाक्यम् अर्थानुसंधानपूर्वकं पठित्वा गुरुं नमस्कृत्य पाठमारभेत। अत्र दक्षिणामूर्तिस्तोत्रपाठक्रमे आचार-भेदोऽप्यस्ति। तेनापि न कश्चित् प्रत्यवायः। वेदान्तार्थाभ्यासे तु तात्पर्यवता भाव्यम्—

'आत्मज्ञाने जपे चैव वेदाभ्यासे च यत्नवान्' इति स्मृतेः। एवं गुरुप्रणामेऽपि आचारभेदेन न किञ्चिन्न्यूनता अतिरेको वा, गुरुं नमस्कृत्य श्रवणम् आरभन्ते। दक्षिणामूर्त्यष्टकपाठकाले प्रतिश्लोकं गुरुमीश्वरत्वेन भावयित्वा नमन्ति। केचित्तु—

**वेदान्तशास्त्रस्यारम्भे प्रणामा द्वादश स्मृताः।**
**गुरोर्यथा वदन्त्येतं षट्कमात्राः प्रकीर्तिताः॥**

इत्युक्तमिति अनुस्मृत्य तथैव प्रणामान् कुर्वन्ति॥

## ६. अथ भिक्षावृत्तिप्रकारः

ततः परं मध्याह्ने पुनरपि स्नानजपध्यानादिकं विधाय भिक्षाचर्यं कार्यम्। तच्च पञ्चविधम्

**माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम्।**
**तात्कालिकं चोपपन्नं भैक्ष्यं पञ्चविधं स्मृतम्॥**

**मनस्सङ्कल्परहितान् गृहान् त्रीन् पञ्च सप्त वा ।**
**मधुवदाहरणं यत्तत् माधूकरमिति स्मृतम् ॥**
**शयनोत्थापनात्प्राक्च प्रार्थितं भक्तिसंयुतैः ।**
**तत् प्राक्प्रणीतमित्याह भगवानुशना मुनिः ॥**
**भिक्षाटनसमुद्योगात् प्रागेव तु निमन्त्रितम् ।**
**अयाचितं तु तत् प्रोक्तं भोक्तव्यं मनुरब्रवीत् ॥**
**उपस्थानेन यत् प्रोक्तं भिक्षार्थं ब्राह्मणेन हि ।**
**तात्कालिकम् इति ख्यातं तदत्तव्यं मुमुक्षुणा ॥**
**सिद्धमन्नं भक्तजनैः आनीतं यन्मठं प्रति ।**
**उपपन्नं तदित्याहुः मुनयो मोक्षकाङ्क्षिणः ॥**
**भिक्षाः पञ्चविधाः ह्येताः सोमपानसमाः स्मृताः ।**
**तासामेकतमायां वा वर्तयन् सिद्धिमाप्नुयात् ॥**

इति उशनस्स्मृतेः ।

तत्र गौतमः 'भिक्षार्थी ग्राममियात्, जघन्यम् अनिवृत्तं चरेत् (गौ. ध. ३-१४, १५)

**जघन्यम्-विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।**
**वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ॥**

इति मनुनोक्तप्रकारेण भोजनक्रियातः पश्चात् इत्यर्थः इति। बोधायनोऽपि—

**सन्नमुसले व्यङ्गारे निवृत्तशरावसंपाते भिक्षेत** (बो. २-६-१४) इति । एवं भिक्षाचर्यायाः क्षुन्निवृत्तिमात्रप्रयोजनत्वे स्थिते गृहस्थैः भिक्षावन्दनादिपूर्वकमेव यतिः आराधयितव्यः इति संप्रतितननियमे, शास्त्रवचनं वा उपपत्तिं वा न पश्यामः ।

तत्र भिक्षापात्रविषये याज्ञवल्क्यः—

**यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च।**
**सलिलं शुद्धिरेतेषां गोवालैश्चावघर्षणम्॥**

मनुः—

**अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च।**
**तेषाम् अद्भिः स्मृतं शौचं चमसानामिवाध्वरे॥**

अत्रिश्च—

**विंद्यात् अलाबुजं पात्रं वैणवं तान्तवौपलम्।**
**पार्णं तार्णं तथा क्षौमं पत्रपर्णपुटं तथा।**
**उक्तानि यतिपात्राणि ब्रह्मणा विश्वयोनिना॥**
**करे कर्पटके चैव आयसे ताम्रभाजने।**
**भुञ्ज्यात् भिक्षुर्न लिप्येत लिप्यन्ते गृहमेधिनः॥** इति।

एवं मनुवचनानुसारेण अतैजसानि पात्राणि तेषाम् अद्भिः शुद्धिः इत्येतदेव तिष्ठति।

चातुर्वर्ण्यभैक्ष्यं सायंभिक्षाचर्या च शास्त्रानुमतमपि आपद्धर्मः।

**जीवितात्यमापन्नो योऽन्नमत्ति यतस्ततः।**
**लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥**
**नापो मूत्रपुरीषाभ्यां नाग्निर्दहनकर्मणः।**
**न वायुः स्पर्शदोषेण नान्नदोषेण मस्करी॥** इति मनुस्मृतिः।

तत्र अनुसन्धेयं मेघातिथिवचनं च अत्र उदाहरन्ति—

**ब्राह्मणक्षत्रियविशां मेध्यानां भैक्षमाचरेत्।**
**तत्राप्यसम्भवे पूर्वात् आददीतोत्तरोत्तरात्।**

**द्विजाभावे तु सम्प्राप्ते उपवासत्रये गते।**
**भैक्षं शूद्रादपि ग्राह्यं प्राणान् रक्षेत् द्विजोत्तमः ॥ इति।**

## ७. अथ भोजनम्

यावद्गुरुसमीपे विद्यार्जनार्थं वासः "ब्रह्मचारिव्रते स्थितः" इति गीतावचनात्,

**ब्रह्मचारिणि ये धर्माः गुरुशुश्रूषणादयः।**
**ते सर्वेऽपि यतीनां स्युः स्त्रीणां भैक्ष्यविवर्जिताः ॥**

इति परिशिष्टवचनाच्च ब्रह्मचारिधर्माः अपि अनुसर्तव्याः। तथा च—

**गुरोर्यत्र परीवादः निन्दा वापि प्रवर्तते।**
**कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥**
**गुरोश्च चक्षुर्विषये न यथेष्टासनो भवेत्।**
**न देशो न च कालोऽस्ति न हिंसा गुरुकर्मसु ॥**
**सर्वत्रैवानुकूलःस्यात् एतावान् धर्मसङ्ग्रहः।**
**नोदाहरेदस्य नाम परोक्षमपि केवलम् ॥**
**नैव चास्यानुकुर्वीत गतिभाषणचेष्टितम् ॥**
**आस्यतामिति चोक्तःसन् आसीताभिमुखं गुरोः ॥**
**हीनान्नवस्त्रवेषःस्यात् सर्वदा गुरुसंन्निधौ।**
**उत्तिष्ठेत् प्रथमं चास्य चरमं चैव संविशेत् ॥**
**प्रतिश्रवणसंभाषे शयानो न समाचरेत् ॥**
**आसीनस्य स्थितः कुर्यात् अभिगच्छंस्तु पृष्ठतः।**
**नासीनो नासनस्थो वा नित्यं स्याद्गुरुसन्निधौ ॥** मनुस्मृतिः

इत्यादिस्मृतिवचनानि गुरुशुश्रूषुणा यतिना अनुसर्तव्यानि। अथ प्रसङ्गेन प्रकृतमनुवर्तयामः। भैक्षमादाय गुरुणा अनुज्ञातः पात्रान्तरालाभे

स्वपात्रयैव भुञ्जीत। तथा हारीतवचनम्—**"गुरवे निवेदितमनुज्ञातम् अमृतसंमितं प्राहुः यदन्यत् न। ब्रह्मचारी ब्रह्मसिद्धिमवाप्नोति मोक्ष-सिद्धिं तु भिक्षुकः"** इति। गुर्वसन्निधौ मत्स्यकाकादिभूतेभ्यः भैक्षांशं दत्त्वा गङ्गादिनदीतोयेन कमण्डलुजलेन संप्रोक्ष्य गुरुं मनसा ध्यात्वा, परोक्षेऽपि मनसा तस्मै निवेद्य तच्छेषं वा अश्नीयात्। भिक्षान्नशेषं तु न पर्युषेत्। भिक्षाशनानन्तरम् अभियुक्तानुगृहीतस्मृतिपुराणशास्त्रप्रकरणाद्यवलोकेन कालं यापयेत्। यदि श्रद्धालवो गृहस्थाः परिपृच्छेयुः तदा तेभ्यः श्रद्धाभक्ति-प्रधानाः उपदेशाः कर्तव्याः। तत्र ख्यातिलाभपूजाद्यपेक्षाप्रसङ्गात् भीतस्तु प्रणवजपेनैव कालं नयेत्।

सायं स्नानप्रणवजपध्यानाद्यनन्तरमपि गुरुशुश्रूषणे रतः स्यात्। तस्मिन् संवेशिते स्वयमपि शयीत।

॥ इति श्री बोधानन्देन्द्रसरस्वतीशिष्येण सच्चिदानन्देन्द्रसरस्वती-भिक्षुणा प्रणीतायां पारमहंस्यमीमांसायां परमहंसस्य **दैनन्दिनकृत्य-निरूपणं** नाम पञ्चमोध्यायः ॥

# षष्ठोऽध्यायः

## परिव्राजकस्य पर्यटनम्

अथ गुरुसमीपे श्रवणादिना पाण्डित्यलक्षणं साधनं श्रवणमननाभ्यां **निः**शेषं कृत्वा यः देशात् देशान्तरं पर्यटेत् तस्येदम् उपदिश्यते। **यतिधर्मसङ्ग्रहे उद्धृतो भागः**

### १. पर्यटनयोग्यदेशः

१. अत्रिः—

**हिमवद्विन्ध्ययोर्मध्ये ख्यातः पुण्यतमः श्रुतः।**
**देशः सरस्वती तीरे नर्मदायाश्च पश्चिमे॥**
**दग्धो वै वह्निना पूर्वं पवित्रीकरणाय वै।**
**योगज्ञानतपोध्यानसिद्ध्यर्थं वै महात्मनाम्॥**
**तस्मिन् देशे सदा भिक्षुः स्वधर्ममनुपालयेत्।**
**पर्यटेत्तु सदा योगी वीक्षयन् वसुधातलम्॥**
**न रात्रौ न च मध्याह्ने सन्ध्ययोः नैव पर्यटेत्।**
**न शून्ये न च दुर्गे वा प्राणबाधकरे न च॥**
**यत्र प्रभुर्भवेन्नाथः तत्र योगी वसेत्सदा॥**

तत्र योगी इति विशेषणात्—योगाभ्यासार्थम् अनूकूलप्रदेशमासाद्य तत्र अभ्यासः कार्यः इत्येव विवक्षितम्। तेन कृष्णागोदावरीकावेर्यादि-नदीतीरस्थक्षेत्राण्यपि अनुज्ञातानि द्रष्टव्यानि। योगस्य मनोऽनुकूलस्थाना-पेक्षत्वात्। तथाह्याहुः भगवत्पादाः—

"कर्माङ्गसंबद्धेषु तावदुपासनेषु कर्माङ्गतन्त्रत्वात् न आसनादिचिन्ता। नापि सम्यग्दर्शने, वस्तुतन्त्रत्वात् विज्ञानस्य। इतरेषु तु उपासनेषु किमनिय-

मेन तिष्ठन् आसीनः शयानो वा प्रवर्तेत उत नियमेन आसीन एव इति चिन्तयति । तत्र मानसत्वात् उपासनस्य अनियमः शरीरस्थितेरिति एवं प्राप्ते ब्रवीति "**आसीन एव उपासीत**" इति । (सू. भा. ४-१-७) दिग्देशकालेषु अर्थलक्षण एव नियमः । यत्रैवास्य दिशि देशे काले वा मनसः सौकर्येण एकाग्रता भवति तत्रैव उपासीत प्राचीदिक्पूर्वाह्णप्राचीनप्रवणादिवद्विशेषा-श्रवणात् । एकाग्रतायाः इष्टायाः सर्वत्राविशेषात् । ननु विशेषमपि केचिदामन्ति—"समे शुचौ शर्करवह्निवालुकाविवर्जिते शब्दजलाश्रया-दिभिः । मनोनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत्" (श्वे. २-२०) इति यथा इति । उच्यते । सत्यमस्त्येवञ्जातीयको नियमः । सति तु एतस्मिन् तद्गतेषु विशेषेषु अनियमः इति सुहृद्भूत्वा आचार्य आचष्टे । "मनोऽनुकूले" इति चैषा श्रुतिर्यत्रैकाग्रता तत्रैव इति एतदेव दर्शयति" । (सू. भा. ४-१-११).

यद्यपि कृतश्रवणस्य ज्ञानपरिपाकाङ्गलक्षणं मुक्त्वा नान्योऽस्ति योगाभ्यासो विहितः, तथापि कैमुतिकन्यायेन तस्य देशादिलक्षणनियमः नास्त्येवेति हिमवद्विन्ध्यमध्यान्तदेशादिनियमः अर्थलक्षण एव । वर्षासु ध्रुवशीलानां यतीनाम् एतादृशदेशवासः प्रशस्तः इत्यभिप्रायेण लोक-सङ्ग्रहार्थम् आचारपरिपालनासक्ताः प्रायेणैतादृशस्थलेषु वसेयुरिति नियम उच्यत इति बोध्यम् । एवमग्रेऽपि ऊह्यम् ।

## २. नैकत्र वसतिः परिव्राजः

अथ परिव्राजः, परिव्रजति इति नामनिर्वचनादेव गम्यते नैकत्र वसतिः शस्ता इति । अत एव स्मृतिः—"**अनग्निरनिकेतः स्यात् अशर्मा-शरणो मुनिः । स्वाध्याय एवोत्सृजमानो वाचं ग्रामे प्राणवृत्तिं प्रतिलभ्य अनीहः अनमुत्रः चरेत्**" (आ. ध. २-१२-२०) इति । इतरेषां त्रयाणामिव न अग्निकार्यम् अस्य विद्यते इति अनग्निः, स्वभूतं गृहादिनिवा-सस्थानं

नास्तीति अनिकेतः, इन्द्रियभोगसुखं नास्य विद्यते इति अशर्म, न किञ्चित् शरणत्वेन आश्रयते नापि कस्यचित् शरणं भवेत् इत्यशरणः प्रणववेदान्तादिः स्वाध्यायः तस्मादन्यत्र मौनमास्थितः भिक्षामात्रप्रयोजनेन ग्रामेवसतिः, इहामुत्रभोगविरक्तश्च । अत एवाहुः—

**एकरात्रं वसेत् ग्रामे पत्तने तु दिनत्रयम् ।**
**पुरे दिनत्रयं भिक्षुः नगरे पञ्चरात्रकम् ॥**
**वर्षास्वेकत्र तिष्ठेत स्थाने पुण्यजलावृते ।**
**आत्मवत् सर्वभूतानि पश्यन् भिक्षुः चरेन्महीम् ॥**
**अन्धवत् कुब्जवच्चापि बधिरोन्मत्तमूकवत् ।**
**नामगोत्रादि चरणं देशं वासं श्रुतं कुलम् ।**
**वयो वृत्तं व्रतं शीलं ख्यापयेत् नैव सद्यतिः ॥**

आपत्सु तु एकत्र वासः न दुष्यति इति, यथा विष्णुः—

**ग्रामान्ते निर्जने देशे नित्यवासोऽनिकेतनः ।**
**प्रर्यटेत् कीटवद्भूमिं वर्षास्वेकत्र संवसेत्**
**वृद्धानामातुराणां च भिक्षूणां सङ्गवर्जिनाम् ।**
**ग्रामे वाथ पुरे वापि वासो नैकत्र दुष्यति ॥ इति ।**

## ३. निषिद्धकर्माणि

निषिद्धकर्माणि सर्वदा सर्वथापि परित्यजेत् । पर्यटतः सम्भवोऽस्ति धर्मातिक्रमस्य इत्यतः यतिधर्मसङ्ग्रहे उदाहृतानि कानिचित् वचनानि संगृह्यन्ते ।

अत्रिः—

**छेदभेदोपमर्दं च प्राकारं गृहमाश्रमम् ।**
**स्वाहा स्वधा वषट्कारो विषयाणां च सन्निधिम् ॥**

स्तुतिर्निन्दाक्रियावादाः परधर्मावघट्टनम्।
तृष्णा क्रोधोऽनृतं माया लोभमोहौ प्रियाप्रिये ॥
शिल्पं व्याख्या नियोगश्च कामो रागः परिग्रहः ।
अहङ्कारो ममत्वं च चिकित्सा धर्मसाहसम् ॥
प्रायश्चित्तप्रदानं च मन्त्रौषध्यगदाशिषः ।
एकान्नं मदमात्सर्यं गन्धपुष्पविभूषणम् ॥
ताम्बूलाभ्यञ्जने क्रीडा भोगाकाङ्क्षा रसायनम्।
कत्थनं कुत्सनं स्वस्ति ज्योतिषं क्रयविक्रयौ ॥
क्रियाकर्मविकाराश्च गुरुवाक्यविलङ्घनम्।
सन्धिश्च विग्रहो यानं मञ्चकं शुक्लवाससम् ॥
शुक्रोत्सर्गो दिवास्वापः भिक्षाधारस्तु तैजसः ।
विषं चैवायुधं बीजं हिंसां चेक्षादि मैथुनम् ॥
प्रतिषिद्धानि चैतानि सेवमानो व्रजत्यधः ।
भैक्षदेशनृपज्ञातिपुत्रमित्रादियोषिताम् ॥
उपचारकथास्वन्यो मनसापि न चिन्तयेत्।
आगच्छ गच्छ तिष्ठेति स्वागतं सुहृदेऽपि वा ।
सम्माननं न च ब्रूयात् मुनिर्मोक्षपरायणः ॥
पितृमातृक्षयं श्रुत्वा स्नात्वा शुध्यति साम्बरः ।
न कुर्यात् सूतकं भिक्षुः श्राद्धपिण्डोदकक्रियाम् ॥

## ४. सर्वत्रसमदृष्टिः

संक्षेपेण तु यतिना सर्वदा सर्वत्र समबुद्धिरेव रक्षणीया इत्येतस्मात् न प्रमदितव्यम्। यदाह भगवान्—

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताःसमदर्शिनः ॥

**इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।**
**निर्दोषं हि समं ब्रह्म तस्मात् ब्रह्मणि ते स्थिताः ॥**
**न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम् ।**
**स्थिरबुद्धिरसंमूढो ब्रह्मवित् ब्रह्मणि स्थितः ॥** गी. ५-१८, १९-२०

**सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।**
**साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥** गी. ६-९

**समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।**
**न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥** गी. १३-२८

**प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।**
**न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥**
**उदासीनवदासीनो गुणैर्यो न विचाल्यते ।**
**गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥**
**समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।**
**तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥**
**मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।**
**सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥**
**मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।**
**स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥** गी. १४-२२-२६

एवमादि स्थलेषु कृतकृत्यस्य विदुषः यादृशी चित्तवृत्तिविशेषेषु बाह्योपाधिविशेषेषु च सर्वसमतास्वरूपा तादृशीं ब्रह्मभावनां नियमेन अभ्यस्यन् यो विविदिषुः स एव ब्रह्मभूयाय कल्पते इत्यभियुक्तानां मतम् । अभियुक्तोक्तिरपि इह अनुसन्धेया ।

**वीतरागभयक्रोधैः मुनिभिर्वेदपारगैः ।**
**निर्विकल्पो ह्ययं दृष्टः प्रपञ्चोपशमोऽद्वयः ॥**

**तस्मादेवं विदित्वैनम् अद्वैते योजयेत्स्मृतिम् ।**
**अद्वैतं समनुप्राप्य जडवल्लोकमाचरेत् ॥**
**निस्तुतिर्निर्नमस्कारो निःस्वधाकार एव च ।**
**चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् ॥**
**तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ।**
**तत्त्वीभूतस्तदारामः तत्त्वादप्रच्युतो भवेत् ॥**

गौ. पा. का. २-३५-३८

तस्मात् यावच्छक्यं कृतार्थलक्षणानि यत्नतः साधयितुम् ईहेत् विविदिषुः इति स्थितम् ॥

### ५. वर्षाकाले नियमः तत्र व्यासपूजाद्यनुष्ठानम्

तत्र "**ध्रुवशीलो वर्षासु** (गौ. ध. सू. ३-१३), **वर्षासु एकस्थः** (बो. ध. सू. २-६-२२) इत्यादिस्मृतिभिः वर्षाकाले यतीनां एकत्र वासो विहितः । तत्र व्यासपूजा कर्तव्या इत्यत्र श्लोकं पठन्ति आधुनिकाः केचित्—

**देवं कृष्णं मुनिं व्यासं भाष्यकारं गुरोर्गुरुम् ।**
**गुरुं देवं गणाध्यक्षं दुर्गां देवीं सरस्वतीम् ॥ इति ।**

अन्ये तु

**आषाढस्य सिते पक्षे पूर्वाह्णव्यापिनी यदा ।**
**पूर्णमासी तदा तत्र व्यासरूपी जनार्दनः ॥**
**पूज्यश्च यतिभिः सर्वैः हंसैश्च परहंसकैः ।**
**उपचारैः षोडशिभिः पूजनीयः प्रयत्नतः ॥**
**मन्त्रतन्त्रविधानेन व्यासरूपी जनार्दनः ॥**

इत्यर्वाचीनैर्निबद्धं श्लोकम् आश्रित्य व्यासपूजां विहिताम् अवश्य-कर्तव्यां च मन्यन्ते । तत्र ब्रूमः—यद्यपि व्यासपूजा मानसी नित्यमपि श्रेयसे

एव भवेत्, व्यासो हि भगवान् सर्वज्ञः महाभारतकृत् सर्वपरमहंसमान्यः गीताशास्त्रं निबद्धवान् । यथाहुः भाष्यकाराः—

"स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया वैदिकं धर्मद्वयं अर्जुनाय शोकमोहमहोदधौ निमग्नाय उपदिदेश । गुणाधिकैः गृहीतः अनुष्ठीयमानश्च धर्मः प्रचयं गमिष्यति इति । तं धर्मं भगवता यथोपदिष्टं वेदव्यासः सर्वज्ञो भगवान् गीताख्यैः सप्तभिः श्लोकशतैः उपनिबबन्ध" (गी. अव. भा) इति ।

स तु न शारीरकमीमांसाकृत् भगवान् बादरायणः, किं तु अन्य एव भगवन्निर्देशात् धृतशरीरो महामुनिः यथाह भाष्यकृत्—

"अपान्तरतमा नाम वेदाचार्यः पुराणऋषिः विष्णुनियोगात् कलिद्वापरयोः सन्धौ कृष्णद्वैपायनः संबभूव इति स्मरन्ति" (सू. भा. ३.३-३२) ।

अत्र स्मरन्ति इति वाक्यं साभिप्रायम् । महाभारते हि स्वयमेव आह भगवान् व्यासः

**सोऽहं तस्य प्रसादेन देवस्य हरिमेधसः ।**
**अपान्तरतमा नाम ततो जात आज्ञया हरेः ।**
**पुनश्च जातो विख्यातः वसिष्ठकुलनन्दनः ॥**
**तदेतत् कथितं जन्म मया पूर्वकमात्मनः ।**
**नारायणप्रसादेन तथा नारायणांशजम् ॥**
**मया हि सुमहत् तप्तं तपः परमदारुणम् ।**
**पुरा मतिमतां श्रेष्ठाः परमेण समाधिना ॥**

म. भा. मो. ध. ३४९-५९-६०-६१

तदत्र वेदव्यासत्वेन महाभारतकर्तृत्वेन पुराणऋषित्वेन च तस्य पूजा कर्तव्या इत्यत्र न विवादः । तदर्थं व्यासादीनां बाह्यप्रतीके पूजा परमहंसाना-

मपि कथं केन विधिना प्राप्नोति इति तु न जानीमः। यत्पुनः आहुः परमहंसानां मूर्त्यादिबहिष्पूजानिषेधः दैनन्दिनपूजाविषयः, इदं तु मन्त्रतन्त्रादिभिः आषाढ्यां कर्तव्यं नैमित्तिकं कर्म अतो न विरोधः इति, तदपि न शुध्यति। ब्रह्मसंस्थतासिद्ध्यर्थं संन्यस्य सर्वकर्माणि वेदान्तार्थनिषेवणेन तत्त्वं जिज्ञासमानस्य बाह्यार्चनादिकर्मणां गृहस्थोचितानां, यतीनां विषये कुत्रापि अविहितानां कथमपि प्राप्त्यसंभवात्। प्रत्यक्स्रोतस्तया प्रवर्तितचित्तस्य नियोगेन बहिष्प्रवर्तनस्य चित्तविक्षेपकारित्वात् एव, अधिकारविरोधाच्च।

यत्पुनः प्रथमः कल्पः तत्र मध्ये कृष्णपञ्चकं सनकसनन्दनसनत्कुमार-सनत्सुजाताः इति, परिवारसमेतः कृष्णः, दक्षिणतः व्यासपञ्चकं सुमन्तुजैमिनि-वैशम्पायनपैलाः परिवाराः, वामतः आचार्यपञ्चकं पद्मपादविश्वरूपत्रोटक-हस्तामलकाचार्यपरिवाराः न्यायात् आचाराच्च गुरुपरमगुरुपरमेष्ठिगुरु-परात्परगुरवोऽन्ये च ब्रह्मविद्याचार्याः यथासन्निवेशं भगवत्पुरतः पूज्याः, गणेशः आग्नेय्याम्, ऐशान्यां क्षेत्रपालः, वायव्यां दुर्गा, नैर्ऋत्यां सरस्वती, यथादिशं च भगवत्पार्श्वयोः ब्रह्मरुद्रौ अत्र च भगवान् मूलमन्त्रेण पूजनीयः। अन्ये पुनः प्रणवादिभिर्नमोऽन्तैः तत्तन्नाममन्त्रैः पूज्याः, एवं पूर्वोक्तप्रकारेण सम्पूज्य गोपीचन्दनादिमृत्तिकां दन्तकाष्ठदोरकादि दद्यात्। आचार्य-विकल्पेन अपरे अत्र चतुर्षुदिक्षु , सनकसनन्दनादीन् वासुदेवसंकर्षण-प्रद्युम्नानिरुद्धादींश्च पूजयन्ति। तदेतत् सर्वथा न कर्तव्यमेव इति प्रतिभाति नः। यथोक्तदोषस्य अत्रापि समानत्वात्। आत्मैकत्वविद्याप्रेप्सवे नाना-देवतानां आवाहनपूजनादिषु नियोगेन स्वधर्मप्रच्युतिप्रसङ्गात्। ब्रह्मात्मैक्य-निदिध्यासने हि प्रवृत्तो यतिः, तस्य कथङ्कारं नानादेवतापूजायां प्रसक्तिःस्यात् इति। आह हि भगवान् स्वयमेव—

**योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।**
**श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥** गी. ६-४२

इति। भाष्यं च अत्र "योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां

मध्ये मद्गतेन मयि वासुदेवे समाहितेन अन्तरात्मना अन्तःकरणेन श्रद्धावान् श्रद्धधानः सन् भजते सेवते यः मां स मे मम युक्ततमः अतिशयेन युक्तः मतः अभिप्रेतः इति ।

## अथ चातुर्मास्यानुष्ठानं कल्पान्तरेण तद्विमर्शश्च

अत्र केचित् आषाढ्यां संकल्पः एवं कार्यः इति वदन्ति । **"संन्यासप्रभृति एतत्क्षणपर्यन्तं मम आश्रमधर्मानुष्ठानवैकल्यनिवृत्तिद्वारा प्रकृतचातुर्मास्यव्रतनियमपौष्कल्यसिद्ध्यर्थं महागुर्वादीनां ब्रह्मविद्यासम्प्रदायपरम्परागुरूणां च प्रसादात् ब्रह्मात्मैश्वरैक्यसाक्षात्कारसिद्ध्यर्थं यथासम्भवोपचारैः महागुर्वादिपूजां करिष्ये"** इति सङ्कल्पः तेषाम् अभिमतः । तत्रैवंसङ्कल्पः **पारमहंस्याननुरूपः** इत्यस्माकं मतिः । ब्रह्मसंस्थत्वमेव हि परमहंसस्य धर्मः । ततः प्रच्युतौ तस्य चातुर्मास्यनियमानुष्ठानेन कथम् आश्रमधर्मवैकल्यनिवृत्तिःस्यादिति । पूजाक्रमश्च इत्थं वर्णितस्तैः मध्यपूर्वदक्षिणोत्तरपश्चिमस्थण्डिले तत्पुरुषम्, दक्षिणे अघोरम् उत्तरे वामदेवम्, पश्चिमे सद्योजातं च पूजयेत् । पूर्वस्थण्डिले मध्ये शङ्कराचार्यान्, पूर्वे पद्मपादाचार्यान्, दक्षिणे सुरेश्वराचार्यान्, उत्तरे त्रोटकाचार्यान् पश्चिमे हस्तामलकाचार्यान् च पूजयेत् । अथ दक्षिणे मध्ये श्रीगुरून्, तत्पूर्वे परमगुरून् दक्षिणे परमेष्ठिगुरून्, उत्तरे परात्परगुरून् पश्चिमे ब्रह्मविद्यासंप्रदायगुरून् च पूजयेत् । अथोत्तरे मध्ये व्यासाचार्यं पूर्वे ऋभुं दक्षिणे निदाघम् उत्तरे दूर्वाससं पश्चिमे दत्तात्रेयं च पूजयेत् । आग्नेय्यां सूक्ष्मेशं दक्षिणायां शिवोत्तमेशं नैऋत्यां एकाग्रेशं पश्चिमायां एकरुद्रेशं वायव्यां त्रिमुनीशम् उत्तरस्यां श्रीकण्ठेशम् ऐशान्यां शिखण्डीशांश्च पूजयेत् । एवं पञ्चपञ्चकान्तरालकोणेषु आग्नेयादिषु क्रमेण सङ्कल्पात्पूर्वं आग्नेये महागणपतिं नैर्ऋते दुर्गां वायव्ये महालक्ष्मीम्, ऐशान्यां भैरवं च पूजयेत् । सर्वस्मात् पूर्वादिदिक्षु इन्द्रादीन् दिक्पालान् इन्द्रेशानयोर्मध्ये ब्रह्माणं निर्ऋतिवरुणयोर्मध्ये विष्णुं च इत्येवंक्रमेण प्रत्येकं षोडशोपचारैः सम्पूजयेत् । अथ समष्ट्या

महानैवेद्यादिमहादीपाराधनान्तान् उपचारान् कृत्वा दक्षिणामूर्त्यष्टकपद्यैश्च नमस्कृत्य कैवल्याथर्वाशिर-आदिभिः उपनिषद्भिः स्तुत्वा "यो ह वै रुद्रः स भगवान्" इत्यादिभिः चतुस्त्रिंशत्त्रयमन्त्रैः ऊर्ध्वबाहुः स्तुवीत । अत्र कैश्चित् विष्णुमपेक्षया शिवोत्कर्षबद्धधृतभावैः कल्पितः सर्वोऽयम् अनुष्ठानप्रकारः इत्यत्र न कापि संशीतिः । श्रीशङ्करभगवत्पादानां कुत्रापि एतादृशशिव-पक्षपातः न दृश्यते प्रदर्शितः प्रस्थानत्रयभाष्ये, इति वेदान्तशास्त्रे कृतश्रमाणां स्पष्टमेवेति न पृथक् वक्तव्यम् । श्रीभगवत्पादाचार्याणां नारायणसम्प्रदाय एव अनुसृत इति आसेतुहिमाचलं सुप्रसिद्धेऽपि केचित्—

**सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् ।**
**अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥**

इति श्लोकम् अपि गुरुपरम्पराध्यानश्लोकम् आरम्भे निवेशयन्ति इति न चित्रम् ॥

## चातुर्मास्यानुष्ठानविषये निर्णयः

तदेवं वर्षाकाले संन्यासिभिः एकत्र वासः कर्तव्यः इति स्थिते तत्र ब्रह्मनिष्ठत्वसिद्धये प्रणवजपः वेदान्तचिन्तया कालक्षेपः च कार्यः । गुरुस्मरणध्यानादिकं तु नित्यकर्मवदेव करणीयं न तत्र कर्माभिनिवेशिभिः कल्पितेषु कुत्रचिदपि अनुष्ठानविशेषेषु प्रवृत्त्या चित्तविक्षेपः आपादनीयः इति स्थितम् ॥

## चातुर्मास्यसङ्कल्पवाक्यं प्रतिवचनं च

एतेन चातुर्मास्यव्रते सङ्कल्पघोषणं संन्यासिनाम्, गृहस्थैः सेवाकरण-प्रतिश्रुतिश्च इदानीं मन्त्रवत् पठ्यमाने स्वभावप्राप्ते, न तु शास्त्रविहिते इति स्पष्टम् । इत्थं हि यतिसङ्ग्रहे अत्रिवचनत्वेन उदाहृता वाक्यशैली—

**असति प्रतिबन्धे तु मासान् वै वार्षिकानिह ।**
**निवसामीति सङ्कल्प्य मनसा बुद्धिपूर्वकम् ॥**
**प्रायेण प्रावृषि प्राणिसङ्कुलं वर्त्म दृश्यते ।**
**आषाढ्यादिचतुर्मासं कार्तिकान्तं तु संवसेत् ॥**
**माधवश्चतुरो मासान् सर्वभूतहिताय वै ।**
**स्वापं यास्यति शेषाङ्के लक्ष्म्या सह जगत्पतिः ॥**
**सुप्तश्चैवोत्थितो यावत् न भवेत् स सनातनः ।**
**अहं तावन्निवत्स्यामि सर्वभूतहिताय वै ॥**

तत्प्रतिवचनं ब्राह्मणानाम्—

**निवसन्तु सुखेनात्र गमिष्यामः कृतार्थताम् ।**
**यथा शक्त्या वयं पूजां करिष्यामो मुदान्विताः ॥** इति ॥

## ६. यतीनाम् एकत्र समवायः

वर्षाकाले यत्रकुत्रचित् ध्रुववासं कुर्वाणस्य यदि परिव्राजकान्तरसमागमः स्यात् तर्हि तैः सह वेदान्तविचारादिना कालं नयेत् इत्यपि स्वतःप्राप्तम् । तत्र दक्षवचनम् उदाह्रियते ।

**एको भिक्षुः यथोक्तस्तु द्वावेव मिथुनं स्मृतम् ।**
**त्रयो ग्रामः समाख्यातः ऊर्ध्वं तु नगरायते ॥**
**नगरं तु न कर्तव्यं ग्रामो वा मिथुनं तथा ।**
**एतत्त्रयं प्रकुर्वाणः स्वधर्मात् च्यवते यतिः ॥**
**वासो बहूनां कलहो भवेद्वार्ता द्वयोरपि ।**
**एक एव चरेत्तस्मात् कुमार्या इव कङ्कणः ॥**
**राजवार्तादिका तेषां भिक्षावार्ता परस्परम् ।**
**स्नेहपैशुन्यमात्सर्यं संनिकर्षात् प्रवर्तते ॥**

इति । तत्तु अनधिकृतसंन्यासिविषये न तु अध्यात्मविद्यारसिकानाम् । यथोक्तं गीताभाष्ये—"अरतिः अरमणं जनसंसदि । जनानां प्राकृतानां संस्कारशून्यानाम् अविनीतानां संसत् समवायो जनसंसत् । न संस्कारवतां विनीतानां संसत् । तस्या ज्ञानोपकारकत्वात् । अतः प्राकृतजनसंसदि अरतिः ज्ञानार्थत्वात् ज्ञानम् (गी. भा. १३-१०) इति ।

## ७. अभ्यागताचारः

अत्र अभ्यागते यतौ किमाचारः स्यात् स्थायियतिः इत्यत्र आहुः

**अभ्यागते यतौ स्थायी यतिलिङ्गेन शिष्टताम् ।**
**विज्ञायास्योत्थितो भूत्वा वामवस्त्रादिसंयुतः ॥**
**चातुर्मास्यं कियदिति पृष्ट्वा तेनोत्तरे कृते ।**
**अभ्यागतो यदि ज्येष्ठस्तस्मै भक्त्याऽभिवन्द्य च ।**
**तस्य दण्डमधो धृत्वा तेन त्यक्तं यथाविधि ।**
**योग्ये देशे तु संस्थाप्य तस्मा आसनमादरात् ॥**
**दत्त्वोपविष्टे तस्मिन्स गरुडासनसंस्थितः ।**
**तदनुज्ञां गृहीत्वाऽथ पञ्चाङ्गं नतिपूर्वकम् ॥**
**अभ्यागतप्रयुक्तं तत्पादग्रहणमादरात् ।**
**यथोपदेशं कृत्वा स तत्पादौ मूर्ध्नि धारयन् ॥**
**आघ्राय दक्षिणांसे तु धारयित्वा ततः सुधीः ।**
**गरुडासन आसीनो जोटिकार्चनपूर्वकम् ॥**
**अनुज्ञायास्य पञ्चाङ्गं नमस्कारपुरःसरम् ।**
**गृहीत्वा पूर्ववत्पादावस्याष्टाङ्गनमस्क्रियाः ॥**
**सदनुज्ञानुसारेण त्रिषड्द्वादशसंख्यया ।**
**जोटीमादाय विधिवत्कर्णयोर्धारयेत्पुनः ॥**
**विधायैकनमस्कारं तां गृहीत्वा यथाविधि ।**
**पञ्चाङ्गेन प्रणम्याथ गरुडासनमास्थितः ॥**

क्षमापय्य यथादेशं शौचं पर्यङ्कमाचरेत्।
अभ्यागतः कनिष्ठश्चेत्तेन स्थाय्यभिवन्दितः ॥
गृहीत्वा तस्य दण्डाग्रं पूर्ववत्स्थापयेत्ततः।
स्थायी स्वासन आसीनः शिष्यद्वाराऽऽसनं शुचि ॥
तस्मै दद्यात्ततस्तत्तु मूर्ध्न्यादाय विधाय सः।
अभ्यागतेन भूमौ तु स्थिते गरुड आसने।
प्रार्थिते वै प्रणामार्थं स्थाय्यनुज्ञां विधाय सः ॥
अभ्यागतेनार्धमुक्तकटिवस्त्राग्रसंयुतम् ॥
द्विगुणीकृतवस्त्रं तु ऊर्वोरुपनिधाय च।
यथोपदेशं पञ्चाङ्गनमस्कारे कृते सति ॥

उत्थाय तस्य स्कन्धादिग्रहणं विधिना चरेत्।
स्वासने संविशेद्भूयः स उत्थाय द्वितीयकम् ॥
वस्त्रं निक्षिप्य वस्त्रेण सम्यङ्मुक्तेन संयुतः।
अभिवन्द्योपविश्याऽऽशु गरुडासनपूर्वकम् ॥
प्रणामादियथापूर्वं कृत्वा गरुड आसने।
उपविश्याञ्जलिं कृत्वा भक्तियुक्तो भवेत्तदा ॥
स्थायी तु स्वसमीपे तं स्थापयित्वा सुखासने।
अभ्यागतप्रयुक्तं तत्पादग्रहणमादरात् ॥
कारयेत् स्वसमीपस्थैः तत्कनिष्ठैर्यथाविधि।
जोटीनमस्कृतिं तद्वत् पर्यङ्कं शौचमप्यथ ॥
तद्दिने तस्य भिक्षादि यथाशक्ति विचारयेत् ॥

अत्र व्याख्यातपञ्चाङ्गनमस्कारजोटीग्रहणपर्यङ्कशौचादिनि कुतः-प्रमाणात् आगतानीति न विज्ञायते। सङ्ग्रहग्रन्थतोऽत्र उद्धृत्य आकलितानि परिशीलनार्थं सुधीभिः।

श्रीगौडपादाचार्यैस्तु सम्प्रदायविद्भिः उक्तम्—

**निःस्तुतिर्निर्नमस्कारो निःस्वधाकार एव च।**
**चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत्॥ इति**

(भाष्यम्—यादृच्छिको भवेत्—यदृच्छाप्राप्तकौपीनाच्छादनग्रासमात्रदेहस्थितिः इत्यर्थः) (मां. का. २-३७)

बाल्येन तिष्ठासेत् इति श्रुतिस्थबाल्यशब्दव्याख्यानावसरे च सूत्रभाष्यकारैरुक्तम्—"आन्तरो भावविशेषः बालस्य अप्ररूढेन्द्रियत्वादिः इह बाल्यम् आश्रीयते। तदाह "अनाविष्कुर्वन्" इति। ज्ञानाध्ययनधार्मिकत्वादिभिः आत्मानं अविख्यापयन् दम्भदर्पादिरहितो भवेत्। यथा बालोऽप्ररूढेन्द्रियतया न परेषाम् आत्मानम् आविष्कर्तुम् ईहते तद्वत्। एवं हि अस्य वाक्यस्य प्रधानोपकार्यर्थानुगमः उपपद्यते। तथा योक्तं स्मृतिकारैः

**यं न सन्तं न चासन्तं नाश्रुतं न बहुश्रुतम्।**
**न सुवृत्तं न दुर्वृत्तं वेद कश्चित् स ब्राह्मणः॥**
**गूढधर्माश्रितो विद्वान् अज्ञातचरितं चरेत्।**
**अन्धवत् जडवच्चापि मूकवच्च महीं चरेत्॥**

**'अव्यक्तलिङ्गोऽव्यक्ताचारः' इति चैवमादि।** सू. भा. ३-४-५०

चातुर्मास्यसंख्याबहुत्वेन तदल्पत्वेन वा यतीनां ज्येष्ठत्वकनिष्ठत्वनिर्धारणं, तदालम्बनेन परस्परपूज्यपूजकभावनिर्धारणं च न शास्त्रप्रमाणकमिति न पृथक्वक्तव्यम्। न हि चातुर्मास्यव्रतानुष्ठानात् किञ्चित् संस्कारगौरवम् आधीयते इति शास्त्रकारैः क्वचित् दर्शितमुपलभ्यत इति॥

॥ इति श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वतीभिक्षुणा प्रणीतायां पारमहंस्यमीमांसायां "**परिव्राजकस्य पर्यटनं**" नाम षष्ठोऽध्यायः॥

# अथ परिशिष्टचिन्ता

## तत्र आह्निकप्रकारः—उत्तमाधिकारिणः ओङ्कारनिष्ठा

अथ ब्रह्मसंस्थस्य यतेः कथम् ओङ्कारनिष्ठा सम्पादयितव्या इत्यत्र किञ्चिदुच्यते। तत्र आदौ आसनस्थलशुध्यादिकं सम्पाद्य ततः जपध्यानादिकं कर्तव्यम् इति अर्थसिद्धम्। तत् एतत् अनूद्यते श्रुत्या—"समे शुचौ शर्करवह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः। मनोऽनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत्"। (श्वे. २-२०) इति। तथा स्मृतावपि

**शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः**
**नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्।**
**तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।**
**उपविश्यासने युञ्ज्यात् योगमात्मविशुद्धये॥** गी. ६-११-१२

इति। तदेतत् आसनादि दृष्टोपकारकत्वादेव न विधिमन्त्रादिकमपेक्षते इत्यवोचाम। अत एवात्र भूतशुद्ध्यादिकम्, पृथिव्या मेरुपृष्ठऋषिः कूर्मो देवता इत्यादिप्रकारेण ऋष्यादिकीर्तनम्, मं मण्डूकाय नमः, कं कालाग्निरूद्राय नमः, कुं कूर्माय नमः, इत्याद्युच्चारणं च न अन्वेष्टव्यम्।

तत्र

**ॐ नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च।**
**व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्यशिष्यम्।**
**श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम्।**
**तं त्रोटकं वार्तिककारमन्यान् अस्मद्गुरून् सन्ततमानतोऽस्मि॥**

इति श्लोकानुक्रमेण "ॐ नमो नारायणपरब्रह्मणे नमः" इत्येवं प्रत्येकं नमस्कृत्य गुरुपरमगुरुपरमेष्ठिगुरुपरात्परगुरूनपि अभिवन्द्य प्रणवं यथाशक्ति जपेत्। एतच्च ध्यानात्पूर्वं उत्तरं च कर्तव्यम्। ओङ्कारसंस्थता हि ब्रह्मसंस्थता इति।

अथ इदानीं प्रणवार्थानुसन्धानप्रकारान् प्रदर्शयिष्यामः। तेष्वन्यतमं यथाधिकारं ब्रह्मनिष्ठगुरूपदिष्टक्रमेण विज्ञाय कर्तव्यम्।

## तत्रतावत् परमार्थप्रणवानुसन्धानप्रकारः

एषः प्रकारः सूत्रस्थानीयेन मन्त्रेण निर्दिष्टो मुण्डकोपनिषदि—"प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्" (मुं. २-२-४) इति। ओङ्कारलक्ष्ये ब्रह्मणि, स्वात्मप्रवेशकारणं धनुरिति कल्पयित्वा आत्मानं तत्र सन्दधीत। ओङ्कारात्मतया स्वात्मानं प्रथमम् अनुसन्दध्यात्। तस्य च ओङ्कारस्य निरन्तराभ्यासेन ब्रह्मभावं प्राप्नुयात् इत्यर्थः। एतच्च आत्मतत्त्वानुसन्धानेन ज्ञानमार्गेण वा ध्यानमार्गेण वा भवति। तत्र ज्ञानमार्गस्तावत् उत्तमाधिकारिविषयः माण्डूक्ये विवृतः। अतः अधिकारी माण्डूक्यवाक्यार्थावधारणेनैव ब्रह्मात्मतां प्राप्नुयात्। तस्मात् उपनिषद्वाक्यार्थव्याख्यानेनैव इह संक्षिप्य तत्प्रकारान् दर्शयिष्यामः।

'ओम् इत्येतदक्षरमिदं सर्वम्' इत्येतत् सूत्रभूतं सर्वस्यापि उपनिषदर्थस्य। अत्रायमोङ्कारः निरस्तवाच्यवाचकविभागं स्वतःसिद्धं परमार्थतत्त्वमुपलक्षयति। इदं सर्वम् ओम् इत्येतदक्षरम्, सर्वस्यापि तद्विकारत्वात्, विकारस्य च वाचारम्भणमात्रत्वात्। ओम् इति एतस्मात् अक्षरात् अनन्यत्वमेव सर्पादिरिव रज्जोः। इदं च सामानाधिकरण्यम् ओम् इत्येतदक्षरमिदं सर्वमिति सर्वस्यापि प्रपञ्चस्य प्रतीयमानरूपापवादेन ओम् इत्येतदक्षरम् इति ओङ्कारमात्रत्वमवधारयति। अयं सर्पः रज्जुरेव इतिवत्। कथं तस्य सर्वात्मत्वम् इत्येतत् उपव्याख्यानेन परमार्थसमीपता यथा विज्ञास्येत तथा

विस्पष्टम् आख्यानं प्रकथनं प्रस्तूयते इति प्रतिज्ञा। तदेवाह वाक्यशेषेण भूतं भवत् भविष्यत् इत्यादिना। उपलक्षणं कालदेशवस्तुपरिच्छिन्नं कार्यकारणभावेन स्थितमिव विभाव्यमानं तदतीतं च अव्याकृतम् इति च एतत्सर्वं ओङ्कार एव इत्यभिप्रायः। अयम् आशयः न केवलं कालत्रयातीतत्वेन अनुमेयव्याकृतं, किं तर्हि? व्याकृताव्याकृतविलक्षणं यत्परब्रह्मत्वेन व्यवह्रियते वेदान्तेषु तदप्योङ्कार एव। न त्वेतदतिरिक्तं किञ्चिदपि सम्भवति इति।

अथ द्वितीयवाक्येन एतदेव प्रपञ्चयितुम् आरभते 'सर्वं ह्येतत् ब्रह्म अयमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्' इति। ब्रह्मशब्दवाच्यं वस्तु यद्वेदान्तेषु प्रसिद्धं तदेव एतत् सर्वं यद्वर्णितं भूतं भवत् भविष्यत् इत्यादिना, यदेव उच्यते ओङ्कार इति तदेव हि ब्रह्म। अयमर्थः—नैवं मन्तव्यम् ओङ्कारो वाचको ब्रह्म तु तद्वाच्यम् इति। किं तर्हि, यदेव उक्तं परमार्थतत्त्वम् ओमित्येतदक्षरमिति तदेव इदानीमुच्यते ब्रह्मेति। यदि ओङ्कार इति व्यपदिश्यते यदि वा ब्रह्मेति उभयथापि वाच्यवाचकनिर्मुक्तं परमार्थतत्त्वमेव इति बोद्धव्यम्, तच्च तत्त्वं न परोक्षं किञ्चित्, किं तर्हि अयमात्मा। प्रत्यगात्मैव सर्वस्यापि। न हि प्रत्यगात्मा अनात्मवत् प्रविभक्तः नामनामिभावेन। नामनामवतोः उभयोरपि साक्षित्वात्। स च साक्षी न एकस्य यस्यकस्यचिदात्मा—"एको देवः सर्वभूतेषु गूढः ........ सर्वभूतान्तरात्मा ....... सर्वभूताधिवासः" (श्वे. ६-१५) इति च श्रुत्यन्तरात्। स च ब्रह्म अपरिच्छन्नत्वात् अद्वितीयत्वाच्च इति। कथमयमात्मा यथोक्तोङ्कारः इति एतदवगमयितुं तस्य चतुष्पात्त्वं कल्पयति—'सोऽयमात्मा चतुष्पात्' इति। तत्र कथमस्य आत्मनः ब्रह्मत्वम् इत्येतत् विशदयन् आदौ तावत् तस्य पादत्रयं स्फुटयति त्रिभिः—

**"जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः स्थूलभुक् वैश्वानरः प्रथमः पादः"**

**"स्वप्नस्थानः अन्तःप्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः"**

"यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एव आनन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञः तृतीयः पादः" इति।

अत्र एकस्यैव आत्मनः जाग्रदादिस्थानत्रयसंबन्धात् वैश्वानरत्वं तैजसत्वं प्राज्ञत्वं च उच्यते। सर्वत्र तत्तन्नाम्नामर्थेन निर्दिश्यते अवस्थाभिमान-स्वायुक्त्वर्थम्। सर्वत्र हि अहमस्म्यनात्मा आत्मा लोकेन सिद्ध एव। अहं जागर्मि, अहं स्वप्नमद्राक्षम्, अहम् अस्वाप्सम् इति च। तन्नामानि तु वैश्वानरः, तैजसः, प्राज्ञः इति न अभिधीयन्ते। अतस्मात्तत्प्रयोगाज्ञत्वेऽस्य शरीरात्मनो बाह्यविषया प्रज्ञा इति बहिष्प्रज्ञत्वं सुप्रसिद्धम्। वैश्वानरस्य कूटस्थैव स्वरूप-भूता सती प्रज्ञा …भासं तस्यैव शरीरस्य प्रज्ञा व्याप्नोति इति सोऽपि बहिष्प्रज्ञः इत्युपचर्यते। शरीरं हि … लिङ्गात्मासंयुक्तं मनआदि-… इन्द्रियद्वारेण … आत्मनि इत्युच्यते। तस्मात् तु वैश्वानरात्मा … [illegible] … व्याप्नोति इत्यतः जाग्रत्स्थानः इत्युपचर्यते। एवं जीवः मनोमात्रसमाविशिष्टः स्वप्नं पश्यति इति स्वप्नावस्थः स्वप्नभुक् इति प्रथयति। सप्ताङ्गत्वं च वैश्वानरस्य "तस्य ह वा एतस्य आत्मनः … पृथिव्येव पादौ" इति एवेयम् "आत्मसमाख्यानेन" इति … सह समानाम् अङ्गुल-श्रवणात्, तेन सर्वस्यापि प्रपञ्चस्य सांनिध्येऽविकलस्य वैश्वानरोपाधित्वं सिद्ध्यति। न तु पिण्डात्मन एव केवलम् आध्यात्मिककार्यकरणसङ्घातो-पाधिकत्वम्। तैजसस्य तु सर्ववासनामयसूक्ष्मोपाधिकत्वं भवतु सप्ताङ्गत्वोक्तिः। एकोनविंशतिमुखत्वं अंशस्य प्रसिद्धमेव। बुद्धीन्द्रियाणि पञ्च, कर्मेन्द्रियाणि पञ्च, प्राणादिवायवः पञ्च अन्तःकरणचतुष्टयं चेति हि एकोनविंशतिद्वाराणि स्थूलविषयभोगसंपत्तिः। वैश्वानरस्तु सर्वेषामपि विज्ञानात्मनां मनआदिषु चिदाभासप्रज्ञानेन्द्रियः सर्वमेव स्थूलविषयजातमवभासयति इत्यतः एकोन-विंशतिमुखः इत्युपचर्यते। एवं तैजसप्राज्ञयोरपि बोद्धव्यम्। प्रतिपन्न-विषयस्तु भाष्यस्य … प्रपञ्चान् विरतः।

सुषुप्ते स्थानविषयादर्शनात् तदिन्द्रियव्यवहाराभावाच्च सुखम् आत्मनि अवस्थितो जीवः । तत्र जीवस्य साक्षिरूपे प्रविलयेऽपि अज्ञानाभिभूतत्वं न उपगच्छति । आगन्तिकदृष्ट्या साक्षी तु विलयो भवति इत्यत इत्युक्तम्— 'एकीभूतः प्रज्ञानघन' इति । अत्र हि न विषयविषयिविभागः अनुभवति ज्ञातृस्वरूपयोरपि । तत्र हि सविषयाणामिन्द्रियाणां प्रविलयो भवति प्राणा-परानिवृत्ते प्राज्ञे इति आम्नायते कौषीतकिना "यदैतत् सुप्तः स्वप्नं न कञ्चन पश्यति, अथास्मिन् प्राण एव एकधा भवति, तदेनं वाक् सर्वैर्नामभिः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति" (कौ. ३-३) इति । श्रुत्यन्तरे च "अयं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्" (बृ. ४-३-२१) इति । तदत्र आत्मनः सर्वेषाम् विषयाणाम् इन्द्रियाणां [illegible] प्राज्ञेन एकीभाव एवेति सिद्ध्यति । तदत्र प्राज्ञस्य सर्वेषाम् तन्मयेति 'सुषुप्तस्थाने एकीभूतः प्रज्ञानघन एव' इति । यत्र ज्ञातृज्ञेयविभागो नास्ति तत्र भोक्तृभोग्य-विभागोऽपि नास्ति । अत एव आनन्दरूपेण प्राज्ञरूपेण अवस्थितो इत्याह—आनन्दमयः आनन्दभुक् इति । जीवो हि अत्र प्राज्ञे प्रलीन विषयविषयिविभागेन सुखभोगरूपाभासं न भजते । किं तु प्राज्ञस्य आनन्देन एकीभूतत्वमेव अस्य भोक्तृत्वम् । [illegible] हि इदं प्राज्ञे प्रविलयरूपा स्थितिः इति । प्राज्ञो पुन स्वरूपेणैव निरुपाधिस्वरूपः प्रज्ञान-घनानन्द[illegible] अनुभवति । [illegible] सुषुप्तिस्थानतया चोपाधिः उपचरित एव । जीवस्य च [illegible] कारणिकः सैव सुषुप्तिः, तदुपाधि-कत्वात् प्राज्ञोऽपि सुषुप्तिस्थानः इत्युच्यते इत्यनवद्यम् ।

अथ प्राज्ञस्य [illegible] विशेषणानि दर्शयति श्रुतिः— "एष सर्वेश्वरः एष सर्वज्ञः एषोऽन्तर्यामी एष योनिः सर्वस्य प्रभवा-प्ययौ हि भूतानाम्" (मा-६) इति । जीवस्य सुषुप्त्युपाधिकृत-[illegible] भोक्तृत्वं च भ-वति इत्यवोचाम । तदिदं [illegible] सूचितं, तत्रैव अपि [illegible] । सुषुप्ते तु सुषुप्तेऽपि प्राज्ञे प्रविलयात् जीवस्य प्राज्ञरूपेणैव अवस्थितिः [illegible] देशकालादिपरिच्छेदः प्रतिभासतेऽपि तत्

नास्त्येव। अतः अवतिष्ठमानम् आत्मस्वरूपं सर्वोपाधिविवर्जितमेव परमार्थतः। एष आत्मैव जाग्रत्स्वप्नयोः अविकलरूपस्तिष्ठति। तत्र अविद्याप्रत्युपस्थापितनामरूपवतः सर्वस्यापि स्वरूपस्थितिव्यापाराः एतदायात्ता एवेति सर्वेश्वरः एष एव। एष एव स्वरूपभूतेन ज्ञानेन सर्वं भासयते इत्यतः सर्वज्ञः। एष एव च सर्वभूतानामन्तरः सर्वमपि तत्कार्यकरणैः एव तत्तद्व्यापारे नियमयति इति अन्तर्यामी। एष एव च सर्वस्यापि अविद्या-प्रत्युपस्थापितविकल्पभूतस्य आस्पदम् इति सर्वेषां योनिः। भूतानामात्म-लाभे स्थितौ प्रलये च एतदात्मत्वावियोगात् प्रभवाप्ययौ भूतानामिति वाक्यार्थः।

तदेव सोपाधिकं सापेक्षं च अस्यात्मनः स्वरूपं अवस्थात्रयोपाधिकं वर्णितम्। अथ इदानीम् अस्य निरुपाधिकं निरपेक्षं च रूपं वर्ण्यते। **"नान्तः-प्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्। अदृष्ट-मव्यवहार्य-मग्राह्यमलक्षण-मचिन्त्य-मव्यपदेश्य-मेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः"** (मा. ७) इति। अत्र नान्तःप्रज्ञमित्यारभ्य नाप्रज्ञमित्यन्तम् अवस्थात्रयप्रतिबद्ध-सर्वविधप्रज्ञा-तदभावलक्षणविकल्पप्रतिषेधार्थं वाक्यम्। नित्यनिरपेक्ष-प्रज्ञानघनैकरसस्वरूपो ह्यात्मा स्वतः। अन्तःप्रज्ञत्वादिविकल्पास्तु अवस्थालक्षणमिथ्योपाध्यपेक्षाः तस्मिन् अध्यारोपिताः इति। अदृष्ट-मित्यारभ्य अव्यपदेश्यम् इत्यन्तं तु वाङ्मनइन्द्रियागोचरत्वज्ञापनेन बुद्धिशब्दकर्मलक्षणव्यवहारातीतत्वमाह। एकात्मप्रत्ययसारमिति सर्वा-नात्मप्रत्ययागोचरत्वम् प्रपञ्चोपशमम् इति जाग्रदादिस्थानतदन्तर्गतप्रपञ्चा-संस्पृष्टत्वम्, शान्तं शिवमद्वैतम् इति फलितार्थकथनं सर्वस्थानस्थानिधर्म-लक्षणविक्षेपशून्यसुखदुःखहर्षविषादादिप्रयोजकाशिववर्जितं परिपूर्णं तत्त्वमित्यर्थः।

सोऽयं चतुर्थः पादः मायिकस्थानित्रयलक्षणपादत्रयापेक्षया इति मन्यन्ते ब्रह्मविदः। स आत्मा स विज्ञेयः, स एव परमार्थात्मा स एव

जिज्ञासुभिः विज्ञेयः इत्यवधारणम्। अयमात्मा ब्रह्म इत्यत्र प्रतिज्ञातात्म-स्वरूपनिरूपणप्रकारेणोपसंहारार्थम्। अत्र च अन्तःप्रज्ञत्वादिधर्माणां तत्तत्स्थानप्रतिबद्धत्वात् स्थानानां च इतरेतरव्यभिचाराच्च स्थानस्थानित्व-राहित्यमात्मनः अध्यवसेयम्। आत्मप्रत्ययप्रमाणानुसारेण स्थानत्रयेऽपि अव्यभिचरितस्वरूपावगमात् परमार्थत्वं च। एवं च ईदृशात्माभिन्नं ब्रह्मैव सर्वमिति निश्चितत्वात् "सर्वं ह्येतद्ब्रह्मेति" प्रतिज्ञातार्थोऽपि अनुभवारूढो भवति। अथ यदादौ प्रतिज्ञातं **"ओम् इत्येतदक्षरमिदं सर्वम्"** इति तदप्यनुभवारूढं करिष्यामि इत्याह श्रुतिः **"सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति"** (मां. ८)

**"जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादिमत्त्वाद्वा आप्नोति ह वै सर्वान् कामान् आदिश्च भवति य एवं वेद"** (मां. ९)

**"स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वा उत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद"** (मां. १०)

**"सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्वम् अपीतिश्च भवति य एवं वेद"** (मा. ११)

अयमर्थः— यदुक्तम् ओमित्येतदक्षरमिदं सर्वम्, सर्वं ह्येतद्ब्रह्म इति च न तत् पदार्थद्वयमभिप्रेत्य; पृथक् पृथक् स्थितयोः द्वयोरपि युगपत् सर्व-प्रपञ्चात्मत्वासम्भवात्। किं नाम य एवासौ ओङ्कारः स एव अयमात्मा। कथम्? अभिधेयत्वम् अध्यारोप्य यदुक्तं सर्वं ह्येतत् ब्रह्मेति, तदेव इदानी-मभिधानत्वम् अध्यारोप्य ओङ्कार इति व्यपदिश्यते। तदेतत् परमार्थतत्त्वम् अभिधानाभिधेयभागरहितमजानतः जिज्ञासोः तत्र चित्तावतारोपायमात्रम्। वस्तुतस्तु यदेव अध्यात्मं ब्रह्मेति व्यपदिष्टं तदेव इदानीम् अध्यक्षरमोङ्कार इति वाचोयुक्त्या व्यपदिश्यते न तु वस्तुद्वयमिह विवक्षितम्।

कथमेतत्? पादत्रयत्वमध्यारोप्य यथा परमार्थात्मा चतुर्थपादत्वेन निर्दिष्टः, एवं स एव परमार्थः मात्रात्रयत्वमध्यारोप्य ओङ्कारत्वेन निर्दिश्यते ब्रह्मैव ओङ्कारः, ओङ्कार एव ब्रह्मेति यथा बुभुत्सवः अध्यवसेरन् इति। अध्यारोपापवाददृष्ट्या तु उच्यते पादा मात्रा मात्राश्च पादा इति। न हि लोके पदं पदार्थ इति च विभागोऽस्ति; अभिधानभूतपदाधीनश्च अभिधेयभूत-पदार्थबोधः; न तथा इह प्रतिपत्तव्यम्। किं तर्हि, आत्मनः पादा एव ओंङ्कारस्य मात्राः मात्रा एव पादाः। कल्पितपादवत् ब्रह्मात्मनः कल्पितमात्रावता ओङ्कारेण नित्यमनन्यत्वात्, सर्वाभिधेयत्वं यद्ब्रह्म तदेव हि सर्वाभिधान-सतत्त्वम् ओङ्कारोपदेशेन इदानीमुच्यमानम्। अभिधेयं च अभिधानाभिन्न-मेव न तु कदाचिदपि भिदा तयोरिति।

तदेव प्रपञ्च्यते 'जागरितस्थानो वैश्वानरः अकारः प्रथमा मात्रा' इति। ब्रह्मात्माभिन्नस्य ओङ्कारस्य प्रथमा मात्रा वैश्वानराभिन्नः अकारः। यावता उक्तं भवति वैश्वानर इति तावता उक्तं भवति अकार इति। कथम्? आप्तेः आदिमत्त्वाद्वा। अकारेण हि सर्वो वाक्प्रपञ्चः व्याप्तः एवं वैश्वानरेण विश्वं जगत्। न हि वैश्वानरेण अनाप्तं जगन्नाम अस्ति। वैश्वानरलक्षणसाक्षि-चैतन्येन संव्याप्तमेव हि जगत् सर्वमपि। प्रतीयमानरूपेणापि तस्य सत्तास्फुरत्तयोः चैतन्याधीनत्वात्, चैतन्यवियुक्तस्य जगतः सत्तायाः चिन्त-यितुमपि अशक्यत्वात्। तस्मात् वैश्वानरः अकारः आदिमत्त्वाच्च। यथा अक्षराणाम् अकारः आदिः, एवं वैश्वानरः इतरयोः, तत्पूर्वकत्वात् इतराधि-गमस्य। अत एव ह्याह श्रुतिः—"वैश्वानरः प्रथमः पादः" इति। तस्मात् ब्रह्माभिन्नत्वेन अवस्थितस्य ओङ्कारस्य वैश्वानरोऽकारः। एवं वैश्वानरम् अकारत्वेन अकारं च वैश्वानरत्वेन विज्ञातवतः वैश्वानराभिन्नत्वम् एव फलमिति स्पष्टम्। मन्दमध्यमाधिकारिणस्तु तथा विज्ञातुम् अशक्तस्य सर्वव्याप्तिसामान्यात्, आदित्वसामान्याच्च वैश्वानर एवायम् अकारः इत्येवं निरन्तरं भावयतः फलम् 'आप्नोति ह वै सर्वान् कामानादिश्च भवति' इति। एवं तैजसस्य, ओङ्कारद्वितीयामात्राभूतस्य उकारस्य च ऐक्यं वेदितव्यम्।

सूक्ष्मप्रपञ्चस्य तैजसशब्दवाच्यस्वप्नसाक्षिचैतन्यलब्धसत्तास्फूर्तित्वात् तैजसोकारयोः साम्यमपि। कथम्? यथा लोके उकारः अकारात् उत्थित इव अनुभूयते स्वोच्चारणे, एवं तैजसोऽपि विश्वात्, 'अस्य लोकस्य सर्वावतो मात्राम् अपादाय' इति जागरिततद्वासनायाः (तः) उत्कृष्टमिव हि दर्शयति श्रुत्यन्तरम्। 'उभयत्वाद्वा'—यथा उकारोच्चारणे ओष्ठयोः अर्धविवृत्या अकारेण साम्यम्, अर्धेन संवृत्या च मकारेण, एवं विषयदर्शनाविशेषत्वात् जागरिततुल्यत्वं, विषयस्य असत्त्वाच्च सुषुप्तितुल्यत्वं स्वप्नदर्शनस्य। तदुपाधिकत्वाच्च तैजसस्य उभयत्वम्। अतः तैजसोकारयोः परमैक्यम् अविदुषामपि मन्दमध्यमाधिकारिणाम् उकारस्य तैजसेन साम्यं निरन्तरं भावयताम् इदं फलम् भवति इत्याह—'उत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति' इति। विज्ञानसन्ततेः उत्कर्षः तस्या अभिवृद्धिः भवति इति उपासकस्य शत्रुमित्रोभयसमानत्वात् उभयेषामपि सम्मान्यताम् आप्नोति उभयत्वसामान्योपासनात् इत्यर्थः। अथ इदानीं प्राज्ञमकारयोः ऐक्यज्ञानं सामान्यचिन्तनफलं च अधिकारितारतम्येन आह। "सुषुप्तस्थानः प्राज्ञो मकारः तृतीया मात्रा"। अत्र प्राज्ञस्य मकारस्य च ऐक्यं सुस्पष्टम्। सुषुप्ते हि ग्राह्यग्राहकवाच्यवाचकादिसर्वविभागरहितत्वं सार्वजनीनम्। उक्तं च प्रागेव प्राज्ञस्य एकीभूतत्वं प्रज्ञानघनत्वं च। अतः प्राज्ञो मकारः, मकार एव च प्राज्ञः इत्येतत् सुसंवेद्यम्। अथापि तत्र विशेषज्ञानरहितत्वमालक्ष्य तत्र आत्मनः स्वरूपं ये अनुभवारूढं कर्तुम् असमर्थाः तेषां मकारे प्राज्ञसाम्यं चिन्तयितुं सौकर्यमापादयितुमाह 'मितेरपीतेर्वा' इति। ओङ्कारोच्चारणे पुनः पुनः प्रयुक्ते मकारे परिसमाप्तिः, इतरयोः मात्रयोः पुनः ततो निर्गमश्च प्रतीयते। यवानामिव मीयमानानां प्रस्थे प्रवेशः पुनर्निर्गमश्च इत्यतः मितिसामान्यं प्राज्ञमकारयोः। एवम् अपीतेर्वा मीयेते च आत्मविलयं कुर्वाते इव वैश्वानर-तैजसौ प्राज्ञे सुषुप्तावस्थायां। दर्शनवृत्तेः सर्वथापि लोपात् ओङ्कारोच्चारणे प्रयुज्यमाने मकारे एव अकारोकारयोः प्रविलय इव प्रतीयते यथा, अत आह अपीतिसामान्यम् इति। एवं सामान्यं चिन्तयतः उपासकस्य

फलम्—"मिनोति ह वा इदं सर्वम्" परमात्मनि प्रविलीयमानं सृष्टिस्थित्योरन्ते इति । अपीतिश्च भवति जगत्कारणत्वं च प्राप्नोति ।

अत्र ज्ञानप्रकरणत्वात् वैश्वानरत्वतैजसत्वप्राज्ञत्वादीनि मुख्यैकत्वज्ञानफलम् । आप्नोति आदिश्च भवति इत्यादि साम्यज्ञानफलं प्रधानसाधनभूतस्तुत्यर्थम्, मन्दमध्यमाधिकारिणां तु उपासनाफलम् इति विवेकः ।

अथ इदानीं मात्राभूतवैश्वानरादिविज्ञानेन साधनभूतेन परमं ज्ञानं कीदृशं भवति इति प्रदर्शयितुम् आह—**"अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद"** (१२) इति । अत्र तुरीयस्य पादत्वं वैश्वानरादिपादैः उपायभूतैः पद्यमानत्वात् ।

वैश्वानरादयस्तु पादा इत्युपचर्यन्ते अपादस्य आत्मनः यथैव, तथैव अकाराद्याः मात्राः इत्युपचर्यन्ते अमात्रस्य ओङ्कारस्य । न हि ओङ्कारः अनवच्छिन्नस्वरूपः सन् मीयते अकाराद्यादिभिः मात्राभिः इति युक्तम् । यद्यपि अक्षरात्मकः शब्दरूप ओङ्कारो मीयत एव अकारोकारमकारैः वर्णात्मकैः, तथापि अयं तु सर्वात्मभूत ओङ्कारः परमार्थात्माभिन्नस्वरूपस्थो नैव मीयते केनचित् इति साधूक्तम् अमात्रः इति । सोऽयम् अपरमार्थभूतवैश्वानरादिरूपपादादिमात्रात्रयापेक्षया चतुर्थः संख्यादिधर्मरहित एव सन्नपि । अव्यवहार्यश्चायं अभिधानाभिधेययोः अविद्याविकल्पितयोः अत्र क्षीणत्वात् । प्रप्रञ्चोपशमः खल्वपि अयं यथोक्तहेतोः एव । 'भूतं भवत् भविष्यदिति सर्वमोङ्कारः एव' इति प्रतिज्ञोक्तिस्तु अध्यारोपितकालदेशाद्यपेक्षया । वस्तुतस्तु नास्त्येव एतद्व्यतिरिक्तः प्रपञ्चो नाम कश्चिदिति प्रपञ्चोपशम एव स्वतः अद्वैतश्च यथाहुः—

**"प्रपञ्चो यदि विद्येत निवर्तेत न संशयः । मायामात्रमिदं द्वैतमद्वैतं परमार्थतः" मा. का. (१-१७)** इति ।

"संविशत्यात्मनात्मानं य एवं वेद," य एवं निरूपाधिकस्वरूपं ब्रह्मात्माभिन्नम् ओङ्कारं वेद, स्वसंवेद्यताम् आपादयति, सः आत्मन्येव आत्मनैव वैश्वानरत्वाद्युपाधिरहितेन आत्मानं स्वस्वरूपं संविशति। सम्यक् स्वस्वरूपप्रतिष्ठो भवति। नित्यनिर्विशेष ओङ्कार एव अहम् इति संवेत्ति इति। न तु ओङ्कारात् प्रविभक्तः सन् विद्याबलात् आत्मानं प्रविशति यथा अन्यः उपासकः। अत्र च एवमोङ्कार आत्मैव इत्युक्त्वा ओङ्कारः आत्मैव आत्मैव ओङ्कारः इति व्यतिहारेण मतिः कर्तव्या सर्वप्रपञ्चोपशमस्वरूपे सुनिश्चितार्थत्वाय। य एवं वेद सः आत्मना आत्मानं संविशति—इत्युक्तिस्तु यथा सुषुप्तादौ आत्मस्वरूपम् अविदित्वैव आत्मना सम्पद्यमानाः पुनरप्युत्थाय व्यवहारक्षेत्रं विशन्ति नायं विद्वान् तथा पुनरप्युत्तिष्ठति। किं तर्हि नित्यनिरस्तसर्वप्रपञ्चपरमार्थात्मैव अहम् इति विदितात्मस्वरूपत्वात्। व्यवहारदृष्ट्या एवंविदा संप्रयुक्त ओङ्कारः न केवलं त्रिमात्राक्षरमात्रं किं तु परमार्थाजाद्वितीयात्मैव स्वदृष्ट्या इत्यभिप्रायेण च आत्मैव इत्यवधारणम् इति सर्वं शिवम्।

## तुरीयात्मानुसन्धानप्रकारः संक्षेपतः

एवं संक्षेपतो व्याख्याता माण्डूक्योपनिषत्। अधिकं तु गौडपादकारिकासहितं सभाष्यं गुरुमुखादवगम्य पुनः पुनः तदर्थमननं कर्तव्यम्। यावत् परमार्थप्रणवे तादात्म्येन तत्रैव अवस्थितिः स्यात्, प्रणवश्च तदर्थानुसन्धानपूर्वकम्अजस्रं जप्यः श्रवणकालादन्यत्र। अत्र आह्निकवेलायां प्रणिधानसौकर्यार्थं उपदेशसाहस्रीतः श्लोकाः उदाह्रियन्ते। यदर्थानुसन्धानेन इदं हृदयमागच्छेत् यदेकस्मिन्नेव सर्वसाक्षिणि वैश्वानरत्वादिविकल्पः इति।

**विराड्वैश्वानरो बाह्यः स्मरन्नन्तः प्रजापतिः।**
**प्रविलीने तु सर्वस्मिन् प्राज्ञोऽव्याकृतमुच्यते॥**
**वाचारम्भणमात्रत्वात् सुषुप्तादित्रिकं त्वसत्।**
**सत्यो ज्ञश्चाहमित्येवं सत्यसन्धो विमुच्यते॥** उप. सा. १७-६५-६६

अयमर्थः—बहिष्प्रज्ञः साक्षी विविधं राजमानो वैश्वानरः स्मरन् अन्तः इन्द्रियव्यापारादुपरम्य अन्तःकरणेन तदेव स्मरन् वासनानुभवी यदा भवति जीवः तदा स एव साक्षी तैजसो भवति। स्मरणव्यापाराद्युपरमे सर्वमनो-व्यापाराभावात् प्राज्ञो अव्याकृतात्मा भवति सुषुप्ते यथा स एव साक्षी। एतेषां दर्शनस्मरणसर्वादर्शनलक्षणानां परस्परव्यभिचारत्वेन मृषात्वात् वाचारम्भणमात्रत्वम्। वाचैव हि आरभ्यन्ते तानि पश्यामि स्मरामि न किञ्चित् वेद्मि, इति च, न तु तानि कदाचिदपि साक्षिणः धर्मत्वेन अनुभूयन्ते इति। त्रिकं तु असत्, ज्ञस्वरूपस्य च साक्षिणः न कुत्रचित् व्यभिचारोऽस्तीति स एवैकः सत्यम् इत्येवम् अनृताभिसन्धिम् प्रविहाय यदा सत्यसन्धो भवति, सदनुसन्धानतत्परः स विमुच्यते इति। अत्र विराड्वैश्वानर इति विश्ववैश्वा-नरयोर्भेदः उच्यते इति केचिद्व्याचक्षते। तदुपेक्षम्, विश्वस्यैव वैश्वानरत्वात् इति अन्यत्र विस्तरः—

**दृष्ट्वा बाह्यं निमील्याथ स्मृत्वा तत् प्रविहाय च।**
**अथोन्मील्यात्मनो दृष्टिं ब्रह्म प्राप्नोत्यनध्वगः॥** उप. सा. १७-५७

अयमर्थः—दृष्ट्वा इन्द्रियैरर्थान्, अथ नेत्रादिकरणानि निमील्य तदेव स्मृत्वा तद्विषयस्मरणात्मकं सर्वमनोव्यापारं समुत्सृज्य, तूष्णीं स्थित्वा अथ आत्मनो दृष्टिं स्वरूपभूतां दृष्टिस्मरणतदभावसाक्षिभूतां स्वसंविदितां कृत्वा अनध्वगः देवयानमार्गेणागच्छन्नपि ब्रह्म प्राप्नोति। तादृशकूटस्थनित्य-चैतन्यस्यैव ब्रह्माभिन्नत्वादिति प्रथमश्लोकार्थः। अत्र जागरितस्वप्न-सुषुप्तानुभवान् अनुसन्धाय तत्साक्षी ज्ञ एवाहम् अव्यभिचरितस्वरूपः, न तु मम जागरिताद्यवस्थासंस्पर्शो व्यभिचारत्स्वरूपत्वात् जागरिताद्यवस्थानाम् इति वैश्वानरादिरूपापवादेन स्वरूपानुसन्धानमुपदिष्टम्। द्वितीये तु श्लोके जागरितावस्थायामेव वैश्वानरादीनां त्रयाणां पूर्वस्य पूर्वस्य उत्तरस्मिन् उत्तरस्मिन् प्रविलापनेन कूटस्थचैतन्यलक्षणे ब्रह्मात्मस्वरूपे अवस्थानम् उपदिश्यते इति विशेषः।

## अथ प्रणवद्वारेण परब्रह्मणः उपासनम्

तदेवं पादमात्रयोः ऐक्यप्रतिपादनरूपोपायेन परमार्थप्रणव-याथात्म्याधिगमप्रकारो निरूपितः, उत्तमाधिकारिणां सन्यासिनां प्रणवार्थानु-सन्धानेनैव मुख्यब्रह्मसंस्थता यथा सिध्येदिति। एतद्दृष्ट्या प्रणव एव वाच्यवाचकविभागरहितं ब्रह्म, ब्रह्मैव च प्रणवः, न तत्र परापरचिन्ता समस्ति। यथाहुः अभियुक्ताः—

**प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतः।**
**अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः॥**
**सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च।**
**एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम्॥** गौ. का. १-२६, २७

एवं निर्विशेषं ब्रह्मैव प्रणव इति विज्ञातवतः नान्तरीयकः प्रणवे तदात्मत्वेन प्रवेशः इत्यर्थः।

अथ इदानीम् ओङ्कारस्य ब्रह्मप्रतीकत्वेन उपासनं मन्दमध्यमाधि-कारिणां कृते निरूप्यते। तदर्थं प्रश्नोपनिषद्गतशैब्यपिप्पलादसंवाद-वाक्यानि उदाहृत्य संक्षेपेण वाक्याभिप्रायो लिख्यते। शैब्यस्य सत्यकामस्य प्रश्नः 'अथ हैनं शैब्यः सत्यकामः पप्रच्छ-स यो ह वै तत् भगवन् मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति। (प्र. ७-१) प्रश्नार्थः सुगमः। अत्र भाष्यम्—

"ओङ्कारमभिध्यायीत अभिमुख्येन चिन्तयेत् बाह्यविषयेभ्य उपसंहृत-करणः समाहितचित्तो भक्त्यावेशितब्रह्मभाव ओङ्कारे। आत्मप्रत्ययसन्ता-नाविच्छेदः भिन्नजातीयप्रत्ययान्तराखिलीकृतः निवातस्थदीपशिखा-समोऽभिध्यानशब्दार्थः। सत्यब्रह्मचर्याऽहिंसापरिग्रहत्यागसंन्यासशौचसं-तोषामायावित्वाद्यनेकयमनियमानुगृहीतः, स एवं यावज्जीवव्रतधारणः" (प्र. भा. भा. ७९) इति।

एतेन साक्षात् वस्तुतन्त्रज्ञानार्थम् अनुभवानुसारितर्कलक्षणं मननं कर्तुमसमर्थः विविदिषुः संन्यासी यमनियमादिसंपन्न एव प्रणवप्रतीकब्रह्मोपासने अधिकारी इत्युक्तं भवति ।

## प्रणवः परापरब्रह्मणः प्रतीकम्

**"तस्मै स होवाच । एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः । तस्माद्विद्वान् एतेनैवायतनेनैकतरमन्वेति** (प्र. ५-२)

एतत् पिप्पलादकर्तृकं प्रतिवचनम् । ओङ्कारः परब्रह्मणः अपरब्रह्मणश्च प्रतीकं भवति इति । अथ "यद्येकमात्रमभिध्यायीत," "यदि द्विमात्रेण... मनसि सम्पद्यते"—इति प्रणवस्य एकदेशप्राधान्येन ओङ्कारमभिध्यायतः मनुष्यलोकं सोमलोकं च फलमुक्त्वा, कृत्स्नम् ओङ्कारं ब्रह्मबुध्या अभिध्यायतः फलमाह पिप्पलादः—

**"यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नः । यथा पादोदरः त्वचा विनिर्मुच्यते, एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्मात् जीवघनात् परात् परं पुरिशयं पुरुषम् ईक्षते । तदेतौ श्लोकौ भवतः** (प्र. ५-५)

**तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ताः ।**
**क्रियासु बाह्यभ्यन्तरमध्यमासु सम्यक्प्रयुक्तासु न कम्पते ज्ञः ॥**
**ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत्कवयो वेदयन्ते ।**
**तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तत्**
**शान्तमजरममृतमभयं परं चेति ॥** प्र. ५-६-७

अत्र अकारोकारयोः प्रत्येकम् उपासनाविषयप्रश्नः यद्यपि नोपन्यस्तः, तथापि कृत्स्नोङ्कारमहिमानं ज्ञात्वा उपासितवतः फलं वक्तुमेव (आह)।

एकमात्रार्थज्ञानं द्विमात्रार्थज्ञानं च सफलमुच्यते । तत्स्तुत्यर्थम् इति स्पष्टम् । तथा च 'एकमात्रमभिध्यायित' इति एकमात्रार्थमेव कृत्स्नोङ्कारं मत्वा योऽभिध्यायीत तस्यैतत्फलम् इत्यर्थोऽवसीयते। एवं द्विमात्रेण इत्यपि मात्राद्वयार्थमेव कृत्स्नोङ्कारं मत्वा इत्यर्थोऽवगम्यते । एकदेशज्ञानमपि एतादृशं फलं सूते—'किमु वक्तव्यं कृत्स्नोङ्कारस्य निरतिशयं फलं भवति इति' इति ओङ्कारार्थविज्ञानं स्तूयते । अथ प्रतिज्ञावाक्ये परं चापरं च ब्रह्म यदोङ्कारः इत्युक्त्वा—'यः पुनः एतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' इत्युक्तेः परं पुरुषम् इति ध्येयं तत्त्वं किमुक्तमिति भवति विचिकित्सा । सूत्रभाष्ये परापरब्रह्मविवेकः एवमुक्तः—

"तत्र परापरब्रह्मविवेकानवधारणेन अपरस्मिन् ब्रह्मणि वर्तमानाः गतिश्रुतयः परस्मिन् अध्यारोप्यन्ते । किं द्वे ब्रह्मणी परं च अपरं च इति? बाढम् द्वे । 'एतद्वै सन्यकाम परं चापरं च ब्रह्म यदोङ्कारः' (प्र. ५-५) इत्यादिदर्शनात् । किं पुनः परं ब्रह्म किमपरम् इति? उच्यते । यत्र अविद्याकृतनामरूपादिविशेष-प्रतिषेधात् अस्थूलादिशब्दैः ब्रह्म उपदिश्यते तत्परम् । तदेव यत्र नामरूपादिविशेषेण केनचित् विशिष्टम् उपासनाय उपदिश्यते 'मनोमयः प्राणशरीरः भारूपः' (छां. २-१७-७) इत्यादिशब्दैः तदपरम्। नन्वेवम् अद्वितीयश्रुतिः उपरुध्येत। न। अविद्याकृतनामरूपोपाधिकतया परिहृतत्वात्"। (सू. भा. ४-३-१४)

## परं ब्रह्मैव अत्र उपास्यम्

तदत्र किं परं ब्रह्म उपास्यं कि वा अपरम् इति भवति संशयः—तत्र परब्रह्मणः उपास्यत्वमेव नास्ति—'स तेजसि सूर्ये सम्पन्नः सः सामभिरुन्नीयते ब्रह्मलोकम्' इति गतिपूर्वकं देशपरिच्छिन्नमेव च फलं श्रूयते इत्यतः अत्र अपरमेव ब्रह्म उपास्यतया उपदिश्यते इति केचित् । परं पुरुषमिति विराट्पुरुषापेक्षया प्राणस्य परत्वविवक्षया इति ते मन्यन्ते। तन्मतं व्युदस्य प्रणवस्यैव इह परब्रह्मदृष्ट्या उपास्यत्वम् उच्यते इति शारीरकभाष्ये राद्धान्तितम् । तत्र इदं निर्णयवाक्यम्—

"त्रिमात्रेण ओङ्कारेण आलम्बनेन परमात्मानम् अभिध्यायतः फलं ब्रह्मलोकप्राप्तिः, क्रमेण च सम्यग्दर्शनोत्पत्तिः इति क्रममुक्त्यभिप्रायकमेतत् भविष्यति इत्यदोषः" (सू. भा. १-३-१३)

"सामभिः उन्नीयते ब्रह्मलोकम् (प्र. ५-५) इत्यतीतानन्तरवाक्यनिर्दिष्टो यो ब्रह्मलोकः परश्च लोकान्तरेभ्यः सोऽत्र जीवघनः इत्युच्यते । जीवानां हि सर्वेषां करणपरिहृतानां सर्वकरणात्मानि हिरण्यगर्भे ब्रह्मलोकनिवासिनि संघातोपपत्तेः भवति ब्रह्मलोको जीवघनः । तस्मात् परो यः परमात्मा ईक्षण-कर्मभूतः स एव अभिध्यानेऽपि कर्मभूतः इति गम्यते" (प्र. १-३-१३) इति ।

अत्र शालग्रामे विष्णुरिव ओङ्कारे प्रतीकभूते परमात्मैव ध्यातव्यः इत्यभिप्रेतम् । तेन परं ब्रह्म कथम् उपासनायाः कर्म भवेत् इति शङ्का परास्ता ।

## गीतास्वपि प्रणवद्वारेण परब्रह्मोपासनम् उक्तम्

अथ भगवद्गीतास्वपि एवमेव प्रणवोपासनं विहितम् । तत् प्रदर्श्यते—

**सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।**
**मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्**
**ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।**
**यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥** गी. ६-१२-१३

इति प्रणवोपासनं विहितम् । तत्र यद्यपि भाष्ये एतद्वाचनिका एवंकृता—

"स यो ह वै तत् भगवन् मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति । तस्मै स होवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः (प्र. ५-१-२) इत्युपक्रम्य 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत ... स सामभिरुन्नीयते ब्रह्मलोकम् (प्र. ५-५) इत्यादिना वचनेन "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्" (क. १-२-१६)

इति च उपक्रम्य "सर्वे वेदा यत्पदमामनन्ति तपाँसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदँसङ्ग्रहेण ब्रवीम्योमित्येतत् (क. १-२-१५) इत्यादिभिश्च वचनैः परस्य ब्रह्मणः वाचकरूपेण, प्रतीकवत् प्रतिमारूपेण वा परब्रह्मप्रतिपत्तिसाधनत्वेन मन्दमध्यमबुद्धीनां विविक्षितस्य ओङ्कारस्य उपासनं कालान्तरे मुक्तिफलमुक्तं यत्, तदेव इहापि 'कविं पुराणमनुशासितारं (गी. ७-९) यदक्षरं वेदविदो वदन्ति (गी. ७-११) इति च उपन्यस्तस्य परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्य ओङ्कारस्य कालान्तरमुक्तिफलमुपासनं योगधारणासहितं वक्तव्यं प्रसक्तानुप्रसक्तं च यत्किञ्चित् इत्येवमर्थं उत्तरो ग्रन्थ आरभ्यते" (गी. भा. ७-१२) इति।

तथापि उपनिषत्सु परब्रह्मणः प्रतीकत्वेन वाचकत्वेन वा ओङ्कारस्य उपासनमुक्तम्। तदेव इहापि वाचकत्वेन वक्ष्यते इत्यभिप्रायकं द्रष्टव्यम्। 'व्याहरन् मामनुस्मरन्' इति वाच्यवाचकयोः विविच्य ग्रहणात्। अत्र तथैव हि भाष्यम्—"ओमित्येकाक्षरं परं ब्रह्म ब्रह्मणः अभिधानभूतम् ओङ्कारं व्याहरन् उच्चारयन् तदर्थभूतं मामीश्वरमनुस्मरन् अनुचिन्तयन् यः प्रयाति म्रियते" (प्र. ७-१३) इति।

तदेवम् उत्तमाधिकारिणा ओङ्कारार्थस्य अनुसन्धानं वाच्यवाचकभावरहितपरिशुद्धब्रह्मस्वरूपेण। मध्यमाधिकारिणा परब्रह्मवाचकत्वेन अनुसन्धानम्। मन्दाधिकारिणा तु ब्रह्मप्रतीकत्वेन तस्यैव ध्यानं च कर्तव्यम्। तत्र उत्तमाधिकारिणः प्रणवज्ञानेन इहैव परब्रह्मात्मना अवस्थानम्, इतरयोस्तु कालान्तरे ब्रह्मलोकप्राप्तिः, क्रममुक्तिश्च फलं भविता। तदेतादृशोङ्कारनिष्ठत्वमेव ब्रह्मसंस्थता नाम संन्यासिनः इति स्थितम्।

## अध्यात्मयोगोपायानुष्ठानम्

प्रश्नोपनिषदि "प्रायणान्तमोङ्कारमभिध्यायीत' इति विहितम् अभिध्यानं भावनासंतानात्मकम् उपासनमेव इति स्पष्टम्। प्रायणान्तमिति विशेषसामर्थ्यादिति। एवं गीतास्वपि 'मूर्ध्न्याधायात्मनः प्राणमास्थितो

योगधारणाम्' इति मूर्ध्नि प्राणधारणोपदेशात्। भाष्ये च—'मनो हृदि हृदयपुण्डरीके निरुध्य निरोधं कृत्वा निष्प्रचारम् आपाद्य तत्र वशीकृतेन मनसा हृदयात् ऊर्ध्वगामिन्या नाड्या ऊर्ध्वम् आरुह्य मूर्ध्नि आधाय आत्मनः प्राणम् आस्थितः प्रवृत्तो योगधारणां धारयितुम्" (गी. भा. ७-१२) इति मनसः हृदयादारभ्य मूर्धप्रदेशपर्यन्तं आरोहस्य कर्तव्यतया उपदेशात् । उत्तरत्र च—

**अनन्यचेताः सततं यो मां स्मरति नित्यशः ।**
**तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः** (गी. ७-१४)

इति श्लोकव्याख्यानावसरे—"सततम् इति नैरन्तर्यम् उच्यते, नित्यशः इति दीर्घकालत्वम् उच्यते । न षण्मासं संवत्सरं वा किं तर्हि यावज्जीवं नैरन्तर्येण यो मां स्मरति इत्यर्थः । तस्य योगिनः अहं सुलभः सुखेन लभ्यः हे पार्थ नित्ययुक्तस्य समाहितचित्तस्य योगिनः" (गी. भा. ७-१४) इति आदरसत्कारपूर्वकं यावज्जीवं कर्तव्योपदेशाच्च । तत्र इहैव उत्तमाधिकारिणामपि श्रवणमननाभ्यामेव अकृतार्थनां सम्यग्ज्ञानार्थं कर्तव्यो योगोऽप्यस्ति श्रुतिनिर्दिष्टः "अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति (क. ७-) इति । तत्तु न भावनारूपम् । किं तर्हि सूक्ष्मवस्तुप्रणिधानपूर्वकं विज्ञातुं प्रयत्नः । एष एव निदिध्यासनशब्देन अभिलप्यते । एतत्प्रकारस्तु श्रुत्या एवं विवृतः—

**यच्छेद्वाङ्मनसी प्राज्ञः तद्यच्छेत् ज्ञान आत्मनि ।**
**ज्ञानमात्मनि महति नियच्छेत् तद्यच्छेच्छान्त आत्मनि ॥**

क. १-३-१३

अस्यार्थः—वागुपलक्षितानि इन्द्रियाणि मनसि नियच्छेत् उपसंहरेत् । वागादिबाह्येन्द्रियव्यापारमुत्सृज्य मनोमात्रेण अवतिष्ठेत । इन्द्रियव्यापारोत्सर्गस्तु न केवलं वाक्पाण्यादीनां चक्षुरादीनां च निर्व्यापारीकरणं सुषुप्तादाविव । किं तर्हि मन एव हि बुद्धीन्द्रियादिषु तादात्म्यं भजत् बहिर्मुखं

भवति, इति आलोचनेन सर्वेषाम् इन्द्रियाणामपि मनोमात्रत्वेन दर्शनम् एव। तच्च मनः ज्ञाने बुद्धौ नियच्छेत्। बुद्धिरेव मनआदीनि व्याप्य वर्तते। तस्मात् तानि आप्नोति इति ज्ञानात्मा इत्युच्यते बुद्धिः। एवं मनसः प्रत्यक्तरे ज्ञानात्मनि सेन्द्रियं मन उपसंहृत्य तं च ज्ञानात्मानं बुद्धिं महति आत्मनि भोक्त्रात्मनि नियच्छेत्। भोक्तृव्यतिरेकेण बुद्धेः स्वातन्त्र्येण अस्तित्वं नास्ति इत्यवधारयेत्। अथवा आत्मनि महति इति प्रथमजहिरण्यगर्भबुद्धौ नियच्छेत्। प्रथमजस्य बुद्धिः शुद्धसत्त्वरूपत्वात् अत्यन्तस्वच्छं सूक्ष्मं च वर्तते। तद्वत् स्वच्छां सूक्ष्मां च कुर्यात् इत्यर्थः। ततस्तं महान्तमात्मानं स्वच्छं सूक्ष्मं च शान्ते आत्मनि प्रत्यस्तमितसर्वविशेषे सर्वान्तरे नियच्छेत्। तद्व्यतिरेकेण नास्त्येव बुद्धेः अस्तित्वमित्यवधानेन निश्चिनुयात् इति।

## गीतासु वर्णितो ध्यानयोगः अध्यात्मयोग एव

इन्द्रियादीनाम् उत्तरोत्तरं स्वकारणे प्रत्यगात्मभूते मनआदौ सूक्ष्मदर्शनेन प्रविलाप्य पर्यवसाने प्रत्यगात्मनि यदवस्थानं तदेव अध्यात्मयोगस्य परा काष्ठा इत्येतद्दर्शितम् अधस्तात्। सोऽयम्अध्यात्मयोगो गीतास्वपि ध्यानयोगापराभिधानेन षष्ठे अध्याये प्रतिपादितः

**योगी युञ्जीत सततम् आत्मानं रहसि स्थितः।**
**एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥**
**शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।**
**नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥**

**तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।**
**उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये॥**
**समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।**
**संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥**

**प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।**
**मनस्संयम्य मच्चित्तो युक्त आसीत मत्परः ॥**
**युञ्जन्नेवं सदात्मानं योगी नियतमानसः**
**शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥**

**सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः ।**
**मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥**
**शनैः शनैरुपरमेद् बुध्या धृतिगृहीतया ।**
**आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥**

**यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।**
**ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥**
**प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ॥**
**उपैति शान्तरजसं ब्रह्मभूतकल्मषम् ॥**

**युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः**
**सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥** इति ॥

इन्द्रियाणि मनसि अन्तःकरणे, मनश्च प्रत्यगात्मनि ब्रह्मण्येव उपसंहृत्य तदात्मना अवतिष्ठेत इत्यर्थः ।

ब्रह्मसंस्पर्शो ह्यत्र ब्रह्मणा परेण एकीभाव एव । स च न क्वचित्तु क्वाचित्कावस्थाप्रतिबद्धः समाधिविशेषः । किंतु परमात्मदर्शनमेव । तदाह

**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।**
**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥** गी. ६-२९

**यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।**
**तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥** गी. ६-३०

विस्तरस्तु गीताभाष्यात् गुरमुखाच्च अधिगन्तव्यः ।

गौडपादीयकारिकासु उक्तो मनोनिग्रहोऽपि अयमेव योगः । एष एव निदिध्यासनापरनामधेयः अध्यात्मयोगः श्रीगौडपादकारिकासु मनोनिग्रहाभिधानेन उपस्थापितः । स च निग्रहो द्वाभ्यां प्रकाराभ्यां भवति—इति तत्र उक्तम् । प्रथमप्रकारस्तु—

**आत्मसत्यानुबोधेनं न सङ्कल्पयते यदा ।**
**अमनस्तां तदा याति ग्राह्याभावे तदग्रहम् ॥** गौ. का. ३-३२

इत्युक्तरीत्या आत्मदृष्ट्या निरूप्यमाणे सर्वं तद्व्याप्तं तदाभासं च आत्मन्येव कल्पितम् । आत्मैव तु परमार्थसत्यम् इति शास्त्राचार्योपदेशमनुसृत्य यदा जिज्ञासोर्बोधो भवति, तदा मनो निगृहीतं भवति । शान्तं भवति । आत्मन्येव अध्यस्तमिदं विकल्पमात्रम् इत्यनुभवो जायते । यद्यपि सुषुप्तौ आत्मसत्यानुबोधाभावेऽपि प्रलीनमेव भवति मनः अद्वैतात्मैव तु अवशिष्यते, तथापि अज्ञानबीजसत्त्वात् पुनरपि प्रबोधे मनसः प्रत्युत्थानं भवति । आत्मसत्यानुबोधेन निगृहीतं तु मन आत्मत्वेनैव विज्ञातम् इति तस्य पुनरुत्थानं न भविष्यति । यथोक्तम्—

**निगृहीतस्य मनसो निर्विकल्पस्य धीमतः ।**
**प्रचारः स तु विज्ञेयः सुषुप्तेऽन्यो न तत्समः ॥**

**लीयते हि सुषुप्ते तु निगृहीतं न लीयते ।**
**तदेव निर्भयं ब्रह्म ज्ञानालोकं समन्ततः ॥**

गौ. का. ३-३४-३५, इति ।

अत्र निर्विकल्पसमाधिबलेन निगृहीतं सत् मनः सुषुप्तादाविव न लीयते इति व्याचक्षते केचित् समाधिवादिनः । तन्न साधु व्याख्यानम् । नहि आत्मसत्यानुबोधेन निर्विकल्पसमाधिमिच्छन्ति ब्रह्मवादिनः । अतो ज्ञानेन मनसो बाध एव अत्र मनोनिग्रहवाचोयुक्त्या भण्यते ।

## अथ द्वितीयप्रकारो मनोनिग्रहस्य

**मनसो निग्रहायत्तम् अभयं सर्वयोगिनाम् ।**
**दुःखक्षयः प्रबोधश्चाप्यक्षया शान्तिरेव च ॥** गौ. का. ३-४०

पूर्वम् आत्मबोधेन मनसो निग्रहो भवति इत्युक्तम् । अत्र तु मनोनिग्रहेण दुःखक्षयः प्रबोधश्च भवतः इत्युच्यते । पूर्वं बोधनान्तरियको मनोबाधः, इह पुनः मनोनिग्रह एव साधनं प्रबोधे इति वैपरित्यम् । तत्र मनसो निग्रहः कथं कार्यः ? इत्यत्र इमे श्लोका उत्तरत्वेन प्रवृत्ताः—

**उपायेन निगृण्हीयात् विक्षिप्तं कामभोगयोः ।**
**सुप्रसन्नं लये चैव यथा कामो लयस्तथा ॥**
**दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् ।**
**अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति ॥** गौ. का. ३-४२-४३

तत्र आदौ वैराग्येण विषयेभ्यः मनः प्रतिनिवर्तयेत—ततः अजाद्वयं ब्रह्मैव सर्वम् इत्यनुस्मरणेन मनसः प्रतीयमानस्यापि आत्मत्वं निश्चेतुं शक्नुते इत्याह—

**लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः ।**
**सकषायं विजानीयात् समप्राप्तं न चालयेत्— ॥** गौ. का. ३-४४

लीयमानं चित्तं विवेकदर्शनेन सम्बोधयेत्, सम्बुद्धं सत् विक्षिपते चेत् वैराग्याभ्यासेन शमयेत् । एवं विवेकवैराग्याभ्यासलक्षणेन उपायद्वयेन विक्षेपलयाभ्यां रक्षितं मनः सकषायं तिष्ठेत्—सराग एव अवतिष्ठेत, तावतैव अपरितुष्ट आत्मसाम्यापादने प्रयत्नं कुर्यात् इत्यर्थः ।

**नास्वादयेत् सुखं तत्र निस्सङ्गः प्रज्ञया भवेत् ।**
**निष्चलं निश्चरच्चित्तमेकीकुर्यात् प्रयत्नतः ॥** गौ. का. ३-४५

समाधिस्थितावस्थायां यत्सुखमिव विभाव्यते, तत्र निस्सङ्गो भवेत्। पुनः निश्चरति चेत् प्रत्यावृत्या आत्मन्येव एकीकुर्यात्—आत्माभासमात्रम् इत्यपि आत्मत्वावलोकनेन तन्निरोधं कुर्यात् इत्यर्थः।

**यदा न लीयते चित्तं न च विक्षिप्यते पुनः।**
**अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा॥** गौ. का. ३-४६

यदा अभ्यासवैराग्यबलात् आत्मन्येव एकीकरणप्रयत्नेन च लय-कषाय रसास्वाद-विक्षेपेभ्यः विनिवर्तितं मनः ब्रह्मात्मत्वेन अवतिष्ठते इत्यर्थः।

अत्रापि **'निष्पन्नं ब्रह्म तत्तदा'** इति दृष्टफलत्वेन मनोनिग्रहस्य प्रतिपादनात् उपासनातो विलक्षणं—निदिध्यासनमेवेदम् इत्यवगम्यते॥

## अथ स्मृतिप्रमाणवाक्यानि

## तत्र आपस्तम्बधर्मसूत्रम्

एवं तावत् पारमहंस्यविधिः परमहंसलक्षणं तद्धर्माश्च निरूपिताः, प्रस्थानत्रयभाष्यादृतमार्गमनुसृत्य। अथ इदानीं पारमहंस्यपरमार्शक-वाक्यानि, यतिसामान्यम् अधिकृत्य प्रवृत्तानि च स्मृतिवाक्यानि उदाहरिष्यन्ते। प्रसङ्गागतं च यत्किञ्चित्।

### आत्मज्ञानम्

पतनीयानि अशुचिकराणि च उक्त्वा तेषां प्रायश्चित्तानि वक्ष्यन् आत्मज्ञानं तदुपयोगिनश्च योगानाह। ज्ञानस्य सर्वमहत्वात् —(द्वाविंशः अध्यायः)।

**आध्यात्मिकान् योगान् अनुतिष्ठेत् न्यायसंहितान् अनैश्चरिकान्। आत्मलाभान्न परं विद्यते।**

**तत्र आत्मलाभीयान् श्लोकान् उदाहरिष्यामः ।**

**पूः प्राणिनः सर्व एव गुहाशयस्य अहन्यमानस्य विकल्मषस्य । अचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः ।**

**यदिदमिदिह लोके विषयमुच्यते ।**
**विधूय कविरेतदनुतिष्ठेद्गुहाशयम् ॥**

(विषयाशां विधूय आत्मानम् अनुतिष्ठेत् इत्यर्थः)

**आत्मन्येवाहमलब्ध्वैतत् हितं सेवस्व नाहितम् ।**
**अथान्येषु प्रतीच्छामि साधुष्ठानमनपेक्षया ॥**
**महान्तं तेजसस्कायं सर्वत्र निहितं प्रभुम् ।**

(पराधीनम् अहितं विषयं परित्यज्य आत्मानं सेवस्व)

**सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवः ।**
**अनङ्गोऽशब्दोऽशरीरोऽस्पर्शश्च महान् शुचिः ।**
**स सर्वं परमा काष्ठा स वैषुवतं स वै वैभाजनं पुरम् ॥**

(वैषुवतं-विषुवन्नाम्नोगवामयनस्य मध्ये भवम् अहः तदिव अङ्गानां मध्ये भवति इति, वैभाजनं पुरं विविधैः मार्गैः भजत् पुरं वैभाजनं.... उभयत्र स्वार्थे तद्धितप्रत्ययः)

**तं योऽनुतिष्ठेत् सर्वत्र प्राध्वं चास्य समाचरेत् ।**
**दुर्दर्शं निपुणं युक्तो यः पश्येत् स मोदेत विष्टपे ॥**

(यच्चास्य सदा प्राध्वं आनुकूल्यम् आचरेत्)

(अथ त्रयोविंशः खण्डः)

**आत्मन् पश्यन् सर्वभूतानि न मुह्येत् चिन्तयन् कविः ।**
**आत्मानं चैव सर्वत्र यः पश्येत् स वै ब्रह्मा नाकपृष्ठे विराजति ॥**

(ब्रह्मा ब्राह्मणः)

**निपुणोऽणीयान् विसोर्णाया यः सर्वमावृत्य तिष्ठति।**
**वर्षीयाँश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति॥**

**स इन्द्रियैर्जगतोऽस्य ज्ञानात् अन्योऽनन्यस्य**
**ज्ञेयात् परमेष्ठीविभाजः।**
**तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः॥**

(बिसोर्णायाः बिसतन्तोः अपि अणीयान् इन्द्रियार्थज्ञानात् अन्यो [illegible]स्वरूपः परमेष्ठी स्वमहिम्नि प्रतिष्ठितः)

अथ दोषनिर्हरणं—

**दोषाणां तु निर्घातो योगमूल इह जीविते।**
**निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः॥**
**अथ भूतदाहीयान् दोषान् उदाहरिष्यामः।**

**क्रोधो हर्षो रोषो लोभो मोहो दम्भो द्रोहो मृषोद्यम् अत्याशपरी-[illegible]वादौ असूया काममन्यू अनात्म्यम् अयोगस्तेषां योगमूलो निर्घातः।**

**अक्रोधो अहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवदनम् अनत्याशोऽपैशुनम् अनसूया संविभागः त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधः योग आर्यम् आनृशंस्यं तुष्टिरिति सर्वाश्रमिणां समयपदानि तान्यनुतिष्ठन् विधिना सार्वगामी भवति।**

([illegible] सर्वाश्रमाणां समयपदानि इति यद्यपि अविशेषेण उपदेशः तथापि [illegible]बन्धपरिहाराय विशिष्य यतिभिः अनुष्ठेयानि एतानि साधनानि। [illegible] उपदेशसाहस्र्यां गद्यबन्धे अग्रहणहेतून् अधर्मादीन् तत्प्रतिपक्षैः [illegible]कृतैः अपनयेत् इति विहितं दृश्यते।

## आश्रमविचारः

(आप. ध. सू. २-९-३१)

**चत्वार आश्रमाः गार्हस्थ्यम् आचार्यकुलं मौनं वानप्रस्थमिति।** (मौनं ज्ञानप्रधान आश्रमः)

**तेषु सर्वेषु यथोपदेशम् अव्यग्रो वर्तमानः क्षेमं गच्छति।**
**सर्वेषां उपनयनप्रभृति समान आचार्यकुले वासः।**
**सर्वेषाम् अनूत्सर्गो विद्यायाः।**

**बुध्वा कर्माणि यत्कामयेत तदारभेत।** (तमाश्रमं प्रतिपद्येत इत्यर्थः)

**यथा विद्यार्थस्य नियमः एतेनैव आन्तमनूपसीदतः आचार्यकुले शरीरन्यासो ब्रह्मचारिणः।** (नैष्ठिकस्य इत्यर्थः।)

**अथ परिव्राजः। अत एव ब्रह्मचर्यवान् प्रव्रजति। तस्योपदिशन्ति अनग्निरनिकेतःस्यात् अशर्माशरणः मुनिः स्वाध्याय एवोत्सृजमानो वाचं ग्रामे प्राणवृत्तिं प्रतिलभ्य अनीहः अनमुत्रः चरेत्। तस्य मुक्तमाच्छादनं विहितं।** (मुक्तं परित्यक्तं) **सर्वतः परिमोक्षमेके** (नग्न एव चरेत् इति। विधितो निषेधतश्च परिमोक्षमिति वा।)

**सत्यानृते सुखदुःखे वेदान् इमं लोकम् अमुं च परित्यज्य आत्मानम् अन्विच्छेत्। बुद्धे क्षेमप्रापणं। तच्छास्त्रैः विप्रतिषिद्धं।**

(यानि यतेरेव कर्तव्यकर्मप्रतिपादकानि शास्त्राणि तैरेव तत् विप्रतिषिद्धम् इति हरदत्तः। तानि विविदिषुं प्रति प्रवृत्तानि। विदुषस्तु स्वत एव लक्षणभूतानि अक्रोधादीनि न तु विधिप्रयुक्तानि इत्यपि शक्यं प्रत्यवस्थातुम्।

**बुद्धे चेत् क्षेमप्रापणम् इहैव न दुःखमुपलभेत।**

(अत्र-'अतो न दुःखित्वाद्यभावं न कश्चित् प्रतिपद्यते इति चेत्। न। देहाद्यभिमानवत् दुःखित्वाद्यभिमानस्य मिथ्याभिमानत्वोपपत्तेः' (ब्र. सू. भा. ४-१-२) इत्यादि द्रष्टव्यं च कृत्स्नं भाष्यम्। विधिनिषेधपरिमोक्षणं तु न स्वैरचारेण। किं तु अनात्मन्येव सुखदुःखादिसम्बन्धदर्शनेन इत्यनवद्यम्।)

**एतेन परं व्याख्यातम्।**

(परलोकभवतापदुःखं न स्वैरचारिणां निवर्तते इति हरदत्तः। अभ्युपगम्यते एतत् सद्योमुक्तिवादिभिः। न हिं स्वैरचारः मुक्तस्य सम्भवति। निरभिमानत्वात् तस्य। न च मुक्तस्य इहैव अद्वितीयात्मरूपेण अवस्थितस्य ऐहिकं पारत्रिकं वा सुखं दुःखं समस्ति।)

**अथ पुराणे श्लोकौ उदाहरन्ति**

**अष्टाशीतिसहस्राणि ये प्रजामीषिरे ऋषयः।**
**दक्षिणेनार्यम्णः पन्थानं ते श्मशानानि भेजिरे॥**
**अष्टाशीतिसहस्राणि ये प्रजां नेषिरे ऋषयः।**
**उत्तरेणार्यम्णः पन्थानं तेऽमृतत्वं हि कल्पते॥**

**इत्यूर्ध्वरेतसां प्रशंसा।** (अमृतत्वाय कल्पन्ते इति नेयम्।)

**अथापि सङ्कल्पसिद्धयो भवन्ति यथावर्षं प्रजादानं दूरेदर्शनं मनोजवतां यच्च अन्यदेव युक्तम्। तस्मात् श्रुतितः प्रत्यक्षफलत्वाच्च विशिष्टान् आश्रमान् एतानेके ब्रुवते।** (अत्र शिष्टैः सूत्रैः गार्हस्थ्यं प्रशस्यते। अन्तिमसूत्रे तत्र हरदत्तः—तदेवम् **ऐकाश्रम्यं त्वाचार्याः** (गौ. ध. ३-३६) इत्ययमेव पक्षः स्थापितः। अन्ये मन्यन्ते सर्वे आश्रमाः दूषिता भाषिताश्च ततः **तेषु सर्वेषु यथोपदेशम् अव्यग्रो वर्तमानः क्षेमं गच्छति** (२-२१-२) इत्येतदेव स्थितमिति।

भाष्यकारमते तु इतरे पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रौत एव पक्षः स्थितः।

## गौतमधर्मसूत्रम्

अथ गौतमधर्मसूत्राणि कतिचित् उदाह्रियन्ते। यतः भाष्येषु आपस्तम्बधर्मसूत्रवत् गौतमसूत्रमपि प्रमाणत्वेन धृतमुपलभ्यते।

### आश्रमविकल्पसमुच्चयविचारः

**१. तस्याश्रमविकल्पमेके ब्रुवते** (यो अध्यात्मज्ञानी तेन विकल्पपक्षः समाश्रयणीयः, इतरेण समुच्चयपक्षः इति मस्करिभाष्यम्। जिज्ञासोरपि विरक्तस्य विकल्पपक्षाश्रयणम् उपपादितम् अस्माभिः। "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" (बृ.) इति श्रुतिमाश्रित्य।) **२. तेषां गृहस्थो योनिः। ३. अप्रजनत्वात् इतरेषाम्। ४. तत्रोक्तं ब्रह्मचारिणः। ५. आचार्याधीनत्वमान्तम्। ६. गुरोः कर्मशेषेण जपेत्। ७. गुर्वभावे तदपत्यवृत्तिः। ८. तदभावे वृद्धे सब्रह्मचारिणि अग्नौ वा। ९. एवंवृत्तो ब्रह्मलोकम् अवाप्नोति जितेन्द्रियः। १०. उत्तरेषां चैतत् अवरोधि।**

(एतत् नैष्ठिकप्रवृत्तं यदविरुद्धं ब्रह्मचारिणः इत्युक्तं तत् यतिभिरपि आश्रयणीयम्; तेन अग्निकार्यं यतेः नेष्यते।)

**११. अनिचयो भिक्षुः** (अनिचयशब्देन अनुपचायकद्रव्यस्य त्यागः उच्यते, न नित्यद्रव्यस्य शिखायज्ञोपवीतादेः इति मस्करी। तत्तु जाबालश्रुत्यादिविरुद्धमिति अस्माभिः उपपादितम्।)

**१२. ऊर्ध्वरेताः। १३. ध्रुवशीलो वर्षासु। १४. भिक्षार्थी ग्राममियात्। १५. जघन्यम् अनिवृत्तं चरेत्** (जघन्यं भोजनक्रियातः पश्चात्) **१६. निवृत्ताशीः। १७. वाक्चक्षुःकर्मसंयतः** [भिक्षादानाभिवादनादौ आशिषां अप्रयोक्ता इत्यर्थः। वाक्संयमो मौनम् अन्यत्र स्वाध्यायजपपरिप्रश्नधर्मयोगप्रश्नेभ्यः इति च भाष्यम्।) **१८. कौपीनाच्छादनार्थं**

**वासो बिभृयात्। १९. प्रहीणमेके निर्णिज्य।** [रथ्यादौ परित्यक्तं तत्प्रक्षाल्य परिदध्यात्, निर्णिज्य इति प्रत्यात्मिकशौचप्रापणार्थं इति भाष्यम्] २०. **नाविप्रयुक्तम् ओषधिवनस्पतीनाम् अङ्गमुपाददीत**। [ततो अनपगतं शाखापत्रादि इति भाष्यम् ]

**२१. न द्वितीयां अपर्तुरात्रिं ग्रामे वसेत्**। [ऋतुशब्देन वर्षा एव उच्यन्ते]

२२. **मुण्डः शिखी वा** [शिखायज्ञोपवीतादित्यागः प्रागुक्तः परमहंसविषये ]

२३. **समो भूतेषु हिंसानुग्रहयोः**।

२४. **अनारम्भी**। [अज्ञातवधशुद्ध्यर्थं रात्रावहः त्रीन् प्राणायामान् धारयेत् इत्यन्यत्र]

२५. **ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्य**। [पारिव्राज्यविधानपक्षः साधितः शारीरके]।

२६. **वर्णाः आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवित्तसुखमेधसो जन्म प्रतिपद्यन्ते।**

[स्वकर्मणा भगवन्तमभ्यर्च्य सत्त्वशुद्धिमधिगच्छन्ति इति गीतासु। ज्ञानिनां तु परमहंसानां ब्रह्मभूतानां ब्रह्मनिर्वाणप्राप्तिः इति च]

## अथ बोधायनधर्मसूत्रम्

**ब्रह्मचारी गृहस्थः वानप्रस्थः परिव्राजक इति** (२-६-१४)

**ब्रह्मचारी गुरुशुश्रूषी आमरणात्** १५

**वानप्रस्थो वैखानसशास्त्रसमुदाचारः वैखानसो वने मूलफलाशी तपश्शीलः सवनेषु उदकमुपस्पृशन् श्रामणकेन अग्निमाधाय अग्राम्यभोजी देवपितृभूतमनुष्यर्षिपूजकः सर्वातिथिः प्रतिषिद्धवर्जं भैक्ष्यम् उपयुञ्जीत-१६ न फालकृष्टमधितिष्ठेत्। ग्रामं च न प्रविशेत्। जटिलः चीराजिनवासाः नातिसंवत्सरं भुञ्जीत। १७**

(भा-विखनसा ऋषिणा प्रोक्तं वैखानसशास्त्रम्। सवनेषु उदकोपस्पर्शनं त्रिषवणस्नानम्। श्रामणो नाम आधानविधिः। तेन अग्निमाधाय जुहुयात् इति शेषः। अग्राम्यं श्यामाकादि आरण्यौषधिसम्भवम्। सर्वः आगतः अतिथिः ततः तेनैव पूजयेत् इत्यर्थः। तत्रापि प्रतिषिद्धवर्जं पतितादिवर्जं। चीरं वृक्षादानीतं वासः। नातिसंवत्सरम् इत्यनेन गम्यते तावन्तं कालं सञ्चयो द्रव्यस्यास्ति।)

**परिव्राजकः परित्यज्य बन्धून् अपरिग्रहः परिव्रजेत् यथाविधि।** १८.

**अरण्यं गत्वा** १९. **शिखामुण्डः** २०. **कौपीनाच्छादनः** २१. **वर्षासु एकस्थः** २२. **काषायवासाः** २३.

**सन्नमुसले व्यङ्गारे निवृत्तशरावसम्पाते भिक्षेत।** २४.

(अत्र अनुसन्धेयः मनुः)

**वाङ्मनःकर्मदण्डैः भूतानामद्रोही** (अभयं सर्वभूतेभ्यो दद्यात् यावत्।)

**पवित्रं बिभृयात् शौचार्थम्** (२६) (पवित्रं कुशमुष्टिः पञ्चमुष्टिः वनजटीपवित्रं बिभ्रद्वर्तेत—इति शेषः। तद्धरणं च आत्मशुद्ध्यर्थं देहात् देशाद्वा जन्तूनां शोधनार्थं इति गोविन्दस्वामी)

**उद्धृताभिः अद्भिः कार्यं कुर्यात्** २७

[मूत्रपुरीषप्रक्षालनं न तु आचमनम्]

**अपविद्ध्य वैदिकानि कर्माणि उभयतः परिच्छिन्ना मध्यमं पदं संश्लिष्यामह इति वदन्तः**-२८

**ऐकाश्रम्यं त्वाचार्याः अप्रजनत्वादितरेषाम्**। २९

**तत्रोदाहरन्ति-प्राह्लादिर्ह वै कपिलो नाम असुर आस। स एतान् भेदान् चकार देवैस्सह स्पर्धमानः तान्मनीषी नाद्रीयेत**। ३०

**अदृष्टत्वात्** । ३२ । **ये चत्वारः इति कर्मवादः ऐष्टिकपाशुक-सौमिकदार्वीहोमानाम्**।

३२. **तदेषाभ्यनूच्यते—"एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान्। तस्यैवात्मा पदवित्तं विदित्वा। न कर्मणा लिप्यते पापकेन" इति**।

३३. **स ब्रूयात्—येन सूर्यस्तपति तेजसेद्धः। पिता पुत्रेण पितृमान् योनियोनौ। नावेदविन्मनुते तं बृहन्तम्। सर्वानुभुमात्मानं सम्पराये**
[कर्माप्यपेक्षकं मोक्षाय इत्यस्मिन् अर्थे उदाहरणमिदम्]

३४. **इमे ये नार्वाङ् न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः। त एते वाचमभिपद्य पापया सीरीस्तन्त्रं तन्वते अप्रजज्ञयः**। [इमे जनाः वाचं वेदम् अभिपद्य अधीत्य पापया वाक्प्रतिरूपया धीरास्तमसि शेरते इति सिरीः तन्वते विस्तारयन्ति पोषयन्ति इत्यर्थः। तन्त्रं कर्म अप्रजज्ञयः अजानन्तः अपेतज्ञानाः इति शास्त्रे वेदे नार्वाङ् अर्वाञ्चः नापि पराञ्चः चरन्ति उभयभ्रष्टाः इत्यर्थः इति व्याख्या]

३५. **प्रजाभिरग्ने अमृतत्वमश्याम्। जायमानो वै ब्राह्मण-**

**स्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यः यज्ञेन देवेभ्यः प्रजया पितृभ्यः इति। एवं ऋणसंयोगादीनि असंख्येयानि भवन्ति॥ त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपो यज्ञमनुप्रदानं य एतानि कुर्वते तैरित्सह स्मो रजोभूत्वा ध्वंसतेऽन्यत्प्रशंसन् इति प्रशंसन् इति॥**

[कर्माण्यवश्यं कर्तव्यं ब्राह्मणेन इत्यभिप्रायेण प्रवृत्तानि वचनानि ऋणीत्यभिधायकानि। एतेषां वाक्यानां सावकाशत्वं पारिव्राज्यस्य च विविदिषोः विदुषश्च यथा निरवकाशश्रुतिपरिप्रापकत्वं, तथा प्रस्थानत्रय-भाष्येषु प्रपञ्चितम् इति सर्वमनवद्यम्।]

## मनुस्मृतिः

(षष्ठाध्याये)

**वनेषु च विहृत्यैवं तृतीयं भागमायुषः।**
**चतुर्थमायुषो भागं त्यक्त्वा सङ्गं परित्यजेत्॥ ३३॥**

[आश्रमसमुच्चयपक्षाश्रयेण एवम् उक्तम्। तत्रापि कञ्चित्कालं वान-प्रस्थाश्रममपि विषयरागोपशमनाय अनुष्ठाय सर्वथा विषयसङ्गान् त्यक्त्वा परिव्राजकाश्रमम् अनुतिष्ठेत् इति व्याख्याकारः]

**आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः।**
**भिक्षाबलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्धते॥ ३४॥**

**ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।**
**अनपाकृत्य मोक्षं तु सेव्यमानो व्रजत्यधः॥ ३५॥**

[अनपाकृतर्णानामपि विरलानाम् अस्ति पारिव्राज्यं 'ब्रह्मचर्यादेव' इति प्रागुक्तम् अस्माभिः]

**अधीत्य विधिवत् वेदान् पुत्रांश्चोत्पाद्य धर्मतः।**
**इष्ट्वा च शक्तितो यज्ञैः मनो मोक्षे निवेशयेत्॥ ३६॥**

**अनधीत्य द्विजो वेदान् अनुत्पाद्य तथा सुतान्।**
**अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥ ३७ ॥**

**प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्।**
**आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत् गृहात् ॥ ३८ ॥**

[एतेन मनुना चातुराश्रम्यसमुच्चयोऽपि दर्शितः ।]

श्रुतिसिद्धाश्च एकद्वित्रिचतुराश्रमाणां समुच्चया विकल्पिताः। तथा च जाबालश्रुतिः—'ब्रह्मचर्यं समाप्य गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत् इतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा' इति व्याख्याकारः]

**यो दत्वा सर्वभूतेभ्यः प्रवजत्यभयं गृहात्।**
**तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ॥ ३९ ॥**

[तेजोमया लोकाः हिरण्यगर्भादिलोकाः इति कुल्लूकः। ब्रह्मज्ञानिनस्तु इहैव ब्रह्मप्राप्तिरिति विशेषः। 'अत्र ब्रह्म समश्नुते' इति श्रुतेः]

**यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम्।**
**तस्य देहादिमुक्तस्य भयं नास्ति कुतश्चन ॥ ४० ॥**

[अशरीरब्रह्मप्राप्तस्य; न बिभेति कुतश्चनेति श्रुतिसिद्धम्]

**अगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः।**
**समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥ ४१ ॥**

[पवित्रोपचितः दण्डकमण्डल्वादियुक्तः इति कल्लूकः। मेधातिथिस्तु पवित्रैः मन्त्रजपैः अथवा पावनैः कृच्छ्रैः युक्तः इति व्याचष्टे। ब्रह्मसंस्थस्य तु पवित्रप्रणवोपचितत्वं ज्ञेयम्]

**एक एव चरेन्नित्यं सिद्ध्यर्थम् असहायवान्।**
**सिद्धिमेकस्य सम्पश्यन् न जहाति न हीयते ॥ ४२ ॥**

**अनग्निरनिकेतःस्यात् ग्राममन्नार्थमाश्रयेत्।**
**उपेक्षकोऽसङ्कुसकः मुनिर्भावसमाहितः ॥ ४३ ॥**

[असङ्कुसकः स्थिरमतिः, असञ्चयिकः इति पाठस्तु स्पष्टार्थः]

**कपालं वृक्षमूलानि कुचेलमसहायता।**
**समता चैव सर्वस्मिन् एतन्मुक्तस्य लक्षणम् ॥ ४४ ॥**

[एतत् मुक्तिसाधनत्वात् मुक्तस्य लिङ्गम् इति कुल्लूकः। कपालादिकम् अपरिग्रहत्वस्य द्योतकम्]

**दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्।**
**सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ ४५ ॥**

**अतिवादान् तितिक्षेत नावमन्येत कञ्चन।**
**न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ४६ ॥**

[देहाभिमानत्यागानुशासनमेतत्]

**क्रुध्यन्तं न प्रतिक्रुध्येत् आक्रुष्टः कुशलं वदेत्।**
**सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥ ४७ ॥**

[अत्र मुक्तावली-सञ्जातक्रोधाय कस्मैचित् प्रतिक्रोधं न कुर्यात्। निन्दितश्च अन्येन वाचं भद्रां वदेत् न निन्देत्। सप्तद्वारावकीर्णामिति चक्षुरादीनि पञ्च बहिः बुद्धीन्द्रियाणि, मनो बुद्धिरिति अन्तःकरणद्वयं वेदान्त-दर्शने। एतैः गृहीतेषु स्वेषु वाचा प्रवृत्तेः एतानि सप्त द्वाराणि इत्युच्यन्ते। एतैरवकीर्णां निक्षिप्तां तद्गृहीतार्थविषयां वाचं न वदेत्। किं तु ब्रह्ममात्र-विषयां वदेत्। ननु मनसैव ब्रह्मोपास्यते ब्रह्मविषयवागुच्चारणमपि

मनोव्यापारः। तत्कथं सप्तद्वारावकीर्णत्वाविशेषेऽपि ब्रह्मविषयां वदेत् इत्यन्यविषयां न वदेत् इति लभ्यते। उच्यते अत एव अनृतमिति विशेषयति स्म, अनृतमसत्यं विनाशीति यावत्, तद्विषया वागपि अनृता उच्यते तेन विनाशिकार्यविषयां वाचं न उच्चारयेत्। अविनाशिब्रह्मविषयां तु प्रणवोपनिषदादिरूपां वदेत्।

गोविन्दराजस्तु—धर्मः, अर्थः, कामः धर्मार्थौ, अर्थकामौ धर्मार्थकामाः इत्येतानि सप्त वाग्विविषयतया वाक्प्रवृत्तेर्द्वाराणि तेष्ववकीर्णां विक्षिप्तां सर्वस्य भेदस्य असत्त्वात् तद्विषयाम् असत्यरूपां वाचं न वदेत्। अन्ये तु सप्तभुवनान्येव वाग्विषयत्वात् सप्तद्वाराणि। तेषां भेदात् विनाशित्वाच्च असत्यतया तद्विषयां वाचम् असत्यां न वदेत्। केवलं ब्रह्मविषयां वदेत्।

**अध्यात्मरतिरासीनो निरपेक्षी निरामिषः।**
**आत्मनैव सहायेन सुखार्थी विचरेदिह॥ ४८॥**

[आमिषः-विषयाः, आत्मनैव देहेनैव]

**न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया।**
**नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्॥ ४९॥**

[उत्पातः भूतमन्त्रादिः निमित्तं च चक्षुःस्पन्दादि अनुशासनम् इत्थं वर्तितव्यम् इति च शास्त्रार्थकथनेन च]

**न तापसैः ब्राह्मणैर्वा वयोभिरपि वा श्वभिः।**
**आकीर्णं भिक्षुकैर्वान्यैः अगारमुपसंव्रजेत्॥ ५०॥**

**क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान्।**
**विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन्॥ ५१॥**

(कुसुम्भः-कमण्डलुः)

**अतैजसानि पात्राणि तस्य स्युः निर्व्रणानि च।**
**तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥ ५२ ॥**

**अलाबुं दारुपात्रं च मृन्मयं वैदलं तथा।**
**एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥ ५३ ॥**

[वैदलं वंशखण्डकृतम्]

**एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे।**
**भैक्षे प्रसक्तो हि यतिः विषयेष्वपि सज्जति ॥ ५४ ॥**

**विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने।**
**वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥ ५५ ॥**

**अलाभे न विषादी स्यात् लाभे चैव न हर्षयेत्।**
**प्राणयात्रिकमात्रः स्यात् मात्रासङ्गाद्विनिर्गतः ॥ ५६ ॥**

**अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः।**
**अभिपूजितलाभैस्तु यतिर्मुक्तोऽपि बध्यते ॥ ५७ ॥**

[मुक्तोऽपि आसन्नमुक्तिरपि]

**अल्पान्नाभ्यवहारेण रहःस्थानासनेन च।**
**ह्रियमाणानि विषयैः इन्द्रियाणि निवर्तयेत् ॥ ५८ ॥**

**इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च।**
**अहिंसया च भूतानाम् अमृतत्त्वाय कल्पते ॥ ५९ ॥**

**अवेक्षेत गतीर्नृणां कर्मदोषसमुद्भवाः।**
**निरये चैव पतनं यातनाश्च यमक्षये ॥ ६० ॥**

विप्रयोगं प्रियैश्चैव संयोगं च तथाप्रियैः।
जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥ ६१ ॥

देहादुत्क्रमणं चास्मात् पुनर्गर्भे च सम्भवम्।
योनिकूटसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥ ६२ ॥

अधर्मप्रभवं चैव दुःखयोगं शरीरिणाम्।
धर्मार्थप्रभवं चैव सुखसंयोगमक्षयम् ॥ ६३ ॥

सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः।
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥ ६४ ॥

दूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे रतः।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ॥ ६५ ॥

फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम्।
न नामग्रहणादेव तस्य वारि प्रसीदति ॥ ६६ ॥

संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा।
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥ ६७ ॥

अह्ना रात्र्या च यान् जन्तून् हिनस्त्यज्ञानतो यतिः।
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षडाचरेत् ॥ ६८ ॥

प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः।
व्याहृतिप्रणवैः युक्ता विज्ञेयं परमं तपः ॥ ६९ ॥

दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥ ७० ॥

प्राणायामैर्दहेत् दोषान् धारणाभिश्च किल्बिषम्।
प्रत्याहरेण संसर्गान् ध्यानेनानीश्वरान् गुणान्॥ ७१ ॥

[अनीश्वरान् क्रोधलोभासूयादीन्]

उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः।
ध्यानयोगेन सम्पश्येत् गतिमस्यान्तरात्मनः॥ ७२ ॥

सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबध्यते।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते॥ ७३ ॥

अहिंसयेन्द्रियासङ्गैः वैदिकश्चैव कर्मभिः।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम्॥ ७४ ॥

अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम्।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीशयोः॥ ७५ ॥

जराशोकसमाविष्टं रोगायतनमातुरम्।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत्॥ ७६ ॥

नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा।
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते॥ ७७ ॥

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम्।
विमृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनम्॥ ७८ ॥

यदा भावेन भवति सर्वभावेषु निस्पृहः।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम्॥ ७९ ॥

अनेन विधिना सर्वान् त्यक्त्वा सङ्गान् शनैः शनैः।
सर्वद्वन्द्वविनिर्मुक्तो ब्रह्मण्येवावतिष्ठते॥ ८० ॥

**ध्यानिकं सर्वमेवैतत् यदेतदभिशब्दितम् ।**
**न ह्यनध्यात्मवित्कश्चित् क्रियाफलमुपाश्नुते ॥ ८१ ॥**

[ध्यानिकं परमात्मध्यानफलम्]

**अधियज्ञं ब्रह्म जपेत् आधिदैविकमेव च ।**
**आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ॥ ८२ ॥**

**इदं शरणमज्ञानाम् इदमेव विजानताम् ।**
**इदमन्विच्छतां स्वर्गम् इदमानन्त्यमिच्छताम् ॥ ८३ ॥**

(इदं वेदाख्यं ब्रह्म, अज्ञानां ब्रह्मज्ञानरहितानां स्वर्गापवर्गाणां ब्रह्मैव शरणम् इत्यर्थः । यतीनां ब्रह्म प्रणवरूपम्)

**अनेन क्रमयोगेण परिव्रजति यो द्विजः ।**
**स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥ ८४ ॥**

[क्रमयोगः आश्रमात् आश्रमान्तरगमनं तत्र तत्र विहितरीत्या ब्रह्म-जपानुष्ठानेन कर्मानुष्ठानेन च]

**एष धर्मोऽनुशिष्टो वो यतीनां नियतात्मनाम् ।**
**वेदसंन्यासिकानां तु कर्मयोगं निबोधत ॥ ८५ ॥**

[वेदसंन्यासिको यतिविशेषः कुटीचक इति कुल्लूकः । गोविन्दराजस्तु गृहस्थविशेषमेव वेदोदिताग्निहोत्रादिकर्मत्यागिनं ज्ञानमात्रसम्पादित-वैदिककर्माणं वेदसंन्यासिकमाह ।]

एवमेवाहिताग्नीनां त्यागम् अर्थात् उपेतवान् । वेदसंन्यासिकं मेधातिथिः प्राह निराश्रमम् ॥ इत्युक्त्वा तदेतत् पक्षद्वयं निराकृतवान् कुल्लूकः । तन्मते चातुराश्रम्यनियमोक्तिः कथं मनोः ।

**ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा।**
**एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥ ८६ ॥**

**सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः।**
**यथोक्तकारिणं विप्रं नयन्ति परमां गतिम् ॥ ८७ ॥**

**सर्वेषामपि चैतेषां वेदस्मृतिविधानतः।**
**गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्ति हि ॥ ८८ ॥**

(बिभर्ति भिक्षादानेन पोषयति)

**चतुर्भिरपि चैवैतैः नित्यमाश्रमिभिर्द्विजैः।**
**दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ॥ ८९ ॥**

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधः दशकं धर्मलक्षणम् ॥ ९० ॥**

**दश लक्षणानि धर्मस्य ये विप्राः समधीयते।**
**अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ॥ ९१ ॥**

**दशलक्षणकं धर्मम् अनुतिष्ठन् समाहितः।**
**वेदान्तं विधिवत् श्रुत्वा सन्यसेदनृणो द्विजः ॥ ९२ ॥**

(श्रुत्वा संन्यसेत् इत्युक्त्या-गृहस्थानामपि श्रवणाधिकारो गम्यते ।)

**संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन्।**
**नियतो वेदमभ्यस्य पुत्रैश्वर्ये सुखं वसेत् ॥ ९३ ॥**

(कुटीचकस्य अयं धर्मः)

**एवं संन्यस्य कर्माणि स्वकार्यपरमोऽस्पृहः।**
**संन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् ॥ ९४ ॥**

## अथ द्वादशाध्याये (मनुस्मृतिः)

**वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च।**
**यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ॥ १० ॥**

( न तु दण्डत्रयधारणमात्रेण इति आभ्यन्तरदण्डत्रयप्रशंसा)

**त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः।**
**कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति ॥ ११ ॥**

**योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते।**
**यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ॥ १२ ॥**

**सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतम्।**
**एतद्व्याप्तिमदेतेषां सर्वभूताश्रितं वपुः ॥ २६ ॥**

[एतेषां सत्त्वादिगुणानाम् एतद् ज्ञानादि सर्वप्राणिव्यापकं लक्षणम्]

**देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः।**
**तिर्यक्त्वं तामसा नित्यम् इत्येषा त्रिविधा गतिः ॥ ४० ॥**

**तापसा यतयो विप्रा ये च वैमानिका गणाः ॥**
**नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः ॥ ४८ ॥**

**यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः।**
**पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः ॥ ४९ ॥**

**ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च।**
**उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥ ५० ॥**

(महान् अव्यक्तम् इति च अधिष्ठातृदेवताः उक्ताः)

वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥ ७३ ॥

सर्वेषामपि चैतेषां शुभानामिह कर्मणाम्।
किञ्चिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति ॥ ७४ ॥

सर्वेषामपि चैतेषाम् आत्मज्ञानं परं स्मृतम्।
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ॥ ७५ ॥

षण्णामेषां तु सर्वेषां कर्मणां प्रेत्य चेह च।
श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकम् ॥ ७६ ॥

(षण्णां वेदाभ्यासादीनां पूर्वोक्तानाम्) कर्म परमार्थज्ञानमिति कुल्लूकः

वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः।
अन्तर्भवन्ति क्रमशः तस्मिन् तस्मिन् क्रियाविधौ ॥ ७७ ॥

सुखाभ्युदयिकं चैव नैःश्रयसिकमेव च।
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥ ७८ ॥

इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ॥ ७९ ॥

(अकामोपहतं नित्यं निवृत्तं च विधीयते।
कामतस्तु कृतं कर्म प्रवृत्तमुपदिश्यते ॥)

प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम्।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥ ९० ॥

[उत्तरार्धस्य अर्थविषये बृहदारण्यकभाष्यमवलोकनीयम्]

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति॥ ९१॥

यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्॥ ९२॥

एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः।
प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा॥ ९३॥

पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः॥ ९४॥

या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः॥ ९५॥

उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित्।
तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च॥ ९६॥

चातुर्वर्ण्यं त्रयो लोकाः चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति॥ ९७॥

वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥ १०२॥

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रंथिभ्यो धारिणो वराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः॥ १०३॥

(व्यवसायिनः अनुष्ठातारः)

तपो विद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसा किल्बिषं हन्ति विद्ययाऽमृतमश्नुते॥ १०४॥

**प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम्।**
**त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥ १०५ ॥**

**आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥ १०६ ॥**

**अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत्।**
**यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः ॥ १०७ ॥**

**एकोऽपि वेदविद्धर्मं यं व्यवस्येत् द्विजोत्तमः।**
**स विज्ञेयः परो धर्मः नाज्ञानामुदितोऽयुतैः ॥ ११३ ॥**

**सर्वमात्मनि संपश्येत् सच्चासच्च समाहितः।**
**सर्वं ह्यात्मनि संपश्यन् नाधर्मे कुरुते मतिम्॥ ११७ ॥**

**आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम्।**
**आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्॥ ११९ ॥**

**खं संनिवेशयेत्खेषु चेष्टनस्पर्शनेऽनिलम्।**
**पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्तिषु ॥ १२० ॥**

**मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्।**
**वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्॥ १२१ ॥**

**प्रशासितारं सर्वेषाम् अणीयांसमणोरपि ॥**
**रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम्॥ १२२ ॥**

["एतस्य वा अक्षरस्य प्रशासने गार्गि" इति श्रुतेः। रुक्माभम् इति ध्यानार्थं, स्वप्नधीगम्यम्—इन्द्रियानपेक्षधीगम्यम्—अनुभवैकगम्यम् इति यावत्]

एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणम् अपरे ब्रह्म शाश्वतम् ॥ १२३ ॥

[उपासकदृष्टिभेदेन अग्न्यादिरूपता ब्रह्मणः]

एष सर्वाणि भूतानि पञ्चभिर्व्याप्य तिष्ठति ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥ १२४ ॥

एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥ १२५ ॥

[चतुर्वेदसमं पुण्यमस्य शास्त्रस्य धारणात् ।
भूयो वाप्यतिरिच्येत पापनिर्यातनं महत् ॥]

## याज्ञवल्क्यस्मृतिः

[प्रायश्चित्ताध्यायः यतिधर्मप्रकरणम् ]

वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् ।
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ॥ ५६ ॥

अधीतवेदो जपकृत् पुत्रवानन्नदोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ॥ ५७ ॥

सर्वभूतहितः शान्तः त्रिदण्डी सकमण्डलुः ।
एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ॥ ५८ ॥

अप्रमत्तश्चरेद्भैक्षं सायाह्नेऽनभिलक्षितः ।
रहिते भिक्षुकैर्ग्रामे यात्रामात्रामलोलुपः ॥ ५९ ॥

यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च ।
सलिलं शुद्धिरेतेषां गोवालैश्चावघर्षणम् ॥ ६० ॥

संनिरुध्येन्द्रियग्रामं रागद्वेषौ प्रहाय च।
भयं हित्वा च भूतानाम् अमृती भवति द्विजः॥ ६१ ॥

कर्तव्याशयशुद्धिस्तु भिक्षुकेण विशेषतः।
ज्ञानोत्पत्तिनिमित्तत्वात् स्वातन्त्र्यकरणाय च॥ ६२ ॥

अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा।
आधयो व्याधयः क्लेशाः जरारूपविपर्ययः॥ ६३ ॥

भवो जातिसहस्रेषु प्रियाप्रियविपर्ययः।
ध्यानयोगेन संदृश्यः सूक्ष्म आत्मात्मनि स्थितः॥ ६४ ॥

नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः।
अतो यदात्मनोऽपथ्यं परस्य न तदाचरेत्॥ ६५ ॥

सत्यमस्तेयमक्रोधः ह्रीः शौचं धीर्धृतिर्दमः।
संयतेन्द्रियता विद्या धर्मः सर्व उदाहृतः॥ ६६ ॥

निस्सरन्ति यथा लोहपिण्डात् तप्तात् स्फुलिङ्गकाः।
सकाशादात्मनस्तद्वत् आत्मानः प्रभवन्ति हि॥ ६७ ॥

तत्रात्मा हि स्वयं किञ्चित् कर्म किञ्चित्स्वभावतः।
करोति च तदभ्यासाद्धर्माधर्मोभयात्मकम्॥ ६८ ॥

निमित्तमक्षरः कर्ता बोद्धा ब्रह्मगुणे वशी।
अजः शरीरग्रहणात् स जात इति कीर्त्यते॥ ६९ ॥

सर्गादौ स यथाकाशं वायुं ज्योतिर्जलं महीम्।
सृजत्येकोत्तरगुणान् तथादत्ते भवन्नपि ॥ ७० ॥

आहुत्याप्यायते सूर्यः तस्माद्वृष्टिरथौषधीः ।
तदन्नं रसरूपेण शुक्रत्वमधिगच्छति ॥ ७१ ॥

स्त्रीपुंसयोस्तु सयोगे विशुद्धे शुक्रशोणिते ।
पञ्च धातून् स्वयं षष्ठः आदत्ते युगपत्प्रभुः ॥ ७२ ॥

इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः ।
धारणा प्रेरणं दुःखमिच्छाहङ्कार एव च ॥ ७३ ॥

प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ ।
तस्यैतदात्मजं सर्वमनादेरादिमिच्छतः ॥ ७४ ॥

(इति प्रथमपरिशिष्टे स्मृतिप्रमाणवाक्यानि)

# परिशिष्टः — २

## यतिसंस्कारविषयविचारः

परमहंस इति अभिज्ञातः संन्यासी ग्रामेषु यदि शरीरं परित्यजेत् तदा तच्छरीरमवटे निधाय समाधिं कुर्वन्ति, आरोपयन्ति च तत्स्मारकार्थम् अश्वत्थादिवृक्षान् प्रत्यहं वेदिकापूजादिकमनुतिष्ठन्ति। योऽयं समुदाचारः अद्यतनसमाजे रूढः स नूनं नृणां श्रेयस्कर एव इति न पृथग्वक्तव्यम्। अयं परमहंस इति प्रत्यभिज्ञांतु पुनः जनानाम् अवकाशः प्रायेण असम्भव एव। यतः ते परहंसाः नैकत्र वसन्ति। एकान्तप्रियाः रहः सञ्चरन्ति। निरन्तरं ब्रह्मचिन्तने एव निमज्जन्ति। अतस्तेषां शरीरत्यागकालः पुत्रेण अन्येन वा जनेन ज्ञातुं दुःशक एव। स्मृतिषु कुटीचक-बहूदक-हंस-परमहंसाख्यान् चतुर्विधानपि यतीनुद्दिश्य तेषां शरीरपातात् एकादशाहे द्वादशाहे वा कर्तव्यानि पार्वणश्रद्धादीनि विहितानि उपलभ्यन्ते। "न कुर्याद्वार्षिकादन्यत् ब्रह्मीभूताय भिक्षवे" इति विशेषोक्तिश्च तत्र भवति। पूर्वोक्तनीत्या परहंस-देहत्यागकालस्य दुर्ज्ञेयत्वात्, तदर्थं वार्षिकादीनामपि प्रवृत्तिः बाहुल्येन विरल एवेति वक्तुं युक्तम्। अतस्तद्विषये विहिता **अन्त्यक्रियापि वैकल्पिकी** इत्येव आपद्यते। "कुटीचकं सम्प्रदहेत् बहूदकं च जले क्षिपेत्। हसं चैव तु निक्षिप्य परहंसं विशीरयेत्॥" इति एतत्स्मृतिवाक्यं यतिसंस्कार-विषये अनेके उदाहरन्ति। सम्प्रति अनुष्ठीयमानः परमहंससमाधिप्रकारः अनेन वाक्येन विरुध्यत इत्याभाति। स्मृत्याचारयोः सङ्गतिः कथमापादनीया इत्यत्र सुज्ञा एव विचारयितुमर्हन्ति।

(यतिसंस्कारविषये ग्रन्थप्रणेतृणामभिप्रायः उक्तः। लोके पुत्राद्यधि-कारिभिः अनुष्ठीयमानो योऽयं यतिसंस्कारक्रमोऽस्ति सोऽत्र आपस्तम्ब-सूत्रानुसारियल्लाजीयप्रयोगात्सङ्गृहीतोऽस्ति)

**यतिसंस्कारं व्याख्यास्यामः**

**कर्ता स्नात्वा तु शुद्धात्मा यतिसंस्कारमाचरेत्।**
**पुत्रः कुर्यात्तु शिष्यो वा सन्निकृष्टोऽपि चेत्तदा ॥**

**पञ्चामृतैः स्नापयित्वा प्रणवेन ततःपरम्।**
**अब्लिङ्गैः वारुणैर्मंत्रैः विष्णुसूक्तैस्तथैव च ॥**

**त्रियंम्बकैश्च मन्त्रैश्च शुद्धाद्भिः स्नापयेत्ततः।**
**शिक्ये शरीरं संस्थाप्य गन्धमाल्यैरलंकृतम्॥**

**घोषयेज्जयशब्देन दुंदुभीनां रवैरपि।**
**ग्रामप्रदक्षिणं कृत्वा ब्राह्मणैर्वेदपारगैः ॥**

**प्राचीमुदीचीं गत्वा तु शुद्धदेशं समाश्रयेत्।** नदीतीरे अश्वत्थमूले देवालये अरण्ये गोष्ठे ब्रह्मवृक्षस्य मूले वा अधस्तात् व्याहृतिभिः प्रोक्ष्य, दंडायाममात्रेण अवटं खात्वा, व्याहृतिभिः प्रोक्ष्य उत्ताराग्रान् दर्भान् संस्तीर्य, लवणं प्रक्षिप्य, सावित्र्या शरीरं प्रक्षाल्य गंधादिभिरलङ्कृत्य, विष्णो हव्यं रक्षस्वेति गर्ते शरीरं निक्षिप्य, इदं विष्णुर्विचक्रम इति दक्षिणहस्ते दंडं निधाय, ब्रह्मजज्ञानमिति मूर्धानं स्पृष्ट्वा जपेत्। भूमिर्भूमिमगान् माता मातरमभ्यगात्। भूयास्म पुत्रैः पशुभिर्योनो द्वेष्टि स भिद्यताम् इति लगुडेन मूर्धानं भिंद्यात्। (अत्र मूर्धभेदने शतं चैका च (कठ. २-३-१६) इति इमं मंत्रं केचित् आमनन्ति) प्रणवेन अभिमृश्य देवयजनं मे वयतु अमुष्यामदधात्। लवणादिभिः पूरयित्वा। अग्निनाग्निस्समिध्यते कविर्गृहपतिर्युवा। हव्यवाड् जुह्वास्यः ॥ त्वंह्यग्ने अग्निना विप्रो विप्रेण सन्थ्सता। सखा

सख्यां समिध्यसे ॥ तं मर्जयंत सुक्रतुं (श्रुतं) पुरोयावानमाजिषु । स्वेषु क्षयेषु वाजिनम् । यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानस्सचंते यत्र पूर्वे साध्यास्संति देवाः ॥ इति चतुर्भिः ऋग्भिश्च । पृथिवी होता । द्यौरध्वर्युः । रुद्रोऽग्नीत् । बृहस्पतिरुपवक्ता । वाचस्पते वाचो वीर्येण । संभृततमेनायक्ष्यसे । यजमानाय वार्यम् । आसुवस्करस्मै । वाचस्पति-स्सोमं पिबति । जजनदिन्द्रमिन्द्रियाय स्वाहा ॥

अग्निर्होता । अश्विनाध्वर्यू । त्वष्टाग्नीत् । मित्र उपवक्ता । सोमस्सोमस्य पुरोगाः । शुक्रश्शुक्रस्य पुरोगाः । श्रातास्त इंद्र सोमाः । वातापेर्हवनश्रुतः स्वाहा ॥

सूर्यं ते चक्षुः । वातं प्राणः । द्यां पृष्ठम् । अंतरिक्षमात्मा । अङ्गैर्यज्ञम् । पृथिवीं शरीरैः । वाचस्पतेऽच्छिंद्रया वाचा । अच्छिंद्रया जुह्वा । दिवि देवावृधं होत्रा मेरयस्व स्वाहा ॥

महाहविर्होता । सत्यहविरध्वर्युः । अच्युतपाजा अग्नीत् । अच्युतमना उपवक्ता । अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ । अयास्य उद्गाता । वाचस्पते हृद्विधे नामन् । विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पति-स्सोममपात् । मा दैव्यस्तंतुश्छेदि मा मनुष्यः । नमो दिवे । नमः पृथिव्यै स्वाहा ॥ इति चतुर्होतृभिश्च ।

अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे । पृथिव्यास्सप्तधामभिः ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । ततो धर्माणि धारयन्न् ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इंद्रस्य युज्यस्सखा ॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसस्समिंधते । विष्णोर्यत्परमं पदम् ॥ इत्यंतं जपित्वा प्रणमेत् ॥ नात्र संस्कारविशेषः । कर्तुः नाशौचम् । अशौचशङ्कया अपो न स्पृशेत् । सपरशौचं विधीयते अश्वमेधफलमवाप्नोति । सिद्धिदिनप्रभृति दशमदिन-पर्यंतं समाधिवेदिकायां साक्षत-पुष्पांजलिं दत्वा धूपदीपनैवेद्यादिकं कृत्वा गायत्र्या प्रणवेन वा ब्रह्मार्घ्याणि अष्टसु दिक्षु दद्यात् ।

खननदेशे-पूर्वोक्तएवंगुणविशेषणविशिष्टायां... तिथौ सिद्धिंगतस्य परमहंसस्य तृप्त्यर्थं तर्पणानि करिष्ये । आत्मानं तर्पयामि । अन्तरात्मानं तर्पयामि । परमात्मानं तर्पयामि । जीवात्मानं तर्पयामि । ओम् इति इन्द्रा-द्यष्टसु दिक्षु क्षीरेण तर्पणानि दत्वा तदनन्तरं वेदिकां प्रदक्षिणं कृत्वा सभापूजां कृत्वा दक्षिणाताम्बूलानि दत्वा ब्राह्मणैः सह बन्धुभिः सह कर्ता गृहं गच्छेत् ।

**यतीनां मरणे प्राप्ते स्पृष्टिदोषो न विद्यते ।**
**आशौचबुद्ध्या न स्नायात् स्नातुश्च नरकं ध्रुवम् ॥**
**आशौचबुद्ध्या स्नातश्चेत् उपपातकवान् भवेत् ।**
**यतीनां मरणे प्राप्ते नाशौचं नोदकक्रिया ॥**

वहतामश्वमेधस्य फलं भवति पुष्कलम् ।
ज्ञातिपुत्रकलत्राणां परिव्राण्मरणे यदि ॥
आशौचं नास्ति तेषां वै स्नानमप्याचरेत् न तु ।
भिक्षुः प्राणविनष्टस्तु दृष्टश्चेत् प्राणिभिर्यदि ।
तेषामप्यघहानिःस्यात् आर्युर्वृद्धिश्च जायते ॥
न सूतकाग्निसंस्कारः नार्द्रवस्त्रजलादयः ।
नैकोद्दिष्टं षोडशान्नं सापिण्ड्यं च न विद्यते ॥
नारायणबलिं तत्र कुर्याद्वै द्वादशेऽहनि ।
ततश्च विष्णुबद्ध्या तु यतीन् संपूजयेत् द्विजः ॥
अपुत्रो वा सुपुत्रो वा सिद्धिं प्राप्तो यतिर्यदि ।
नारायणबलिं तस्य कुर्यादेकादशेऽहनि ॥
षष्टिःकुलान्यतीत्यान्ते षष्टिरागामिकान्यपि ।
कुलान्युध्दरते प्राज्ञः सन्यस्तमिति यो वदेत् ॥

इति यतिसंस्कारविधिः समाप्तः ॥

